सामाजिकविज्ञानम्

सामाजिक-राजनैतिक-जीवनम्-II

सप्तमकक्ष्यायै पाठ्यपुस्तकम्

सामाजिक-विज्ञानम्

सामाजिक-राजनैतिक-जीवनम् – 2

सप्तमकक्ष्यायै पाठ्यपुस्तकम्

सामाजिक-विज्ञानम्

सामाजिक-राजनैतिक-जीवनम् – 2

सप्तमकक्ष्यायै पाठ्यपुस्तकम्



राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

NATIONAL COUNCIL OF EDUCATION RESEARCH AND TRAINING

अनुवादकः – रूपलालशर्मा

जनवरीमासः 2016 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती । नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति । एतस्मिन् प्रयासे प्रत्येकं विषयं एकया दृढया भित्त्या आवरणस्य अथ च सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति । आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति ।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले स्वस्य अनुभवैः चिन्तनस्य च अवसरान् कल्पयन्ति । अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभिः सह युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति । शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति । सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति मतं त्यजन्तु ।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति । दैनन्दिन्यां समय-सारण्यां स्थिति-स्थापकत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतदिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् । शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारयिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने, हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति । भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः । एषः प्रयासः इतोऽपि गभीरतया स्यात् एतदर्थम् इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते, आश्चर्यस्य कृते, लघुषु समूहेषु वार्तालापस्य चर्चायाः च कृते, हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति । परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः नीलाद्रिभट्टाचार्यस्य विशेषरूपेण कृतज्ञा अस्ति । एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्, एतद् योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि कृतज्ञाः स्मः । वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः ।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायाः निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः । व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नावीन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति, यतः भाविसंशोधनेषु सहायता लभ्येत।

नवदेहली **निदेशकः**

20 नवम्बरः 2005 **राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद् च**

पाठ्यपुस्तक-विकास-समितिः

अध्यक्षः, सामाजिक-विज्ञान-पाठ्यपुस्तक-परामर्शदातृ-समितिः

हरिवासुदेवनः, प्रोफेसरः, इतिहास-विभागः, कलकत्ता-विश्वविद्यालयः, कोलकाता (अध्यायः -2)।

मुख्य-परामर्शदाता

शारदा-बालगोपालनः, विकासशील-समाज-अध्ययन-पीठम्, दिल्ली।

परामर्शदाता

अरविन्दसरदाना, एकलव्य-शैक्षिकशोध-नवाचार-संस्थानम्, मध्यप्रदेशः।

सदस्याः

अञ्जलिनरोना, एकलव्य-शैक्षिकशोध-नवाचार-संस्थानम्, मध्यप्रदेशः।

दिप्ताभोगः, निरन्तर-जेंडर-शिक्षा-सन्दर्भ-समूहः,सर्वोदय-इन्क्लेव इति, नवदेहली।

कृष्णामेननः, रीडर, लेडी-श्रीराम-कालेज इति, दिल्लीविश्वविद्यालयः, दिल्ली।

लतिकागुप्ता, परामर्शदात्री, प्रा.शि.वि., राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद्, नवदेहली।

एम.वी.श्रीनिवासनः, प्रवक्ता, सा.वि.मा..शि.वि., राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद्, नवदेहली।

मालिनीघोषः, निरन्तर-जेंडर-शिक्षा-सन्दर्भ-समूहः, सर्वोदय-इन्क्लेव, नवदेहली।

मेरी ई.जॉन, निदेशकः, सेंटर फॉर वीमेन्स डेवलेपमेंट स्टडीज, नवदेहली।

एन.बी.सरोजनी, सामा-रिसर्च-ग्रुप फॉर वीमेन एंड हेल्थ इति, नवदेहली।

रंगन-चक्रवर्ती, ए 4/7, गोल्फ ग्रीन अर्बन कॉम्प्लेक्स इति, फेस I, कोलकाता।

सुकन्याबोसः, एकलव्य रिसर्च फेलो, 66 एफ, सेक्टर 8, जसोला विहार, नवदेहली

हिन्दी-अनुवादः

उषा चौधरी, प्रवक्ता, शिक्षा विभागः, डी.ए.वी.महाविद्यालयः, भोपालम्।

विवेकश्रीवास्तवः, हिन्दीप्रवक्ता, (तदर्थ इति), क्षेत्रीय-शिक्षा-संस्थानम्, (रा.शै.अ.प्र.प.), श्यामलाहिल्स, भोपालम्।

सदस्यसमन्वयकः

मल्ला वी.एस.वी.प्रसादः, प्रवक्ता, सा.वि.मा.शि.वि., राष्ट्रिय-शैक्षिकानुसन्धानं प्रशिक्षण-परिषद् , नवदेहली।

कृतज्ञता-ज्ञापनम्

एतत् पुस्तकम् अनेकाभिः संस्थाभिः व्यक्तिभिः च लाभान्वितम् अस्ति । एतस्य पुस्तकस्य कार्ये पूनमबत्रा पियूदत्तः एस.मोहिन्दरः आदित्यनिगमः च सम्मिलिताः सन्ति । यैः अनेके पाठाः पठिताः तथा च स्वपरामर्शाः अपि दत्ताः । एतद् अतिरिच्य राजीवभार्गवः कौशिकघोषः अनुगुप्ता सुनीलः ए.वी.रमानी च तथ्यानां विषये चर्चां कृतवन्तः तथा च विशिष्टेषु पाठेषु परामर्शान् दत्तवन्तः । वी.गीता अतीव सहृदयतया सम्पूर्णान् पाठान् पठितवती तथा च तस्याः विस्तृतपरामर्शैः पुस्तकम् एतत् अतीव उपयोगि जातम् । अंजलिमांटीइरों एस.शङ्करः च विभिन्नेषु चरणेषु सञ्चार-माध्यमस्य (मीडियाः) विषये स्वविचारान् उपस्थापितवन्तौ यैः विचारैः तेषां पाठानां सार्थकतायाः वर्धने साहाय्यं कृतम् । टुलटुलविश्वासः अन्तिमपाठाय उपयुक्तकविताम् अन्वेष्टुं साहाय्यं कृतवती अपि च विनयमहाजनः तां कवितां पाठे सम्मेलितुम् आज्ञां दत्तवान् । संचिराविश्वासः दिप्ताभोगः इत्येते च कविताम् आङ्ग्लभाषया अनूदितवत्यौ अपि च रविकान्तः अनुवादाय अन्तिमरूपं दत्तवान् । स्मृतिवोहरा अपि सर्वथा अन्तिमेषु क्षणेषु सम्पादनं कृतवती । तस्याः पार्श्वे अत्यधिकं कार्यम् आसीत् तथापि सा सावधानतया सम्पादनं कृतवती । एलेक्सजार्जः अपि षष्ठकक्ष्यायाः पुस्तकस्य इव स्वविचारान् दृष्टिकोणं च अस्माभिः सह वण्टयित्वा महत्त्वपूर्णसाहाय्यं कृतवान् । उर्वशीबुटालिया अधुना अपि अस्माभिः सह अस्ति अपि च महता उत्साहेन सा समयं नियोज्य सम्पादनं कृतवती अपि च सुनिश्चितं कृतवती यत् तस्याः ध्यानपूर्वकपठनेन पुस्तकस्य लाभः स्यात् । वयं जुबानवर्यस्य आभारिणः स्मः यतो हि सः स्वपुस्तकस्य 'वीमेन – अ विज्युअल-हिस्ट्री-आफ-द-वीमेन्स-मूवमेंट-इन-इण्डिया' इत्यस्य चित्राणि प्रयोक्तुम् आज्ञां दत्तवान् । वयं दीवार-चलचित्रस्य चित्राणि प्रयोक्तुं त्रिमूर्ति-फिल्म्स–प्राइवेट-लिमिटेड् इत्यस्य अपि कृतज्ञाः स्मः । त्रिषष्टितमे पृष्ठे प्रदत्तचित्रं पार्टनर्स-फार-ला-एंड-डेवलपमेंट् इति दत्तवान् । गाजियाबादस्य केन्द्रीय-विद्यालयः -२, हिन्डनस्य कक्ष्या vi बी इत्यस्य विद्यार्थिनां अध्यापिकानां प्रधानाचार्यस्य च कृते धन्यवादं ज्ञापयामः ये भित्तिपत्रे स्फोरकपत्रे च कार्यं कर्तुं स्वीकृतवन्तः अपि च ते चित्रैः सह पुस्तके प्रयोक्तुम् आज्ञापितवन्तः । उत्तरीरेलवे इत्यस्य योगेन्द्र–एस.राजपूतस्य नेशनलसेंटर-फार-प्रमोशन-आफ-इंप्लायमेंट-फार-डिसेबल्ड-पीपल इत्यस्य अपि कृतज्ञाः स्मः ये स्वसार्वजनिकविज्ञापनानां प्रयोगाय अनुमतिं दत्तवन्तः। सरायस्य एम.कुरैशी अपि आवश्यकतायां सत्यां सर्वदा साहाय्यं कृतवान् अतः वयं तस्य कृतज्ञाः स्मः।

एतस्मिन् पुस्तके यानि चित्राणि प्रयुक्तानि सन्ति तानि विभिन्नस्रोतोभ्यः सङ्कलितानि सन्ति अतः वयं तेषां सर्वेषां जनानां संस्थानां च सहृदयं धन्यवादं कुर्मः । सेंटर-फार-साइंस-एंड-इन्वायरनमेंट इत्यनेन अनेकानि चित्राणि दत्तानि अपि च अमितशङ्करः अनिलः च महान्तं कालं दत्तवन्तौ । अल्पे काले एव आउटलुक इति पत्रिकया अपि बहूनि चित्राणि दत्तानि । शीबा पितृव्या अपि महिलान्दोलन-सम्बद्ध-लेखाय स्वचित्राणि दत्तवती । सलिलचतुर्वेदी शाहिद-दातावाला च स्वसङ्ग्रहात् उपयुक्तानि चित्राणि दत्तवन्तौ । महेशबसादिया तवा-मत्स्य-सङ्घस्य चित्राणि दत्तवान् अपि च महिला-बालविकास-विभागस्य देवासः आङ्गन-वाटिकायाः चित्राणि दत्तवान् । हर्षमनराय बाजीरावपवारः च अपि चित्राणि दत्तवन्तः नूतनानि चित्रयितुं साहाय्यं च कृतवन्तौ । एम.वी.श्रीनिवासनः ईरोडतः चित्राणि आनयितुं साहाय्यं कृतवान् । देवज्योतिदत्तः विज्ञापनानां पाठेषु दत्तविज्ञापनानि निर्मातुं साहाय्यं कृतवान् । वयं नवदान्यायाः कृते धन्यवादं विज्ञापयामः यत् सा स्वास्थ्यस्य चित्रमालायाः कृते कानिचन चित्राणि दत्तवती । शारदाबालगोपालनद्वारा चित्राङ्कितानि कानिचन चित्राणि अपि अस्मिन् पुस्तके प्रयुक्तानि सन्ति ।

यया रुच्या धीरजः ओरिजीतसेनः सलिलचतुर्वेदी च येन प्रकारेण एतस्य पुस्तकस्य चित्रकाररूपेण कार्यं कृतवन्तः तस्य गुणवत्ता प्रत्येकस्मिन् पृष्ठे परिलक्ष्यते । वयं तेषां कृतज्ञाः स्म ।

हिन्द्यनुवादे एकलव्यः अतिमहत्त्वपूर्णां भूमिकाम् ऊढवान् । उषाचौधरी विवेकश्रीवास्तवः च अत्यन्तं धैर्यपूर्वकं पाठानाम् अनुवादं कृतवन्तौ । वयं तयोः कृतज्ञाः स्मः । वयं रश्मिपालीवालस्य टुलटुलविश्वासस्य च अपि कृतज्ञाः स्मः, ययोः साहाय्येन अनुवादकार्यं सम्पन्नतां गतम् ।

वयं भोपालस्य क्षेत्रीय-शिक्षा-संस्थानस्य प्राचार्यस्य प्रोफेसर-ए.बी.सक्सेना इत्यस्य - सहयोगाय तस्य धन्यवादं कुर्मः।

अनेकाभिः संस्थाभिः अपि महत्त्वपूर्णाः भूमिकाः निरूढाः। ते अस्माकम् एतस्य पुस्तकस्य कृते व्यस्तताम् अवगतवन्तः अपि च पुस्तकसम्बद्धकार्ये अपि ते पर्याप्तं सहयोगं कृतवन्तः। विकासशीलसमाजाध्ययनपीठेन एकलव्येन, निरन्तरेण, सेंटर-फार-वीमेन्स-डवलेपमेंटस्टडीज, सामा इत्येताभिः संस्थाभिः चापि सहयोगः कृतः।

एतस्य पुस्तकस्य निर्माणस्य विभिन्नचरणेषु सहयोगाय वयम् डी.टी.पी.आपरेटर-उत्तमकुमारस्य अंजनाबख्शीवर्यायाः या कॉपी-एडिटर इति अस्ति तस्याः अपि च शशिदेव्याः या प्रूफ्रीडर् इति अस्ति तस्याः च विशेषत्वेन कृतज्ञाः स्मः। प्रकाशनविभागद्वारा वयं सम्पूर्णं सहयोगं सौविध्यानि च प्राप्तवन्तः एतदर्थं वयं तस्य कृतज्ञाः स्मः।

शिक्षकाणां कृते भूमिका

'नागरिकशास्त्रं' 'सामाजिक-राजनैतिक-जीवनं' च परस्परं भिन्नतां भजतः। तत्र वर्णितविषयेषु पार्थक्यम् अस्ति अपि च तयोः कृते आवश्यक-शिक्षणोपायेषु अपि भिन्नता भवति। एतं विषयम् अधिकृत्य इयं भूमिका "सामाजिक-राजनैतिक-जीवनस्य काञ्चन् विषयान् स्पष्टीकर्तुं प्रयासं करिष्यति।

सामाजिकं राजनैतिकं च जीवनं किम् अस्ति ?

सामाजिकं राजनैतिकं च जीवनं माध्यमिक-शालास्तरे समाजविज्ञानस्य पाठ्यक्रमे परम्परया जायमानस्य नागरिक-शास्त्रस्य स्थाने नूतनः विषयः अस्ति। राष्ट्रियपाठ्य-चर्यायाः रूपरेखायां २००५ तमे वर्षे बलाघात-पुरस्सरम् उक्तम् अस्ति यत् नागरिक-शास्त्रस्य परित्यागः आवश्यकः अस्ति तस्य स्थाने यः नूतनः विषयः स्वीक्रियते तस्मिन् विषये सर्वकारीय-संस्थाभ्यः तासां कार्याणां कृते दीयमानस्य महत्त्वस्य सन्तोलनं भवेत्। यथा 'सामाजिकं राजनैतिकं च जीवनम्' इति एतस्य पुस्तकस्य नाम्ना एव स्पष्टीभवति यद् एतस्मिन् विषये अद्यतनभारतस्य सामाजिक-राजनैतिकार्थिक-जीवन-विषयाः केन्द्रे स्थापयिष्यन्ते।

सामाजिकस्य राजनैतिकस्य च जीवनस्य शिक्षणपद्धतिः का अस्ति ?

पूर्वं यत् नागरिकशास्त्रम् आसीत् तस्य अपेक्षया सामाजिकं राजनैतिकं च जीवनम् इत्यस्मिन् विषये सौकर्येण जीवनस्य वास्तविकस्थितीनाम् उपयोगः अवगमनं वा अत्र जायते। उच्यते यत् बालाः दृढानुभवानाम् आधारेण समीचीनतया विषयम् अवगच्छन्ति। माध्यमिक-शालायाः बालाः यान् कुटुम्बीय-सामाजिकान् अनुभवान् कक्ष्यां प्रति आनयन्ति तेभ्यः निर्मिताः सामग्र्यः अस्य विषयस्य शिक्षणे उपयुक्ताः। अतः तादृश्याः सामग्र्याः एव प्रयोगः अत्र कृतः अस्ति। भारतस्य संविधानस्य मूल्यानाम् अनुरूपम् एतेषु विषयेषु तार्किक-अवगमनाय तथा च एतेषां विश्लेषणाय छात्रेषु क्षमतायाः विकासकरणम् अपि 'सामाजिक-राजनैतिक-जीवनस्य' लक्ष्यम् अस्ति।

एतस्मिन् पुस्तके प्रयुक्तकथानकेषु ग्राम्योदाहरणानि नागरोदाहरणानि च सन्ति।

शिक्षणस्य अस्यां पद्धतौ परिभाषाणां यः उपयोगः विभिन्नावधारणाः अवगन्तुं भवति तादृशीनां परिभाषाणाम् उपयोगः अत्र नैव कृतः अस्ति। परिभाषाणां स्थाने वृत्तान्तानां समस्याध्यायानां च प्रयोगः कृतः अस्ति। वृत्तान्तेषु अन्तर्निहितानाम् अवधारणानां स्पष्टीकरणाय पाठमध्ये पाठान्ते च प्रदत्ताः प्रश्नाः सहायकाः भवन्ति। लक्ष्यम् एतदेव अस्ति यत् अध्येतारः स्वस्य अनुभवाधारेण अवधारणाः अवगच्छेयुः अपि च अवधारणानां विषये स्वस्य शब्दैः लिखेयुः इति।

बहुधा एतस्य अर्थः समागच्छति यत् पृष्टानां प्रश्नानां किमपि एकमेव समाचीनम् उत्तरं भवितुं न शक्नुयात् इति। किमपि उत्तरम् निश्चयेन असमीचीनं भवितुं शक्नोति। शिक्षकेण एतस्य मूल्याङ्कनं करणीयं यत् छात्रेण यत् उत्तरं प्रदत्तं तत् कियत् प्रतिशतं पाठस्य अवधारणायाः विषये बालानाम् अवबोधनं प्रदर्शयति।

वयं जानीमः यत् बालाः स्वस्य अवगमनस्य तथा च स्वमनसि समागतानाम् अवधारणानां स्वपरिवेशस्य वास्तविकतया सह सामञ्जस्यं कृत्वा समीचीनतया अवगच्छन्ति। तदा किं एतत् सम्भविष्यति यत् राष्ट्रियस्तरस्य अस्माकम् एतत् पाठ्यपुस्तकं भिन्न-भिन्न-स्थानीयस्थितीनां कृते, यन्मिलित्वा अस्माकं राष्ट्रं निर्मितं, समीचीनतया स्थानं प्रदातुं शक्येत ?

राजनैतिक-सामाजिक-जीवनस्य च विषयवस्तूनि अनेकेषां समुदायानां विशेषरूपेण नाम गृहीतम् अस्ति। यथा दलित-यवन-निर्धनादीनाम्। अध्यापकाः पाठनकाले विद्यार्थिनां गरिम्णः स्वाभिमानस्य च क्षतिः न स्यात् इति विषये सावधानाः स्युः, यतो हि अत्र विविधसमुदायान् अधिकृत्य चर्चा कृता अस्ति। अतः एतस्मिन् विषये शिक्षकाः वचनबद्धाः भवन्तु यत् ते सर्वेषां सम्माननस्य विषये अवधानं यच्छन्ति।

इदं पुस्तकं शिक्षणस्य अस्मिन् सिद्धान्ते सज्जीकृतम् अस्ति यत् बालाः स्वपरिवेशीयानुभवैः स्वचिन्तनेन च अवधारणाः अर्थात् विषयान् समीचीनतया अवगच्छन्ति । अस्मात् काचित् विसङ्गतिः समुद्भवति यत् राष्ट्रियस्तरे रचिताः पाठाः न तु विभिन्नस्थानीयस्थितीनां विषयाणां प्रतिनिधित्वं कर्तुं शक्नुवन्ति न च एतत् मत्वा लेखितुं शक्यन्ते यत् एते पाठाः कस्याश्चित् विशिष्ट-सामाजिक-सांस्कृतिक-पृष्ठभूमेः बालान् सम्बोधयन्ति इति। अतः सामाजिकराजनैतिकजीवने प्रस्तुत-उदाहरणानि वृत्तान्ताः च ग्रामीणनागरपरिवेशानां मिश्रितरूपेण सन्ति। अतः अध्येतुः कापि स्पष्टा छविः निर्मिता न भवति।

कक्षायाम् अध्यापकाः अध्यायानां पाठनक्रियां समुचितरूपेण कुर्युः इति तु तेभ्यः अपेक्षा अस्त्येव इतोऽपि का अपेक्षा अध्यापकेभ्यः अस्ति ?

अस्मिन् पुस्तके वर्णिताः ये अध्यायाः तत्रापि ये विषयाः वर्णिताः चर्चिताः च सन्ति ते दलितानां निर्धनानां यवनानां च विषये चर्चां कुर्वन्ति एते समुदायाः तत्र विषयरूपेण वर्णिताः सन्ति अतः अध्यापनकाले वातावरणम् असहजं न स्यात् इति शिक्षकेण तत्र चिन्तनीयम् अस्ति अतः पूर्णप्रतिबद्धतया एतादृश्याः सामग्र्याः कक्ष्यायां चर्चा भवेत् । अपरञ्च इयम् अपेक्षा अपि अस्ति यत् इदं पुस्तकं राष्ट्रियस्तरस्य अस्ति अतः अत्र स्थानीयसन्दर्भैः सह सम्बद्धता न्यूना एव स्यात् अतः पुस्तकलेखकानां यत् उद्देश्यम् अस्ति तत् अभिलक्ष्य शिक्षकः प्रयासं कुर्यात् यत् स्थानीयोदाहरणानि तेन विधिना प्रस्तुतं कुर्यात् येन तर्काणाम् अवगमनं भवेत्।

अयं विषयः संविधाने प्रदत्तानि मान्यमूल्यानि आत्मसात्कर्तुं कथं साहाय्यं करोति ?

प्रथमदृष्ट्या कश्चित् ऊहितुं शक्नोति यत् वास्तविकस्थितीनाम् उल्लेखेन संविधानशिक्षणस्य यत् उद्देश्यम् अस्ति तेन सह एतासां स्थितीनां विरोधाभासः जायते । अद्यावधि नागरिकशास्त्रस्य यानि पुस्तकानि सन्ति तेषां समीक्षणेन अस्माभिः एतत् अभिज्ञातं यत् तानि सर्वाणि संविधानं शिक्षयितुम् एव रचितानि सन्ति अपि च तानि वास्तविकतथ्यानां कृते अल्पं स्थानं यच्छन्ति स्म । अतः अस्माभिः अत्र पृथक्प्रयासः कृतः, बालकाः वास्तविक-जीवनाधारित-तथ्यानि आधिक्येन जानन्ति अतः ते सामाजिकराजनैतिकजीवनस्य विषये विशेषतया अवगच्छेयुः, अतः एतादृशः प्रयासः क्रियते । बालाः जनानां सङ्घर्षम् अपि जानीयुः यत् कुप्रथाः दूरीकर्तुं कथं ते संघर्षं कृतवन्तः तेषां समाजपरिष्कारक-समाजसेवि-जनानां च भूमिकायाः विषये अपि बालाः अवगच्छेयुः इति।

सप्तमकक्ष्यायाः पुस्तके के के विषयाः वर्णिताः सन्ति ?

भारतीयलोकतन्त्रे समानता इति विषयं छात्राः जानन्तु इति एव पुस्तकस्य मूलसूत्रम् अस्ति । इदं सूत्रं पुस्तकस्य कस्यचित् घट्टस्य विषयवस्तु अपि अस्ति । एतद् अतिरिक्त्य पुस्तके चत्वाराः घट्टाः सन्ति राज्यशासनम्, लिङ्गम्, संचारमाध्यमानि, विज्ञापनानि विपणिः च । प्रत्येकं घट्टे

पाठक्रमद्वयम् अस्ति। परन्तु प्रथमे घट्टे एकः पाठः आदौ अपि च एकः पाठः पुस्तकस्य अन्तिमपाठरूपेण स्थापितः अस्ति।

सप्तमकक्षायाः पुस्तकं चितविषयान् प्रस्तौतुं कान् उपायान् स्वीकरोति ?

चित्रकथापट्टम् - गतवर्षे पुस्तकानाम् उपरि परामर्शः आगतः आसीत् यत् शिक्षकाः अध्यायस्य कथायुक्तांशान् पृथक् कर्तुम् काठिन्यस्य अनुभवं कुर्वन्ति अतः तत्र साहाय्यस्य आवश्यकता अस्ति । अतः अधुना कथायुक्तस्थलानि स्पष्टीकर्तुं चित्रकथायाः प्रयोगः कृतः अस्ति। छात्राः चित्राणां सजीवप्रस्तुतीकरणेन विषयान् गभीरतया ज्ञातुं समर्थाः भविष्यन्ति । चित्रकथापट्टे चर्चितविषयाणां विश्लेषणेन सह एव पाठ्यांशेषु अवधानं कृतम् अस्ति।

शिक्षकाणां कृते पृष्ठम् – प्रत्येकं घट्टः शिक्षकाणां कृते लिखितपृष्ठतः आरभते । अत्र द्वयोः अध्याययोः चर्चिताः मुख्यविषयाः वर्णिताः सन्ति।

मूल्यांकने कश्चित् आलेखः – षष्ठकक्ष्यायां परिभाषाः अथवा अवधारणानां सङ्क्षेपः प्रदत्तः आसीत्। अस्य वर्षस्य पुस्तके तत् न दीयते । अस्मात् छात्राः अध्यापकाः च काठिन्यम् अनुभवितुं शक्नुवन्ति बालाः किं जानीयुः का च अपेक्षा तेभ्यः स्यात् तैः किं शिक्षितम् इति विषयस्य मूल्याङ्कनं कथं स्यात् एतेषु सर्वेषु विषयेषु शिक्षकाः गभीरतया चिन्तयेयुः। अस्य भूमिकायाः अन्ते मूल्याङ्कनस्य पद्धतीनाम् उपरि कश्चित् सङ्क्षिप्तः आलेखः अस्ति । वयम् आशां कुर्मः यत् अनेन साहाय्येन छात्राः रटनाभ्यासतः मुक्तिं प्राप्स्यन्ति।

शब्दसङ्कलनम् – प्रत्येकस्मिन् अध्याये कस्यचित् लघुशब्दसङ्कलनम् अस्ति यस्मात् पाठे उपयुक्तभाषायां स्पष्टता भवेत् । एतस्मिन् सङ्कलने केवलम् अवधारणाः सम्मिलिताः न सन्ति परन्तु शब्दानाम् अर्थाः अपि सन्ति एतेषां कण्ठस्थीकरणं न स्यात् तेषाम् अवगमनं स्यात्।

मध्यस्थाः अन्तस्थाः च प्रश्नाः – षष्ठकक्ष्यायाः पुस्तकस्य इव सप्तमकक्ष्यायाः पुस्तके अपि अध्यायानाम् अन्ते प्रश्नाः

प्रदत्ताः सन्ति यत्र च चित्र-कथानुभवानां च विषयवस्तु आधारभूतम् अस्ति। अध्यायस्य मध्ये ये प्रश्नाः प्रदत्ताः सन्ति तेषां माध्यमेन शिक्षकाः एतत् अपि ज्ञातुं शक्नुवन्ति यत् विद्यार्थिनः विषयवस्तु केन रूपेण गृहीतवन्तः।

अध्यायस्य अन्ते ये प्रश्नाः सन्ति ते तु अध्यायस्य मुख्यविषयम् आधृत्य सन्ति छात्राः अध्यापकेन स्वशब्दैः तत्र बोधनीयाः इति अपेक्षा अस्ति।

मूल्याङ्कन-प्रक्रियायां शिक्षकाणां साहाय्यार्थं केचन विचाराः

छात्रैः यद् अवगतम् अस्ति तस्य मूल्याङ्कनस्य उपायानां विषये आदितः चिन्तनं किञ्चित् कठिनं कार्यं भवति, परन्तु एतस्य नूतनविषयस्य कृते एतस्य आवश्यकता अस्ति। कालक्रमेण एषा परम्परा जाता अस्ति यत् सुप्रकारेण ये छात्राः रटितुं पारयन्ति ते आधिक्येन सफलीकरणीयाः। परिणामतः स्वतः एव शिक्षकाः पाठे प्रदत्तप्रश्नानाम् उत्तराणि रेखाङ्कितानि कृत्वा चिह्नीकरणे संलग्नाः सन्ति अपि च किमपि दुश्चक्रं चलति यत् आद्यवधि प्रवर्तते। अद्य एतस्य विषयस्य आवश्यकता अस्ति यत् शिक्षकाः प्रशिक्षणार्थिनः च रटनात् मुक्ताः भवेयुः अपि च रटनरूपिणः एतस्य दुश्चक्रस्य समाप्तिः स्यात्। आशासे एतस्मिन् परिवर्तनक्रमे शिक्षकाः स्वकीयां महत्त्वपूर्णां भूमिकां निर्वक्ष्यन्ति अपि च अनेन आलेखेन ते साहाय्यं प्राप्स्यन्ति।

प्रश्नेषु

शिक्षकैः अनेन विषयेण आरम्भः करणीयः स्यात् यत् मूल्याङ्कनाय नूतनप्रश्नानाम् उपयोगः भवेत्। एते नूतनाः प्रश्नाः अध्याये प्रदत्तप्रश्नैः सह साम्यं भजेयुः। परन्तु छात्रेभ्यः इयम् अपेक्षा भविष्यति यत् ते प्रश्नानाम् उत्तराणि स्वशब्दैः लिखन्तु। एतत्कृते छात्राणाम् आत्मविश्वासस्य वर्धनं स्यात् अतः भाषागतशुद्धतादीनां कृते टीकाः टिप्पण्यः च सन्तुलितरूपेण सकारात्मकरूपेण च करणीयाः भविष्यन्ति।

विविधयोग्यतानां संवर्धनाय आकलनाय च शिक्षकैः विविधानां प्रश्नानां विकासः करणीयः भविष्यति। स्मृत्याः आश्रयेण तथ्यानि आवर्तितुं ये प्रश्नाः भवन्ति ते न्यूनमात्रया तत्र स्थापनीयाः स्युः। अनेन आधारेण एतादृशाः प्रश्नाः आधिक्येन भवेयुः ये प्रत्येकम् अध्यायस्य मुख्य-अवधारणात्मकविचारैः सम्बद्धाः भवेयुः। केचन तादृशाः प्रश्नाः भवेयुः यैः तर्कक्षमतायाः वर्धनं स्यात् अपि च यैः अनुभवानां मध्ये समानतायाः अवगमने साहाय्यं स्यात् अपि च अन्तरस्य ज्ञानम् अपि भवेत् ऊहाक्षमतायाः अपि विकासः स्यात्। एतान् परामर्शान् स्पष्टीकर्तुम् अत्र कानिचन उदाहरणानि प्रस्तूयन्ते।

तर्कस्य क्षमता

निम्नलिखित-प्रश्नाः एनं विषयम् आकलयितुं साहाय्यं कुर्वन्ति यत् प्रशिक्षार्थिनः अध्यायस्य अवधारणाः कियता परिमाणेन अवगतवन्तः। अपि च तेषु निहितविचारान् स्वशब्देषु अभिव्यक्तुम् अपि च नूतनसन्दर्भेषु क्रियान्वयितुं ते कथं सक्षमाः सन्ति यथा –

अधिनियमस्य दृष्ट्यां सर्वे जनाः समानाः सन्ति अनेन कथनेन भवन्तः किम् अवगच्छन्ति ? भवतां विचारेण इदं लोकतन्त्रे महत्त्वपूर्णं किमर्थम् अस्ति ?

मुख्यमन्त्रिणा अन्यैः मन्त्रिभिः च स्वीकृतनिर्णयेषु विधानसभायां विचारः चर्चा वा किमर्थं भवेत् ?

किं भवन्तः तादृशौ द्वौ उपायौ ज्ञापयितुं शक्नुवन्ति येषां माध्यमेन भवन्तः चिन्तयन्ति यत् विज्ञापनस्य प्रभावः लोकतन्त्रे समानतायाः विषये भवति ?

भवन्तः किम् अनुभवन्ति, भवतां ग्रामस्य आपणे वस्तूनि कथम् आयान्ति ? ज्ञापयन्तु अपि च कानिचन उदाहरणानि ज्ञापयन्तु।

अनुभवानां मध्ये समानताः अन्तराणि च परिचिन्वन्तु

एतादृशाः प्रश्नाः बोधनीयाः येषां शिक्षकाः दृढस्थितीनाम् उदाहरणानां च तुलनां कुर्वन्तः अन्तरस्पष्टीकरणस्य समानतायाः स्पष्टीकरणस्य च अवसरान् यच्छेयुः। एतादृशाः प्रश्नाः प्रायः बालस्य निजानुभवान् तोलयितुम् अपेक्षन्ते। एतादृशानां प्रश्नानां कानिचन उदाहरणानि अनेन प्रकारेण सन्ति –

विधानसभा-सदस्यद्वारा विधायिकाद्वारा कृतकार्याणां शासकीयविभागैः च कृतानां कार्याणां मध्ये किम् अन्तरम् अस्ति ?

भवतां ज्येष्ठत्वस्य अनुभवाः समोआ इति देशस्य बालानां किशोराणां च अनुभवैः कथं भिन्नाः सन्ति? एतेषु अनुभवेषु वर्णितं किञ्चित् एतादृशं तथ्यम् अस्ति यत् भवन्तः स्वस्य ज्येष्ठत्वस्य अनुभवे सम्मेलयितुम् एषिष्यन्ति ?

वस्त्रोद्योगगृहस्य श्रमिकाः वस्त्रनिर्यातकाः वैदेशिकवणिजः च प्रत्येकं युतके कियत् धनम् अर्जितवन्तः अथवा लाभांशं प्राप्तवन्तः? तुलनां कृत्वा जानन्तु।

भवन्तः स्वक्षेत्रेषु उपलब्धासु सार्वजनिक-निजस्वास्थ्यसेवयोः मध्ये च कानि कानि अन्तराणि पश्यन्ति? अधोलिखितां तालिकां पूरयन् एतस्याः तुलनां कुर्वन्तु अपि च अन्तरं ज्ञापयन्तु।

सौविध्यानि	सेवानां मूल्यम्	सेवानाम् उपलब्धता
निजी		
सार्वजनिकी		

कस्याश्चित् स्थितेः विवरणात् निष्कर्षस्य अवगमनम् अनुमानं च

एतादृशाः प्रश्नाः सामाजिकराजनैतिकजीवनाय विशिष्टं महत्त्वं दधति यतो हि एतस्मिन् विषये कथानकानां वृत्तान्तानां च महता स्तरेण उपयोगः अभवत् अपि च बालस्य दृढानुभवानाम् अपि कथनम् अत्र कृतम् अस्ति । एते एव प्रश्नाः सन्ति ये वृत्तान्तान् तेषु निहितैः अवधारणात्मकैः विचारैः बालान् योजयन्ति । प्रश्नानां साहाय्येन वयम् आकलयितुं शक्नुमः यत् प्रशिक्षणार्थिनः केन प्रकारेण वृत्तान्तान् अवगतवन्तः सन्ति अपि च ते सम्बन्धिताः अवधारणाः कथं स्पष्टीकर्तुं पारयामः।

भवतां विचारेण ओमप्रकाशवाल्मीकिना सह तस्य शिक्षकाः सहपाठिनः च असमानतायाः व्यवहारं किमर्थम् अकुर्वन्? आत्मानम् ओमप्रकाशवाल्मीकेः स्थाने स्थापयन्तः पङ्क्तिचतुष्टयं लिखन्तु यत् उक्तस्थितौ भवन्तः कथम् अनुभवेयुः?

किं हरमीतस्य सोनाल्याः च इदं कथनम् उचितम् आसीत् यत् हरमीतस्य अम्बा कार्यं न करोति?

भारते प्रायः इदम् उच्यते यत् वयं स्वास्थ्यसेवाः प्रदातुम् असमर्थाः स्मः, यतो हि सर्वकारस्य पार्श्वे एतदर्थं पर्याप्तं धनं सौविध्यानि च न सन्ति। उपरि वामतः प्रदत्तस्य स्तम्भस्य अध्ययनस्य पश्चात् किं भवन्तः एनं समीचीनं मन्यन्ते? चर्चयन्तु।

इदं विज्ञापनम् अस्मान् एतस्य समूहस्य वस्तूनां क्रयणे सति किम् अनुभावयति? इदं विज्ञापनं कीदृशैः जनैः सह संवादं कारयति अपि च कीदृशेषु जनेषु अवधानं न करोति?

दृश्य-सामग्र्याः व्याख्यानम्

अनेन एव प्रकारेण छात्राणां पुरतः दृश्यसामग्र्याः अध्ययनस्य तस्याः व्याख्यानस्य च अपि अवसराः भवेयुः। चित्राधारिताः तालिकाधारिताः रेखाचित्राधारिताः च प्रश्नाः प्रष्टव्याः ।

१. चित्रं पश्यन्तु अपि च तस्य बालस्य विषये चिन्तयन्तु, यः सोपानैः अधः आनीयते । किं भवन्तः अनुभवन्ति यत् एतस्याम् अवस्थायां विकलाङ्गतायाः अधिनियमस्य क्रियान्वयनं क्रियते ? सः भवनं सरलतया आगच्छेत्, तदर्थं किम् आवश्यकम् अस्ति? तम् उत्थाप्य सोपानैः अवतारणं किं तस्य सम्माननं सुरक्षां च प्रभावयति?

२. किं भवन्तः एतस्मै रेखाचित्राय शीर्षकं दातुं शक्नुवन्ति? अनेन रेखाचित्रेण भवन्तः सञ्चारमाध्यमस्य व्यापकवाणिज्यस्य च मध्ये परस्परं सम्बन्धम् अवगन्तुं समर्थाः प्रभवन्ति?

१. अधः प्रदत्ते युतकस्य चित्रे दर्शितम् अस्ति यत् व्यवसायी कियन्तं लाभांशं प्राप्नोत् अथ च सः कियन्तं व्ययम् अकरोत्। यदि युतकस्य युक्तराशिः ६००रुप्यकाणि सन्ति तर्हि एतेन चित्रेण जानन्तु यत् एतस्य युतकस्य मूल्ये किं किं सम्मिलितम् अस्ति?

उत्तराणाम् अवगमनम्

अपरञ्च विद्यार्थिभ्यः इयम् अपेक्षा क्रियते यत् ते स्वशब्देषु उत्तराणि लेखिष्यन्ति, शिक्षकैः इयम् अपेक्षा न कर्तव्या यत् विद्यार्थिनः तैः अभीष्टानि मन्यमानानि उत्तराणि न यच्छेयुः। अस्माभिः इदं मूल्याङ्कनं करणीयं यत् प्रशिक्षार्थिनः काः अवधारणाः अवागच्छन्, तासाम् अवधारणानाम् आधारेण ते कीदृशान् तर्कान् कुर्वन्ति अथ च स्वमनसि जायमानान् विचारान् कथं ते अभिव्यञ्जन्ति । यदा शिक्षार्थिभ्यः इयम् अपेक्षा क्रियते यत् ते कस्मिंश्चित् वृत्तान्ते प्रस्तुतस्थितिम् अवगच्छेयुः अपि च तस्यां निहितावधारणायाः निजविश्लेषणे उपयोगं कुर्युः तर्हि स्वाभाविकरूपेण इयमेव अपेक्षा भविष्यति यत् तेषां पक्षतः आगम्यमानानां विभिन्नानाम् उत्तराणां काञ्चित् सीमां यावत् उत्तररूपेण स्वीकृतिः स्यात् ।

अतः एतद् अत्यन्तम् आवश्यकं भवति यत् शिक्षकाः मिलित्वा सामूहिकरूपेण मूल्याङ्कनाय कांश्चन समाननिर्देशान् सज्जीकुर्युः यतः ते सर्वे शिक्षकाः समानाधारेषु निश्चिन्वन्तु यत् कीदृशानि उत्तराणि समीचीनोत्तराणां परिसीम्नि आयन्ति, कानि कानि च उत्तराणि असमीचीनानि मंस्यन्ते । वयम् अत्र कानिचन उदाहरणानि दत्त्वा स्पष्टीकुर्मः यत् कस्यचित् प्रश्नस्य उत्तरे समीचीनोत्तराणां परिसीम्नि कः आशयः अस्ति अथ च असमीचीनोत्तराणि कानि कथयितुं शक्यन्ते ।

यदि भवान् अंसारीपरिवारस्य कश्चित् सदस्यः स्यात्,तर्हि सम्पत्तिविक्रेत्रा नामपरिवर्तनस्य यः परामर्शः दत्तः तस्य उत्तरं कथं दद्यात्?

समीचीन-उत्तराणां काचित् सीमा

उत्तराणि	समीक्षा
"यदि अहम् अंसारीपरिवारस्य सदस्या अभविष्यं तर्हि निश्चितम् अकरिष्यं यत् स्वनाम न पर्यवर्तिष्यं यतो हि अनेन परिवर्तनेन मम गरिम्णः आत्मसम्मानस्य च हानिः अभविष्यत्।"	इदं सङ्क्षिप्तं स्पष्टं च उत्तरम् अस्ति अपि च इङ्गितं करोति यत् बालिका विषयम् अवगतवती अथ च स्वविचारान् अभिव्यङ्क्तुं शक्नोति।
"अहम् अन्सारी अभविष्यं तर्हि स्वनाम न पर्यवर्तिष्यं यतो हि अस्माकं परिवारस्य परम्पराभ्यः इदम् एव नाम अस्ति, अथ च यदि मया एतत् वक्तव्यम् अभविष्यत् यत् अहम् अन्यः अस्मि तर्हि अहम् असमीचीनम् अन्वभविष्यम्।"	अयं बालः अध्यायस्य शब्दानाम् उपयोगम् अवधारणाः अभिव्यङ्क्तुं न शक्नोति परन्तु तेन तेषाम् अर्थाः समीचीनतया गृहीताः अथ च सः विचारान् स्वशब्दैः निजानुभवैः अभ्यव्यक्तं कृतवान् ।
"अहं सम्पत्तिविक्रेतुः वार्ताम् अमंस्यम् अपि च स्वनाम पर्यवर्तिष्यम्। अहम् एतत् कार्यम् एतदर्थम् अकरिष्यम् यतो हि गृहस्य अन्वेषणं कुर्वती अहं श्रान्ता जाता। अहम् अनेन कृत्येन सन्तुष्टा तु नास्मि परन्तु वासाय किञ्चित् स्थानं तु मे स्यात्"।	प्रथमदृष्ट्या वयम् अनुभविष्यामः यत् एतत् उत्तरं तु असाधु उत्तरम् अस्ति यतो हि बाला सम्पत्तिविक्रेतुः परामर्शेन सहमता जायते। किन्तु यदा प्रश्ने अस्माभिः बालस्य परामर्शः पृष्टः अस्ति तर्हि सः परामर्शः द्वौ पक्षौ प्रति गन्तुं शक्नोति, कामं सः तर्कसङ्गतः भवेत्। निश्चयेन अयं तर्कसङ्गतः भवेत् । कामम् अत्र बालायाः उत्तरं यत् सा बाध्यतावशात् न इच्छन्ती अपि नामपरिवर्तनं करिष्यति एषा घटना विषयः वा एतत् दर्शयति यत् सा एतत्तथ्यम् अवगतवती यत् अंसारीदम्पत्योः गरिम्णः नाशस्य कोऽर्थः अस्ति।
असाधु उत्तरम् आम् अहं स्वनाम परिवर्तिष्ये । यतो हि तेन मम गरिमा वर्धिष्यते।	अयं प्रश्नः अध्यायस्य मानवीयगरिम्णः मूल्यम् इति भागात् पृष्टः अस्ति। छात्रः अंसारीवर्येण तस्य भार्यया च अनुभूतस्य भेदभावस्य गरिम्णः च धारणायाः च मध्ये समीचीनम् अन्तर्सम्बन्धं कल्पयितुं न शक्तवान् ।

मूल्याङ्कनस्य अन्ये उपायाः

अस्माभिः इयं भ्रान्तिः नाशनीया यत् परीक्षाः प्रशिक्षार्थिनां मूल्याङ्कनस्य सर्वेषु साधनेषु समीचीनतमं साधनम् अस्ति। एतस्मात् अपि महत्त्वपूर्णम् इदम् अस्ति यत् अस्माकम् उच्चकक्षासु मूल्याङ्कनपद्धतिषु ये परिष्काराः भवन्ति तेषां प्रभावस्य प्रतीक्षाम् अकृत्वा इदं द्रष्टव्यम् अस्ति यत् माध्यमिकस्तरीयाणां प्रशिक्षार्थिनां मूल्याङ्कनाय वयं कान् कान् वैकल्पिकोपायान् प्रयोक्तुं शक्नुमः। अनेके वैकल्पिकोपायाः उपयुज्य द्रष्टुं शक्यन्ते यथा –

१. **उद्धटित-पुस्तक-परीक्षा** – यथा नाम्ना एव ध्वन्यते यत् "उद्धटित-पुस्तकम्" काचित् प्रक्रिया अस्ति यस्यां विद्यार्थिनः प्रश्नानाम् उत्तराणि यच्छन्तः पुस्तकम् उद्घाट्य द्रष्टुं शक्नुवन्ति। अयम् अभ्यासः विद्यार्थिनः स्मरणस्य भारं विना उत्तराणि चेतुम् अवसरान् कल्पयति। विद्यार्थिनः उच्यन्ते यत् प्रश्नं मनसि निधाय ते पाठं वारद्वयं पठेयुः। परन्तु एतस्यै प्रक्रियायै नूतनप्रश्नानां निर्माणं अत्यावश्यकम् अस्ति। उद्धटित-पुस्तकीय-अभ्यासानां कृते एतादृशाः प्रश्नाः साधुतराः भवन्ति ये विद्यार्थिनाम् अनुमानक्षमतां सूचनायाः आधारेण अवगमयितुं प्रत्ययान् च अवगमयितुम् अवसरान् कल्पयन्ति। एतस्मिन् तथ्ये बलाघातः करणीयः यत् विद्यार्थिनः स्व-अवगमनस्य आधारेण स्वशब्दैः प्रश्नानाम् उत्तराणि यच्छन्तु।

२. **मौखिकविवेचनम् अवगमनं च -** कक्ष्यायां वार्तालापप्रसङ्गे बालाः कियतीम् अभिव्यक्तिं कुर्वन्ति। पुनरपि अस्माकं शिक्षाप्रणाली प्रायः एतां शैलीम् असमीचीनां मन्यते। स्वसहाध्यायिभ्यः शिक्षणस्य मौखिकाभिव्यक्तेः च वर्धापनस्य महती आवश्यकता अस्ति। मौखिकमूल्यांकनस्य अभ्यासाः एतादृशान् अवसरान् कल्पयन्ति येभ्यः मौखिक-अभिव्यक्तेः सहाध्यायिभ्यः च शिक्षणस्य अवसरः लभते। एतस्य पुस्तकस्य पाठेषु मध्ये मध्ये अनेके एतादृशाः प्रश्नाः सन्ति येषाम् उत्तरं मौखिकरूपेण दातुं शक्यते। अध्यापकेन इयं प्रक्रिया कक्ष्यायाम् एव प्रारब्धव्या।

३. **सामूहिकपरियोजनाकार्यम्** – सामूहिकपरियोजनाकार्यम् अपि विद्यार्थिनां मूल्याङ्कनस्य कश्चित् उपायः अस्ति। भित्तिपत्रसज्जीकरणस्य परियोजनायाः उदाहरणम् एतस्मिन् पुस्तके प्रदत्तम् अस्ति। अनया परियोजनया औचित्यपूर्णाः आशाः धारणीयाः अथ च ध्यातव्यं यत् विद्यार्थिनः स्वयं किं किं कर्तुं शक्नुवन्ति। परियोजना कक्ष्यायाम् एव भवेत्। सा गृहकार्यरूपेण न दातव्या। एतस्मिन् पुस्तके प्रदत्ताः प्रश्नाः परियोजनायां परिवर्तितुं शक्यन्ते।

एतत् तथ्यम् अस्ति यत् 'अधिगमं शिक्षणं वा निरन्तरं प्रचाल्यमाना प्रक्रिया अस्ति अपि च इयं प्रक्रिया अनेकैः उपायैः भवति' इति। मूल्याङ्कनस्य एते उपायाः एतस्य तथ्यस्य एव प्रेरणे साहाय्यं कुर्वन्ति। मूल्याङ्कनं तेन प्रकारेण भवेत् यस्मात् शिक्षणस्य विस्तारः स्यात्। मूल्याङ्कनं चयनप्रक्रियायाः रूपेण न भवेत्।

स्वपरामर्शान् अभिव्यक्तुम् अथ च कस्यचिद् अपि विषयस्य स्पष्टीकरणाय अस्मिन् पत्रसङ्केते लिखन्तु –
spl-ncert@hotmail.com

विषय-सूची

आमुखम् iii

शिक्षकाणां कृते काचित् भूमिका। ix

मूल्याङ्कने शिक्षकाणां साहाय्यर्थं केचन विचाराः। xii

प्रथमः घट्टः - भारतीयलोकतन्त्रे समानता ***2***

प्रथमोऽध्यायः - समानता 4

द्वितीयः घट्टः - राज्यसर्वकारः *16*

द्वितीयोऽध्यायः - स्वास्थ्ये सर्वकारस्य भूमिका। 18

तृतीयोऽध्यायः - राज्यशासनं कथं कार्यं करोति। 30

तृतीयः घट्टः - लिङ्गबोधः *42*

चतुर्थोऽध्यायः – बालक-बालिकारूपेण विकासः। 44

पञ्चमोऽध्यायः – महिलाभिः परिवर्तितः संसारः। 55

चतुर्थः घट्टः - संचारमाध्यमानि विज्ञापनानि च *70*

षष्ठोऽध्यायः – सञ्चार-माध्यमानां विषये अवगमनम् । 72

सप्तमोऽध्यायः - विज्ञापनानाम् अवगमनम्। 83

पञ्चमः घट्टः - विपणिः 95

अष्टमोऽध्यायः - अस्माकं पार्श्वस्थाः विपणयः। 97

नवमोऽध्यायः - विपण्याम् एकं युतकम्। 107

भारतीयलोकतन्त्रे समानता (अनुबद्धम्)

दशमोऽध्यायः – सामानतायै सङ्घर्षः। 117

सन्दर्भः 125

प्रथमः घट्टः

भारतीयलोकतन्त्रे समानता

शिक्षकाणां कृते

पुस्तकस्य अयं खण्डः भारतस्य विशिष्टेन सन्दर्भेण सह लोकतन्त्रे समानतायाः मुख्यभूमिकया सह विद्यार्थिनां परिचयं कारयति । भारतस्य संविधानं समस्तान् नागरान् समानतायाः कृते आश्वस्तं करोति । एतदतिरिच्य जनानां दैनन्दिनं जीवनं समानतातः बहुदूरे अस्ति । नागरिकशास्त्रस्य पूर्वतनानि पाठ्यपुस्तकानि समानतायाः चर्चासु संविधानस्य प्रावधानानि मात्रम् आवर्त्तयन्ति स्म परञ्च जनानां जीवनस्य वास्तविकस्थितौ पर्याप्तावधानं न कुर्वन्ति स्म । अयं घट्टः केनचित् भिन्नप्रकारेण समानतायाः चर्चां प्रस्तौति । विभिन्नसमुदायैः सह अद्यापि अनेकप्रकारेण असमानतायाः यः व्यवहारः क्रियते तैः समुदायैः च सः व्यवहारः सह्यते तेन माध्यमेन समानतायाः आवश्यकता अस्मिन् प्रस्तोष्यते ।

प्रथमः अध्यायः विद्यार्थिनः कान्तया ओमप्रकाशवाल्मीकिना अंसारीदम्पतीभ्यां च सह मेलयति । तैः विभिन्नेन प्रकारेण असमानतायाः अनुभवः कृतः । एतेषाम् अनुभवानां माध्यमेन वयं मानवीयगरिम्णः अवधारणायाः च परिचयं यच्छामः। असमानतां दूरीकर्तुम् आवश्यक-अधिनियमानां नीतीनां च निर्माणे सर्वकारस्य भूमिकायाः चर्चां वयम् एतदर्थं कुर्मः यत् वर्तमानानाम् असमानतानाम् अपाकरणस्य प्रतिबद्धता सर्वकारस्य कार्यस्य कश्चन महान् भागः अस्ति ।

अस्मिन् अध्याये वयं संक्षिप्तरूपेण संयुक्तराज्य-अमेरिकायाम् असमानतायाः कीदृशी स्थितिः अस्ति इति विषयम् अपि पश्यामः तथा च स्पष्टीकुर्मः यत् असमानता कश्चन विश्वव्यापी विषयः अस्ति तथा च अनेकेषु लोकतान्त्रिकदेशेषु दृश्यते । अस्य घट्टस्य अपरः अध्यायः एतस्य पुस्तकस्य दशमः पाठः अस्ति । पुस्तके समानताम् आधारीकृत्य स्थाने स्थाने प्रकटिताः प्रमुखाः विचाराः अस्मिन् अन्तिमे अध्याये सहैव उपनिबद्धाः सन्ति । अस्य अध्यायस्य महान् अंशः समानतायाः सङ्घर्षे विभिन्नैः जनैः कृतस्य योगदानस्य चर्चां करोति । एतस्मिन् उदाहरणरूपेण कस्मिंश्चित् सामाजिके आन्दोलने विशेषत्वेन अवधानं कृतं तथा च तेन सह एव ते रचनात्मकाः उपायाः अपि प्रकटीकृताः यथा लेखनं गीतं कविताः च) येषां माध्यमेन जनाः समानतायाः अभ्यर्थनां व्यक्तीकुर्वन्ति ।

एतयोः द्वयोः एव अध्याययोः उद्देश्यम् इदम् अस्ति यत् विद्यार्थिनः जानीयुः यत् समानतायाः लोकतन्त्रस्य च अवधारणाः गतिशीलाः सन्ति स्थिराः न सन्ति । एतेषां गतिमयता एतेन विषयेण एव अवलोक्यते यत् सर्वकारः समानतायाः कृते नूतनान् अधिनियमान् रचयितुं तथा च कार्यक्रमान् सञ्चालयितुं बाध्यः अस्ति तथा च विभिन्नेषु आर्थिकेषु सामाजिकेषु च विषयेषु जनाः आन्दोलनानि कुर्वन्ति ।

कान्तायाः ओमप्रकाशस्य अंसारीदम्पत्योः तथा च तवामत्स्यसङ्घस्य अनुभवानाम् इव विभिन्नाः स्थानीयाः अनुभवाः प्रत्येकं स्थाने विद्यमानाः स्युः । एतस्मिन् घट्टे निहिताः अवधारणाः विद्यार्थिनां कृते अधिकप्रासङ्गिकीः व्यवहारिकीः उपयुक्ताः च कर्तुं स्थानीयस्थितीनां विवरणं देयम् ।

कक्ष्यायां समानतायाः विषये चर्चा यदा भवेत् तदा शिक्षकः संवेदनशीलः प्रतिबद्धतायुक्तः च भवेत् इति काम्यते यतः प्रत्येकं विद्यार्थिनः गरिम्णः हानिः न भवेत् ।

अध्यायः 1



समानता

भारतं लोकतान्त्रिकदेशः अस्ति । षष्ठकक्षायाः पुस्तके वयं लोकतान्त्रिकसर्वकारस्य मुख्य-तत्त्वानां विषये पठितवन्तः यथा जनानां सहभागिता, सङ्घर्षाणां शान्तिपूर्णं समाधानं, समानताः न्यायः च । समानता लोकतन्त्रस्य मुख्यविशेषता अस्ति तथा च एतस्याः कार्यप्रणाली सर्वान् पक्षान् प्रभावयति । एतस्मिन् अध्याये भवन्तः समानतायाः विषये इतोऽपि आधिक्येन ज्ञास्यन्ति इयं का अस्ति ? लोकतन्त्रस्य कृते इयं किमर्थम् आवश्यकी अस्ति तथा च भारते सर्वे समानाः सन्ति उत न । वयं कान्तायाः कथया चर्चायाः आरम्भं कुर्मः।



किञ्चिद् कालानन्तरम.....





गृहे



मताधिकारस्य समानता

यदा कान्ता मतदानस्य कृते पङ्क्तौ स्थिता आसीत् तत: कथाया: प्रारम्भ: जायते। पुन: तान् विभिन्नान् जनान् प्रति पश्यन्तु ये तया सह पङ्क्तौ स्थिता: सन्ति । कान्ता स्वकीयं स्वामिनं जैनमहोदयं परिचिनोति तथा च स्वप्रतिवेशिनं छोटेलालम् अपि । भारतसदृशे लोकतान्त्रिके देशे सर्वेषां वयस्कानां कृते मतदानस्य अधिकार: अस्ति तेषां कोऽपि धर्म: स्यात् तथा च शिक्षाया: जाते: च स्तर: कीदृश: अपि वा स्यात्, ते धनिका: स्यु: अथवा निर्धना:। एतद् एव यथा भवन्त: गतवर्षस्य पाठ्यपुस्तके पठितवन्त: सन्ति सार्वभौमिक-वयस्क-मताधिकार: उच्यते तथा च एष: अपि लोकतन्त्रप्रणाल्या: आवश्यकपक्ष: अस्ति । सार्वभौमिक-वयस्क-मताधिकारस्य विचार: समानताया: विचारे आधारित: अस्ति यतोहि एष: विचार: उद्घोषयति यत् देशस्य प्रत्येकं वयस्कस्त्रीपुरुषौ, तस्य तस्या: वा आर्थिकस्तर: अथवा जाति: कीदृशी अपि स्यात् स: मतदानस्य अधिकारी अस्ति । कान्ता मतदानं कर्तुं बहुव्यग्रा अस्ति तथा च इदं दृष्ट्वा बहुप्रसन्ना अस्ति यत् सा अन्यै: सर्वै: तुल्या वर्तते यतोहि तेषां सर्वेषां पार्श्वे अपि समानरूपेण एव मतदानस्य अधिकार: अस्ति ।

परन्तु यथा यथा दिनं व्यतीतं भवति कान्ताया: मनसि समानताया: वास्तविकार्थस्य विषये शङ्का जायते ।

इदं किं तथ्यम् अस्ति यत: कान्ताया: मनसि शङ्का अजायत ? आगच्छन्तु, तस्या: जीवनस्य दिनचर्यां पश्याम: सा एकस्मिन् कुटीरे निवसति तथा च तस्या: गृहस्य पृष्ठे एका कुल्या अस्ति । तस्या: पुत्री रुग्णा अस्ति परन्तु सा स्वकार्यत: एकस्य दिनस्य अपि अवकाशं स्वीकर्तुं न शक्नोति यतोहि सा स्वस्वामित: बालिकाया: चिकित्साया: कृते धनं ऋणरूपेण स्वीकर्तुम् इच्छति । परगृहेषु भृत्यताकरणेन सा श्रान्ता भवति । तथा च अन्तत: सा दिनस्य समाप्तौ अपि दीर्घतमायां पङ्क्तौ स्थिता अस्ति । सर्वकारीय-चिकित्सालयस्य पुर: स्थिता इयं पङ्क्ति: तस्या: पङ्क्ते: भिन्ना अस्ति यस्यां सा प्रात:काले स्थिता आसीत्, यतोहि एतस्यां पङ्क्तौ स्थिता: अधिकतरा: जना: निर्धना: आसन्।

भवतां विचारेण समानताया: विषये शङ्कां कर्तुं कान्ताया: पार्श्वे कानि पर्याप्तानि कारणानि सन्ति ? उपर्युक्तकथाया: आधारेण तस्या: एतादृशस्य चिन्तनस्य त्रीणि कारणानि ज्ञापयन्तु।

अन्यप्रकाराः असमानताः

कान्ता तेषु बहुषु जनेषु काचित् वर्तते ये भारतीयलोकतन्त्रे निवसन्ति तथा च ये मताधिकारं प्राप्तवन्तः परन्तु येषां दैनन्दिनजीवनं कार्यकरणस्य च परिस्थितयः समानतातः बहुदूरे सन्ति । निर्धनताम् अतिरिच्य भारते जनाः बहुभिः इतरैः कारणैः असमानतायाः सम्मुखीकरणं कर्तुं बाध्याः सन्ति । एतस्य अभिप्रायं वयं निम्नलिखिते द्वे कथे पठित्वा ज्ञास्यामः । एते द्वे अपि वास्तविक-घटनासु आधारिते स्तः तथा च भारते विद्यमानासु विभिन्नासु असमानतासु प्रकाशं निपातयतः।

भारते सामान्यतः प्रचलितासु असमानतासु एका अस्ति जातिगत-व्यवस्था । यदि भवन्तः ग्रामीणभारते निवसन्ति तर्हि जातिगत-परिचयस्य अनुभवः प्रायः अल्पायुषि एव जायते । यदि भवन्तः भारतस्य नागरक्षेत्रे निवसन्ति तर्हि प्रायः भवताम् इदं चिन्तनं स्यात् यत् अधुना जनाः जात्याधारित-व्यवस्थायां न विश्वसन्ति । परन्तु किञ्चित् कस्यचित् प्रमुखस्य समाचारपत्रस्य वैवाहिक-विज्ञापनस्य भागं पश्यन्तु तदा भवन्तः ज्ञास्यन्ति यत् उच्चशिक्षाप्राप्त-भारतीयस्य मस्तिष्के अपि जातिः कियती महत्त्वपूर्णा अस्ति ।

आगच्छन्तु अधुना काञ्चित् कथां जानीमः या विद्यालयगन्तुः कस्यचित् दलितबालकस्य अनुभवानां विषये वर्तते । दलितानां विषये भवन्तः पूर्वम् एव गतवर्षस्य पुस्तके पठितवन्तः । दलितः कश्चित् एतादृशः शब्दः अस्ति यं शब्दं निम्नजातिवर्गस्य जनाः आत्मानं सम्बोधयितुं प्रयोगं कुर्वन्ति । दलितस्य अर्थः भवति - भिन्नः अथवा छिन्नः तथा च एतस्य शब्दस्य प्रयोगं कृत्वा दलिताः एतं सङ्केतं कुर्वन्ति यत् पूर्वम् अपि तैः सह महाभेदभावस्य व्यवहारः भवति स्म तथा च अद्यापि भवति ।

ओमप्रकाशवाल्मीकिः कश्चित् सुप्रसिद्धः दलितलेखकः अस्ति । स्वात्मकथायां ***जूठन*** इत्यस्यां सः लिखति यत् विद्यालये अन्येभ्यः दूरे उपवेष्टुं वयं बाध्याः आस्म तदपि भूमौ । अस्माकम् आसनस्य यत् स्थानम् आसीत् तत्र पर्यन्तं कटः न प्राप्नोति स्म । कदाचित् तु अस्माभिः पूर्णतया द्वारस्य पार्श्वे उपवेष्टव्यं भवति स्म यतः कृष्णफलके लिखितानि अक्षराणि अपि स्पष्टतया न दृश्यन्ते स्म । कदाचित् अकारणम् एव ताडनं भवति स्म । यदा सः चतुर्थकक्ष्यायाम् आसीत् प्रधानाचार्यः ओमप्रकाशं विद्यालये क्रीडाक्षेत्रे च सम्मार्जनं कर्तुम् उक्तवान् । सः लिखति "आयामयुक्तं क्रीडाक्षेत्रं तस्य क्षमतायाः अपेक्षया बहुदीर्घम् आसीत् यस्य स्वच्छतायाः समये मम कट्यां वेदना जायमाना आसीत् ।

कुर्मीक्षत्रियः 26/5-4 बी.एस.सी (माइक्रोबायो) एम.एस.सी (बायोटेक) बी.एस.सी (बायोटेक) बी.एड., असिस्टेंट प्रोफेसरप्राइवेट-कालेजहेतुः सजातीयः वरः अपेक्षितः अस्ति ।

ब्राह्मण-जीजोदिया बुंदेलखण्डीब्राह्मणः ध्रुवकौशल-गोत्रम्, 30/5.00 गौरवर्णः, एम.ए, त्रिषु विषयेषु तथा च अन्य डिप्लोमाकोर्स-कन्यार्थं वरः अपेक्षितः सर्वे ब्राह्मणाः मान्याः सन्ति ।

तोमरराजपूतः 30/5-9" मैकेनिकल-इंजीनियर-सुजलानः (पुणे) इत्यस्य कृते सेवारतः उच्चतकनीकी अर्हताप्राप्त-राजपतकन्या आवश्यकी ।

23/5'3 कृशकाया गौरवर्णा, बी.ई सङ्गणकविज्ञानम्, छत्तीसगढ-निवासिनी अग्रवालकन्यायाः कृते स्वजातीयः तत्तुल्यः वरः वाञ्छनीयः ।

उपरि प्रदत्तवैवाहिकविज्ञापनेषु जातेः सूचकेषु भागेषु गोलाकारचिह्नं करोतु ।



ओमप्रकाशवाल्मीकेः पुस्तकस्य जूठन इत्यस्य मुखपृष्ठं यस्मिन् सः कस्यचित् दलितबालकस्य रूपेण वयस्कस्य अनुभवान् प्रस्तौति।

भवतां विचारेण ओमप्रकाशवाल्मीकिना सह तस्य सहपाठिनः शिक्षकाः च असमानतायाः व्यवहारं किमर्थं कृतवन्तः? आत्मानम् ओमप्रकाशवाल्मीकेः स्थाने स्थापयन् पङ्क्तिचतुष्टयं लिखन्तु यत् उक्तपरिस्थितौ भवान् कीदृशम् अनुभवम् अकरिष्यत् ?

भवतां विचारेण अंसारीदम्पतीभ्यां सह असमानतायाः व्यवहारः किमर्थं क्रियते स्म? यदि भवन्तः अंसारीदम्पत्योः स्थाने अभविष्यन् तथा च भवतां निवासार्थं एतस्मात् कारणात् स्थानस्य प्राप्तिः न अभविष्यत् यतोहि केचन प्रतिवेशिनः भवतां धर्मस्य कारणतः भवद्भिः सह न स्थातुम् इच्छन्ति तदा भवन्तः किम् अकरिष्यन्?

धूलिकणैः मुखं शिरः च युक्तं जातम् आसीत् । मुखस्य अन्तः धूलिकणाः प्रविष्टाः आसन् । मम कक्षायाम् अन्ये बालकाः पठन्ति स्म तथा च अहं सम्मार्जनं करोमि स्म । मुख्याध्यापकः स्वस्य प्रकोष्ठे उपविष्टः आसीत् परन्तु दृष्टिः मयि आसीत् । जलपानस्य अपि आज्ञा न आसीत् । आदिनम् अहं सम्मार्जने लग्नः आस्म । विद्यालयस्य प्रकोष्ठेभ्यः द्वारेभ्यः शिक्षकाः बालकाः च निलीय मां पश्यन्ति स्म । ओमप्रकाशेन अग्रिमे द्वे दिने यावत् विद्यालये क्रीडाक्षेत्रे च नैरन्तर्येण सम्मार्जनं कारितं तथा च एषः क्रमः तदा स्थगितः यदा ततः गच्छन् तस्य पिता स्वपुत्रं सम्मार्जनं कुर्वन्तं दृष्टवान् । सः शिक्षकाणां साहसपूर्वकं सम्मुखीकरणं कृतवान् तथा च ओमप्रकाशस्य हस्तं गृहीत्वा विद्यालयतः बहिर्गच्छन् उच्चस्वरेण सर्वान् श्रावयन् उक्तवान् - शिक्षकः असि... अतः गच्छामि..... परन्तु किञ्चित् स्मर शिक्षक ! एषः अत्र एव पठिष्यति अस्मिन् एव विद्यालये ! एतावदेव न एतदनन्तरम् अन्ये दलिताः अपि आगमिष्यन्ति पठनार्थम् ।

अपरा कथा एकस्याम् एतादृश्यां घटनायाम् आधारिता अस्ति या भारतस्य एकस्मिन् बृहति नगरे घटिता तथा च देशस्य अधिकेषु भागेषु एतादृशं प्रचलनं सामान्यः विषयः अस्ति । एषा कथा अंसारीदम्पत्योः वर्तते यौ नगरे भाटकेन प्रकोष्ठं स्वीकर्तुम् इच्छतः स्म । तौ धनाढ्यौ आस्ताम् अतः सम्पत्तिविक्रेतुः समीपं गतवन्तौ । विक्रेता तौ उक्तवान् यत् सः बहूनां रिक्तभवनानां विषये जानाति यानि भाटकेन प्राप्तुं शक्यन्ते । तौ प्रथमं गृहं द्रष्टुं गतवन्तौ । अंसारीदम्पतीभ्यां गृहम् अरोचत तौ गृहं स्वीकर्तुं निर्णयं कृतवन्तौ । पुनः यदा गृहस्वामिन्या तयोः नामानि श्रुतानि तदा सा व्याजं कर्तुम् आरब्धवती यत् सा मांसहारिभ्यः जनेभ्यः गृहं न दातुं शक्नोति यतोहि तस्मिन् भवने कोऽपि मांसाहारी जनः निवासं न करोति । सम्पत्तिविक्रेता अंसारीदम्पती च एतत् सर्वं श्रुत्वा आश्चर्यचकिताः जाताः यतोहि पार्श्वतः मत्स्यपाकस्य गन्धः आगच्छति स्म । तेषां पुरतः अपरेषां भवनानां स्वामिनः अपि एतत् एव व्याजं प्रदर्शितवन्तः । अन्ते सम्पत्तिविक्रेता परामर्शं दत्तवान् यत् किं ते स्वनाम्नोः परिवर्तनं कर्तुं शक्नुतः? स्वनामनी परिवर्तनं कृत्वा श्रीकुमारं श्रीमतीकुमारीं च कुरुताम् । अंसारीदम्पती तथा कर्तुम् इच्छुकौ न आस्ताम्, अतः तौ कानिचन अन्यानि भवनानि द्रष्टुं निर्णयं कृतवन्तौ । अन्ते प्रायः मासं यावत् अन्वेषणान्तरं तौ काञ्चित् गृहस्वामिनीं प्राप्तवन्तौ या तेषां कृते भाटकगृहं दातुं स्वीकृतवती

मानवीयगरिम्णः मूल्यम्

अधुना यावत् भवन्तः ज्ञातवन्तः स्युः यत् प्रायः कैश्चित् जनैः सह असमानतायाः व्यवहारः केवलम् एतदर्थं भवति यत् तेषां जन्म कस्यां जातौ लिङ्गे अथवा कस्मिन् धर्मे जातम् अस्ति तथा च ते उच्चवर्गस्य सन्ति अथवा न सन्ति अथवा मध्यमनिम्नवर्गयोः वा सन्ति । ओमप्रकाश-वाल्मीकिना अंसारीपरिवारेण च सह असमानतायाः व्यवहारः जातिगतैः धर्मगतैः च कारणैः अभवत् ।

यदा जनैः सह असमानतायाः व्यवहारः भवति तदा तेषां सम्मानस्य हानिः भवति । ओमप्रकाशवाल्मीकिना अंसारीदम्पतीभ्यां च सह कृतव्यवहारस्य कारणतः तेषां गरिम्णः हानिः अभवत् । ओमप्रकाशवाल्मीकि-महोदयस्य जातेः कारणतः, तेन विद्यालये सम्मार्जनं कारयित्वा शिक्षकैः छात्रैः च तस्य सम्मानस्य महती हानिः कृता तथा तादृशी अनुभूतिः कारिता यत् सः विद्यालयीयैः अन्यैः छात्रैः तुल्यः नास्ति सः तेभ्यः न्यूनतमः आस्ति । बालकत्वात् ओमप्रकाशवाल्मीकिः स्वयम् एतस्मिन् विषये अधिकं किमपि न कृतवान् । किन्तु यदा तस्य पिता स्वपुत्रं सम्मार्जनं कुर्वन्तं दृष्टवान् तदा सः एतस्मै असमानव्यवहाराय क्रोधं कृतवान् तथा च सः शिक्षकाणां समक्षे विरोधं प्रकटितवान् । यदा जनाः अंसारीदम्पत्योः कृते स्वभवनं भाटकेन दातुं न स्वीकृतवन्तः तदा तेषां सम्मानस्य क्षतिः जाता । पुनः यदा सम्पत्तिविक्रेता तेषां कृते नामपरिवर्तनस्य परामर्शं दत्तवान् तदा तेषाम् आत्मसम्मानस्य रक्षार्थं तथा न कृतवन्तः ते तस्य तं परामर्शं न स्वीकृतवन्तः।

ओमप्रकाशेन अंसारीदम्पतीभ्यां च सह एतादृशेन व्यवहारेण न भवितव्यम् आसीत् । ते तस्य एव सम्मानस्य गरिम्णः च अधिकारिणः आसन् यः अन्यस्य कस्यचित् जनस्य कृते लभते ।

भारतीयलोकतन्त्रे समानता

भारतीयसंविधानं सर्वान् जनान् समानरूपेण पश्यति । एतस्य अर्थः अस्ति यत् देशस्य प्रत्येकं जनः, सः कश्चित् पुरुषः स्यात् अथवा काचित् महिला तेषां धर्मः जातिः शैक्षिकपृष्ठभूमिः आर्थिकपृष्ठभूमिः च किमपि स्यात् तैः सह समानरूपेण व्यवहारः करिष्यते अथवा ते समानदृष्ट्या द्रक्ष्यन्ते । परन्तु तदनन्तरम् अपि वयम् एतद् न वक्तुं शक्नुमः यत् असमानतायाः व्यवहारः समाप्तः जातः। एषः न समाप्तः परन्तु पुनरपि भारतीयसंविधाने

यदि भवान् अंसारीपरिवारस्य कश्चित् सदस्यः अभविष्यत् तर्हि सम्पत्तिविक्रेत्रा नामपरिवर्तनस्य परामर्शस्य उत्तरं कथम् अदास्यत् ?

किं भवान् स्वजीवनस्य काञ्चित् एतादृशीं घटनां स्मरति यदा भवतः गरिम्णः हानिः जाता स्यात् ? भवान् तस्मिन् काले किम् अनुभूतवान् आसीत् ?

१९७५ तमे वर्षे निर्मिते दीवार इति चलचित्रे पादत्राणे वर्णलेपकः कश्चित् बालकः क्षेपित्वा प्रदत्तधनं न स्वीकरोति । सः चिन्तयति यत् तस्य कार्यस्य अपि गरिमा वर्तते तथा च तस्य पारिश्रमिकः तस्मै आदरेण प्रदेयः।



संसद् अस्माकं लोकतन्त्रस्य आधारस्तम्भः अस्ति तथा च वयं स्वस्य निर्वाचितप्रतिनिधीनां माध्यमेन तत्र प्रतिनिधित्वं प्राप्नुमः।

सर्वेषां जनानां समानतायाः सिद्धान्तः मान्यः कृतः अस्ति । यत्र पूर्वं भेदभावतः दुर्व्यवहारतः च जनानां रक्षार्थं कश्चित् अपि अधिनियमः न आसीत् अधुना अनेके अधिनियमाः जनानां सम्मानस्य तैः सह च समानतायाः व्यवहारं सुनिश्चेतुं विद्यमानाः सन्ति ।

समानतां स्थापयितुं संविधाने यानि प्रावधानानि सन्ति तेषु कानिचन् निम्नलिखितानि सन्ति – प्रथमम्, अधिनियमस्य दृष्ट्या प्रत्येकं जनः समानः अस्ति । एतस्य तात्पर्यम् एतद् अस्ति यत् प्रत्येकं जनस्य कृते राष्ट्रपतेः आरभ्यः कान्ता-सदृश-गृहसेविका-पर्यन्तं सर्वैः समानरूपेण अभिनियमानां पालनं करणीयं भवति । द्वितीयम्, केनापि जनेन सह तस्य धर्मस्य जातेः वंशस्य जन्मस्थानस्य च आधारेण तथा च तस्य स्त्रीपुरुषयोः आधारेण च भेदभावः न कर्तुं शक्यते । तृतीयम्, प्रत्येकं जनः सार्वजनिकेषु स्थानेषु गन्तुं शक्नोति येषु क्रीडाक्षेत्रम् उपाहार-मन्दिराणि आपणानि विपण्यादयः सम्मिलिताः सन्ति । सर्वे जनाः सार्वजनिक-कूपानां राजमार्गाणां स्नान-घट्टानां च उपयोगं कर्तुं शक्नुवन्ति । चतुर्थम्, अस्पृश्यतायाः उन्मूलनं कृतम् अस्ति ।

प्रशासनेन संविधानेन प्रदत्तस्य मान्यदत्तस्य च समानतायाः अधिकारः द्विविधा क्रियान्वयनं प्रति नीतः अस्ति - प्रथमः अधिनियमेन अपरञ्च सर्वकारस्य योजनाभिः कार्यक्रमैः च सुविधाहीनसमाजानां साहाय्यं कृत्वा । भारते एतादृशाः अनेके अधिनियमाः सन्ति ये जनस्य समानव्यवहारप्राप्तेः अधिकारस्य रक्षां कुर्वन्ति । अधिनियमेन सह सर्वकारः अपि, यैः समुदायैः सह शताधिकेभ्यः वर्षेभ्यः असमानतायाः व्यवहारः अभवत् तेषां जीवनम् उन्नतं कर्तुम् अनेकेषां कार्यक्रमाणां योजनानां च क्रियान्वयनं कृतम् । एताः योजनाः एतदर्थं चालिताः सन्ति यत् यैः जनैः अतीते काले अवसराः न प्राप्ताः अधुना ते अधिकान् अवसरान् प्राप्नुयुः।

एतस्यां दिशि सर्वकारेण कृतः प्रयासः अस्ति – मध्याह्नभोजनस्य व्यवस्था । एतस्य कार्यक्रमस्य अन्तर्गतं सर्वेषां सर्वकारीय-प्राथमिक-विद्यालयस्य बालकानां कृते मध्याह्नभोजनं विद्यालये दीयते । एषा योजना भारते सर्वप्रथमं तमिलनाडुराज्ये प्रारब्धा तथा च 2001 तमे वर्षे उच्चतम-न्यायालयेन सर्वे राज्य-सर्वकाराः षण्-मासाभ्यन्तरे सर्वेषु विद्यालयेषु प्रारब्धुं निर्दिष्टाः । एतस्य कार्यक्रमस्य अतीव सकारात्मक-प्रभावः जातः । उदाहरणार्थं मध्याह्न-भोजनस्य प्राप्तेः कारणतः निर्धनाः बालकाः अधिकसङ्ख्यायां विद्यालये प्रवेष्टुं नियमितरूपेण च विद्यालयं प्रति गन्तुम् आरब्धवन्तः । शिक्षकाः कथयन्ति यत् पूर्वं बालकाः भोजनं कर्तुं गृहं गच्छन्ति स्म तथा च पुनः ते विद्यालयं पठितुं न आगच्छन्ति स्म । परन्तु अधुना तैः तथा न करणीयं भवति । अनेन कार्यक्रमेण जातिगत-पूर्वाग्रहान् न्यूनीकर्तुम् अपि साहाय्यं प्राप्तम् । यतोहि विद्यालये उच्चवर्गस्य निम्नजातिवर्गस्य च बालकाः मिलित्वा एव भोजनं कुर्वन्ति तथा च केषुचित् स्थानेषु तु भोजनं पक्तुं दलित-महिलानां नियुक्तिः कृता वर्तते । मध्याह्न-भोजन-कार्यक्रमेण निर्धन-विद्यार्थिनां बुभुक्षां शमयितुम् अपि साहाय्यं कृतं ये प्रायः रिक्तोदरेण एव विद्यालयं प्रति आगच्छन्ति तथा च एतस्मात् कारणात् अध्ययने अवधानं केन्द्रितं न कर्तुं पारयन्ति ।

यद्यपि प्रशासकीयकार्यक्रमाः अवसराणां समानतायाः वर्धने महत्त्वपूर्णां भूमिकां निर्वहन्ति किन्तु अधुना अपि बहु किमपि सम्पादनस्य आवश्यकता अस्ति । मध्याह्नभोजनकार्यक्रमेण निर्धनबालकानां विद्यालये प्रवेशसङ्ख्या उपस्थितिसङ्ख्या च वर्धिता परन्तु पुनरपि अस्मिन् देशे ते विद्यालयाः यत्र धनिकानां बालकाः गच्छन्ति, तेभ्यः विद्यालयेभ्यः आधिक्येन पृथक्तां भजन्ते यत्र निर्धनानां बालकाः पठन्ति । अद्य अपि देशे अनेके विद्यालयाः सन्ति येषु ओमप्रकाशवाल्मीकिसदृशैः बालकैः सह भेदभावस्य असमानतायाः च व्यवहारः क्रियते । एते बालकाः एतादृशीषु असमानस्थितिषु क्षिप्यन्ते यत्र तेषां सम्मानस्य रक्षा न भवति । एवम् एतस्मात् कारणात् भवति यतोहि अधिनियमस्य निर्माणान्तरम् अपि जनाः तैः सह समानं व्यवहारं कर्तुं सज्जाः न सन्ति अर्थात् ते तथा कर्तुं न स्वीकुर्वन्ति ।



उत्तराखण्डस्य शासकीयशालायां तेषां मध्याह्नभोजनं वितरन्ती काचित् महिला दृश्यते।

मध्याह्न-भोजन-कार्यक्रमः कः अस्ति ? किं भवन्तः एतस्य कार्यक्रमस्य लाभत्रयं वक्तुं शक्नुवन्ति ? भवतां चिन्तनानुसारेण एषः कार्यक्रमः कथं समानतायाः भावनां वर्धयितुं शक्नोति ?

स्वक्षेत्रे क्रियान्वितायाः कस्याश्चित् सर्वकारीययोजनायाः विषये जानन्तु । एतस्यां योजनायां किं क्रियते ? एषा कस्य लाभार्थं निर्मिता अस्ति ?

"स्वात्मसम्मानस्य हानिं कृत्वा जीवनम् अशोभनीयम् अस्ति । आत्मसम्मानं जीवनस्य महत्तमः भागः अस्ति । एतेन विना मनुष्यः नगण्यः अस्ति । आत्मसम्मानेन सह जीवनस्य यापनार्थं मनुष्येण विपत्तिषु जयः प्राप्तव्यः। केवलं कठिनेन निरन्तरसङ्घर्षेण एव मनुष्यः बलं विश्वासं मान्यतां च प्राप्तुं शक्नोति"।

मनुष्यः नाशवान् अस्ति । प्रत्येकं जनेन एकस्मिन् दिने तु मर्त्तव्यम् एव अस्ति परन्तु मनुष्येण अयं सङ्कल्पः करणीयः यत् सः स्वजीवनस्य बलिदानम् आत्मसम्मानस्य उच्चादर्शान् विकसयितुं तथा च स्वमानवजीवनस्य उन्नत्यर्थं करिष्यति । कस्यचित् साहसपूर्णस्य मनुष्यस्य कृते आत्मसम्मानरहितात् जीवनात् अधिकम् अशोभनीयम् अन्यत् किमपि नास्ति एव"।

-बी-आर.अम्बेडकरः

एतस्य मुख्यं कारणम् अस्ति यत् दृष्टिकोणे अतीव शनैः शनैः परिवर्तनम् आगच्छति । यद्यपि जनाः जानन्ति यत् भेदभावस्य ब्यवहारः अधिनियमस्य विरुद्धः अस्ति पुनरपि ते जाति-धर्म-पङ्गुता-आर्थिकस्थितीनां महिलायाः आधारेण च जनैः सह असमानतायाः व्यवहारं कुर्वन्ति । वर्तमानदृष्टिकोणस्य परिवर्तनं तदा संभवम् अस्ति यदा जनाः इत्थं विश्वसेयुः यत् कोऽपि हीनः नीचः वा नास्ति सर्वेषां महत्त्वम् अस्ति तथा च प्रत्येकं जनः सम्मानजनकस्य व्यवहारस्य अधिकारी अस्ति । प्रजातन्त्रीयसमाजे समानतायाः स्थापना कश्चित् सातत्येन सङ्घर्षः अस्ति यस्मिन् जनैः समाजैः च सहयोगः प्रदातव्यः । एतस्मिन् पुस्तके भवन्तः एतस्मिन् विषये इतोऽपि विस्तरेण पठिष्यन्ति ।

अन्येषु लोकतन्त्रेषु समानतायाः विषयाः

प्रायः भवन्तः चिन्तयन्तः भवेयुः यत् किं भारतीयलोकतन्त्रे इत्थम् एव अस्ति यत्र असमानतायाः अस्तित्वम् अस्ति तथा च यत्र समानतायाः कृते सङ्घर्षः सातत्येन चलति । सत्यं तु इदम् अस्ति यत् संसारस्य अधिकतमेषु लोकतान्त्रिकदेशेषु समानतायाः विषये विशेषेण सङ्घर्षः जायमानः अस्ति । उदाहरणार्थं संयुक्तराज्ये अमेरिकायाम् अफ्रीकी-अमेरिकन-जनाः येषां पूर्वजाः क्रीतदासाः आसन् तथा च अफ्रीकातः आनीताः आसन् ते अद्यापि स्वजीवनम् असमानरूपेण एव यापयन्ति । यद्यपि **1950** तमस्य अन्तिमे दशके अफ्रीकी-अमेरिकीजनानां कृते समानम् अधिकारं दापयितुम् आन्दोलनम् अभवत् । इतः पूर्वम् अफ्रीकी-अमेरिकीयैः जनैः सह संयुक्तराज्ये अत्यधिक-असमानतायाः व्यवहारः भवति स्म तथा च अधिनियमः अपि तेषां कृते समानतायुक्तं न्यायं न प्रददाति स्म । उदाहरणार्थं बसयानेन यात्रासमये तैः पृष्ठतने भागे उपवेष्टव्यं भवति अथवा कश्चित् श्वेतजनः उपवेष्टुम् इच्छति चेत् तैः स्व-आसनतः उत्थातव्यं भवति स्म ।

रोजापार्क्सः इति काचित् अफ्रीकी-अमेरिकादेशीया महिला आसीत् । दिसम्बरमासस्य प्रथमदिनाङ्कस्य 1955 तमे वर्षे सा आदिनं कार्यं कृत्वा श्रान्ता आसीत् तया बसयाने स्वस्य आसनं कस्मैचित् श्वेतजनाय दातुम् अनङ्गीकृतम् । तस्मिन् दिने तस्याः अस्वीकरणात् अफ्रीकामूलस्य अमेरिकाजनैः सह असमानतां विषयीकृत्य विशालस्य आन्दोलनस्य प्रारम्भः जातः यः नागरिक-अधिकार-आन्दोलनरूपेण विख्यातम् (सिविल-राइट्स-मूवमेन्ट) इति । 1964 तमस्य नागराधिनियमः जाति-धर्म-राष्ट्रिय-मूलाधिकाराणाम् आधारेण भेदभावस्य निषेधं कृतवान् । एषः एतद् अपि उक्तवान् यत् अफ्रीकीमूल-अमेरिकायाः बालकानां कृते सर्वेषां विद्यालयानां द्वाराणि उद्घाटयिष्यन्ते तथा च तैः भिन्नेषु भिन्नेषु विद्यालयेषु शिक्षार्थं न गन्तव्यं भविष्यति ये विशेषरूपेण तेषां कृते एव उद्घाटिताः आसन् । इत्थं भूते सति अपि आधिक्येन अफ्रीकामूलीयाः अमेरिका-वास्तव्याः निर्धनाः सन्ति । अधिकतराः अफ्रीकीमूलीयाः अमेरिकीयाः बालकाः केवलम् एतादृशेषु सर्वकारीयेषु विद्यालयेषु एव प्रवेष्टुं सामर्थ्यवन्तः सन्ति यत्र न्यूनानि सौविध्यानि सन्ति तथा च न्यूनयोग्यतावन्तः शिक्षकाः सन्ति अपरञ्च श्वेताः विद्यार्थिनः निजविद्यालयान् एव गच्छन्ति अथवा तेषु क्षेत्रेषु निवसन्ति यत्रत्यानां सर्वकारीयविद्यालयानां स्तरः निजविद्यालयैः सदृशः एव उन्नतः अस्ति ।

रोजापार्क्स एका अफ्रीकी-अमेरिकनमहिला यस्याः विद्रोहिप्रतिक्रियया अमेरिकीयस्य इतिहासस्य दिशा परिवर्तिता ।

भारतस्य संविधानस्य पञ्चदशस्य अनुच्छेदस्य केचन अंशाः

धर्म-मूलवंश-जाति-लिङ्ग-जन्मस्थानानाम् आधारेण विभेदस्य प्रतिषेधः

(1) राज्यं कस्यापि नागरस्य विरुद्धं केवलं धर्म-मूलवंश-जाति-लिङ्ग-जन्मस्थानानाम् अथवा एतेषु कस्यापि आधारेण कमपि विभेदं न करिष्यति ।

(2) कश्चित् नागरः केवलं धर्म-मूलवंश-जाति-लिङ्ग-जन्मस्थानानाम् अथवा एतेषु कस्यापि आधारेण -

क) आपणानां सार्वजनिकभोजनालयानाम् उपाहारगृहाणां सार्वजनिकमनोरञ्जनस्य च स्थानानां प्रवेशसम्बन्धे कस्यापि निर्योग्यतायाः दायित्वस्य निर्बन्धस्य अथवा प्रतिभूत्याः अधीनः न भविष्यति ।

अथवा

ख) पूर्णतः अथवा भागतः राज्यनिधेः पोषितः अथवा साधारणजनतायाः प्रयोगार्थं समर्पितकूपानां तडागानां स्नानघट्टानां राजमार्गाणां तथा च सार्वजनिकसमागमस्य स्थानानाम् उपयोगस्य सम्बन्धे कस्यापि नियोग्यतायाः दायित्वस्य निर्बन्धस्य अथवा प्रतिभूत्याः अधीनः न भविष्यति ।

लोकतन्त्रस्य आवाहनम्

कोऽपि देशः पूर्णरूपेण लोकतान्त्रिकः अस्ति इति न वक्तुं शक्यते । सदा एव एतादृशाः समुदायाः जनाः च भवन्ति ये लोकतन्त्रस्य पृथक् परिभाषां कुर्वन्ति अपि च अधिकाधिकां समानताम् आनेतुं नूतनान् नूतनान् प्रश्नान् कुर्वन्ति । एतस्य केन्द्रे सः सङ्घर्षः अस्ति यः सर्वेषां जनानां कृते समानता-दानस्य सम्मान-दानस्य च पक्षधरः अस्ति । एतस्मिन् पुस्तके भवन्तः पठिष्यन्ति यत् कथं समानतायाः प्रश्नः भारतीय-लोकतन्त्रे अस्माकं दैनन्दिन-जीवनस्य विभिन्नान् पक्षान् प्रभावयति । एतेषां पाठानां पाठनकाले विचारं कुर्वन्तु यत् किं सर्वेषां जनानां समानतां तेषाम् आत्मसम्मानं च शिखरे स्थापनस्य भावनां जनाः स्वीकुर्वन्तः सन्ति उत न ।

अभ्यासः

1 *लोकतन्त्रे सार्वभौमिक-वयस्क-मताधिकारः किमर्थं महत्त्वपूर्णः अस्ति?*

2 मञ्जूषायां प्रदत्तस्य संविधानस्य पञ्चदशम् अनुच्छेदं पुनः पठन्तु तथा च एतादृशम् उपायद्वयं ज्ञापयतु यतः अयम् अनुच्छेदः असमानतां दूरीकरोति ?

3 ओमप्रकाशवाल्मीकेः अनुभवः अंसारीदम्पत्याः अनुभवेन केन प्रकारेण समानः आसीत् ?

4 "अधिनियमस्य दृष्ट्या सर्वे जनाः समानाः सन्ति" एतेन कथनेन भवन्तः किम् अवगच्छन्ति ? भवतां विचारेण अयं लोकतन्त्रे किमर्थं महत्वपूर्णः अस्ति ?

5 भारतसर्वकारेण 1995 तमे वर्षे विकलाङ्गता-अधिनियमः स्वीकृतः आसीत् । एतस्य अधिनियमस्य अनुसारं विकलाङ्गजनानां कृते अपि समानाः अधिकाराः प्राप्ताः सन्ति तथा च समाजे तेषां सम्पूर्णरूपेण सहभागितायाः प्रबन्धः सर्वकारस्य दायित्वम् अस्ति । सर्वकारेण तेभ्यः निःशुल्कत्वेन शिक्षा दातव्या अपि च विकलाङ्गबालकाः विद्यालयस्य मुख्यधारायां सम्मेलनीयाः । अधिनियमः एतद् अपि वदति यत् सर्वेषु सार्वजनिकस्थलेषु भवनेषु विद्यालयादिषु समतलमार्गाः निर्मातव्याः यतः तत्र विकलाङ्गानाम् आवागमनं सरलतया भवेत् ।

चित्रं पश्यतु तस्य च बालकस्य विषये चिन्तयन्तु यः सोपानेभ्यः अधः आनीयते । किं भवन्तः अनुभवन्ति यत् एतस्यां परिस्थितौ विकलाङ्गतायाः अधिनियमः क्रियान्वयितः स्यात् ? सः भवनं प्रति सरलतया आवागमनं कर्तुं शक्नुयात् तस्य कृते किम् आवश्यकम् ? तम् उत्थाप्य सोपानेभ्यः अवतारणं तस्य सम्मानं सुरक्षां च कथं प्रभावयति ?



शब्द-सङ्कलनम्

सार्वभौमिक-वयस्क-मताधिकारः - *अयं लोकतान्त्रिकसमाजस्य अत्यन्तं महत्वपूर्णः पक्षः अस्ति । एतस्य अर्थः अस्ति यत् सर्वेभ्यः वयस्केभ्यः नागरेभ्यः मतदानस्य अधिकारः अस्ति । सः सामाजिकपृष्ठभूमितः उत आर्थिकपृष्ठभूमितः वा भवेत् ।*

गरिमा – एतस्य तात्पर्यम् आत्मानम् अपरान् जनान् च सम्मानयोग्यान् अवगन्तुम् अस्ति ।

संविधानम् – अयम् एकः अभिलेखः अस्ति यस्मिन् देशस्य जनतया सर्वकारेण च पालनयोग्यानाम् अधिनियमानां नियमानां च निरूपणं कृतम् अस्ति ।

नागरिक-अधिकार-आन्दोलनम् – किञ्चित् आन्दोलनं यत् संयुक्तराज्य-अमेरिकायां 1950 तमस्य दशकस्य अन्ते प्रारब्धम् अपि च यस्मिन् अफ्रीकाभिजन-अमेरिकीयाः जनाः जातिगत-भेदभावं समापयितुं समान-अधिकाराणां च अभ्यर्थनां कृतवन्तः ।

द्वितीयः घट्टः



राज्यसर्वकारः

शिक्षकाणां कृते

एतौ द्वौ अध्यायौ अर्थात् द्वितीयः अध्यायः तृतीयः अध्यायः च राज्यसर्वकारस्य विषये सन्ति तथा च दृढानाम् उदाहरणानां माध्यमेन सर्वकारस्य कार्यं तस्य संरचनां च प्रस्तौतुं प्रयासं कुरुतः । अस्माभिः एतस्मिन् स्वास्थ्यक्षेत्रतः सम्बद्धानि उदाहरणानि स्वीकृतानि अपरञ्च कानिचन अन्यानि उदाहरणानि अपि तावन्ति एव महत्त्वपूर्णानि भवितुं शक्नुवन्ति स्म।

द्वितीयः अध्यायः जनानां कृते महत्त्वयुक्तस्य विषयस्य रूपेण स्वास्थ्यस्य चर्चां करोति । स्वास्थ्यसेवानां सार्वजनिकं व्यक्तिगतं च इति पक्षद्वयम् अस्ति । भारते स्वास्थ्यसुविधाः सर्वेभ्यः सुलभाः न सन्ति । यद्यपि अस्माकं संविधानस्य अनुसारं स्वास्थ्यस्य अधिकारः अस्माकं मौलिकानाम् अधिकाराणां भागः वर्तते तथापि एषः सर्वेषां कृते समानरूपेण उपलब्धः नास्ति। अत्र प्रदत्तविवरणानां साहाय्येन विद्यार्थिनः इदं द्रष्टुं शक्ष्यन्ति यत् सर्वकारतः अपेक्षितं साहाय्यं तथा च आदर्शाः के भवेयुः अपि च तेषां संरचनायाः पृष्ठे कीदृशाः तर्काः आधारः च निहितः वर्तते । वर्तमानानां स्थितीनां परिवर्तनार्थं केषाञ्चित् उपायानां चर्चा अपि अस्मिन् अध्याये कृता अस्ति।

सर्वकारस्य कार्यप्रणाली-प्रतिनिधित्व-उत्तरदायित्व-सार्वजनिक-हित-सदृशानाम् अवधारणानां विषये चर्चा तृतीये अध्याये कृता अस्ति । यद्यपि विधायिकायाः कार्यकारिण्याः च इति द्वयोः विषये चर्चा कृता अस्ति। अस्माभिः एषा अपेक्षा न करणीया यत् विद्यार्थिनः एतयोः द्वयोः मध्ये जातानां सूक्ष्म-अन्तराणां विषये सम्पूर्णतया ज्ञास्यन्ति । एतद् एव उत्तमं स्यात् यत् वयं धैर्यपूर्वकं बहूनां प्रश्नानां विषये तेषां अवधानस्य आकर्षणं कुर्मः अपि च तान् विषयान् अवगन्तुं तेषां प्रोत्साहनं कुर्याम यथा 'सर्वेषु जनेषु शक्तिशाली जनः कः प्रतीयते ?' 'विधायकः एतस्याः समस्यायाः समाधानं किमर्थं न कर्तुं शक्नोति?' इत्यादितथ्यानां विषये चर्चा अस्ति । एतादृशानां प्रश्नानां साहाय्येन ते सर्वकारीय-संरचनायाः तर्कान् आधारान् च स्वयं स्वमनसि निर्मातुं समर्थाः भविष्यन्ति।

इदम् अत्यावश्यकम् अस्ति यत् बालकाः सार्वजनिकेषु विषयेषु स्वविचारान् प्रकटयितुम् आत्मविश्वासं प्राप्नुयुः तथा च एतेषाम् अध्यायानाम् अभ्यासान् कुर्वन्तः सर्वकारस्य दायित्वस्य विषये सम्यग्रूपेण जानीयुः । भवन्तः तैः सह चर्चां कर्तुं तथा च समस्यानां समाधानम् अन्वेष्टुम् अनेकेषां परिचित-विषयाणां चयनं कर्तुं शक्नुवन्ति यथा जलस्य यातायातस्य विद्यालयीयस्य शुल्कस्य च विषये पुस्तकानां विषये बालश्रमादिविषये च चर्चां कर्तुं शक्नुवन्ति । भित्तिपत्रस्य माध्यमेन ते बालकाः स्वविचारान् प्रकटयितुं स्वतन्त्राः भवेयुः। सर्वकारस्य तस्य कार्याणां च विषये या चर्चा भवति सा प्रायः जाड्यं जनयति । अतः इदम् इतोऽपि आवश्यकं भवति यत् एतेषाम् अध्यायानां पठनपाठनकाले वयं कक्षां शिक्षामयीं न कुर्मः अपितु तदपेक्षया चर्चापूर्णां विचारविमर्शयुक्तां तथा च गतिविधिपूर्णां कुर्याम।





स्वास्थ्यस्य विषये सर्वकारस्य भूमिका

लोकतन्त्रे जनानाम् इयम् अपेक्षा भवति यत् सर्वकारः तेषां कल्याणाय कार्यं कुर्यात् । एतस्याः अपेक्षायाः पूर्तिः तदा भवितुं शक्नोति यदा सर्वकारः तेषां कृते शिक्षायाः स्वास्थ्यस्य कृते काञ्चित् व्यवस्थाम् अपि च वृत्तिप्रदानं गृहनिर्माणं च कुर्यात् राजमार्गाणां विकासः विद्युतः उपलब्धता च स्यात् । एतस्मिन् अध्याये वयं स्वास्थ्यस्य कः अर्थः इति विषये स्वास्थ्येन सम्बन्धितसमस्यानां च विषये निरीक्षणं करिष्यामः। एतस्य अध्यायस्य उपशीर्षकाणि पश्यामः। भवतां विचारेण एषः विषयः सर्वकारस्य कार्यतः केन प्रकारेण सम्बद्धः अस्ति ?

स्वास्थ्यं किम् अस्ति?

स्वास्थ्यस्य विषये वयं विविधप्रकारेण चिन्तयितुं शक्नुमः। स्वास्थ्यस्य अर्थः अस्ति अस्माकं रोगेभ्यः व्रणेभ्यः च मुक्तिः। परन्तु स्वास्थ्यं केवलं रोगसम्बन्धितम् एव नास्ति। भवतां दृष्ट्याम् उपरि प्रदर्शिते चित्रसमूहे केवलं काश्चन घटनाः एव स्वास्थ्यसम्बद्धाः स्युः । प्रायः वयम् अवधानं न कुर्मः यत् उपर्युक्तायाः प्रत्येकं स्थितेः सम्बन्धः स्वास्थ्येन अस्ति । रोगम् अतिरिच्य अस्माभिः तेषु कारणेषु अपि अवधानम् अवश्यं करणीयम् अस्ति यः अस्माकं स्वास्थ्ये प्रभावं जनयन्ति । उदाहरणार्थं यदि जनाः पानीयं जलं प्रदूषणमुक्तं वातावरणं प्राप्नुयुः तर्हि ते समान्यतया स्वस्थाः भविष्यन्ति । अपरदृष्ट्या यदि जनाः उदरपूर्त्यर्थं भोजनं न प्राप्नुयुः अथवा ते कष्टपूर्णं जीवनं जीवितुं बाध्याः भवेयुः तर्हि ते अधिकाः रुग्णाः भविष्यन्ति।

वयं सर्वे इच्छामः यत् वयं यत् कार्यं कुर्मः तत् स्फूर्त्या उच्चमनोबलेन च कुर्याम । शिथिलतया अकर्मण्यतया च चिन्ताग्रस्तः भूत्वा तथा च चिरकालं यावत् भयाक्रान्तभावेन जीवनीयम् इति स्वस्थजीवनस्य लक्षणानि न सन्ति । अस्माभिः सर्वैः अपि निरुद्विग्नतया प्रसन्नैः च भाव्यम्। अस्माकं जीवनस्य एते सर्वे पक्षाः स्वास्थ्यस्य भागाः सन्ति।

किं भवन्तः एतानि सर्वाणि चित्राणि अथवा एतेषु कानिचन चित्राणि स्वास्थ्यसम्बद्धानि मन्यन्ते ? यदि आम्, तर्हि कथम् ? समूहे चर्चां कुर्वन्तु।

उपरि प्रदत्तेषु चित्रेषु स्थितिद्वयं चिन्वन्तु ये स्वास्थ्यसम्बद्धे न स्तः। ते कथं स्वास्थ्यसम्बद्धे भवितुं शक्नुतः एतस्मिन् विषये वाक्यद्वयं लिखन्तु।

भारते स्वास्थ्यसेवाः

किं भवन्तः एतेषां स्तम्भानां कृते किमपि शीर्षकं दातुं शक्नुवन्ति?

आगच्छन्तु भारते स्वास्थ्यसेवानां केषाञ्चित् पक्षाणां परीक्षणं कुर्याम । अत्र प्रदत्तायाः तालिकायाः प्रथमद्वितीययोः स्तम्भयोः दर्शितस्थितीनां तुलनां कुर्वन्तु ।

सम्पूर्णस्य संसारस्य अपेक्षया भारते सर्वाधिकाः चिकित्सामहाविद्यालयाः सन्ति तथा च अत्र अधिकतराः चिकित्सकाः चिकित्सार्थं सज्जीक्रियन्ते । प्रायः प्रत्येकं वर्षे 15000 नूतनाः चिकित्सकाः योग्यतां प्राप्नुवन्ति ।	भारते अधिकांशाः चिकित्सकाः नगरेषु वसन्ति । ग्रामवासिभिः चिकित्सार्थं बहुदूरम् आगन्तव्यं भवति । ग्रामीणक्षेत्रेषु जनसङ्ख्यायाः अपेक्षया चिकित्सकानां सङ्ख्या अत्यल्पा वर्तते ।
गतवर्षे स्वास्थ्यसेवानां सौविध्येषु महती वृद्धिः जाता अस्ति । 1950 तमे वर्षे भारते केवलं 2,717 चिकित्सालयाः आसन् । 1991 तमे वर्षे 11,174 चिकित्सालयाः आसन् अपि च 2000 तमे वर्षे एषा सङ्ख्या वर्धित्वा 18,218 अभवत् ।	भारते प्रायेण पञ्चलक्षजनाः प्रतिवर्षं क्षयरोगेण म्रियन्ते । स्वतन्त्रताप्राप्तेः आरभ्यः अधुनापर्यन्तम् एतस्यां सङ्ख्यायां किमपि परिवर्तनं न अभवत् । प्रत्येकं वर्षे सन्निपातज्वरस्य प्रायेण विंशतिलक्षघटनाः दृष्टिपथम् आयान्ति । एषा सङ्ख्या न्यूनतां न गच्छति ।
विदेशेभ्यः भारतं प्रति बहवः चिकित्सापर्यटकाः चिकित्सार्थम् आगच्छन्ति । ते उपचारार्थं भारतस्य केषुचित् एतादृशेषु चिकित्सालयेषु आगच्छन्ति येषां तुलनां संसारस्य सर्वश्रेष्ठैः चिकित्सालयैः सह कर्तुं शक्यते ।	वयं सर्वेषां कृते पानीयं जलं न प्रापयामः। सञ्चारणीयाः रोगाः जलेन परस्परं गच्छन्ति । एतेषु रोगेषु 21% रोगाः जलजनिताः भवन्ति । यथा अतिसारः उदरकृमयः हैपेटाइटिसरोगः च ।
भारतम् औषधोत्पादनदृष्ट्या विश्वस्य देशेषु चतुर्थं स्थानं भजते तथा च इतः अधिकमात्रया औषधीनां निर्यातः भवति ।	भारतस्य समस्तेषु बालकेषु पञ्चाशत्-प्रतिशतं बालकाः पर्याप्तं भोजनं न लभन्ते तथा च ते कुपोषणग्रस्ताः भवन्ति ।

भारते प्रायः एतद् उच्यते यत् वयं सर्वेषां कृते स्वास्थ्यसौविध्यानि दातुम् असमर्थाः स्मः यतोहि सर्वकारस्य पार्श्वे एतदर्थं पर्याप्तं धनं नास्ति। उपरिप्रदत्तं वामभागस्थं स्तम्भं पठित्वा किं भवन्तः एतत् सम्यक् अनुभवन्ति? चर्चां कुर्वन्तु।

रोगेभ्यः रक्षार्थं तेषां रोगाणां उपचारार्थं च अस्मभ्यम् औचित्यपूर्णाः स्वास्थ्य-सुविधाः आवश्यक्यः सन्ति । यथा स्वास्थ्यकेन्द्राणि चिकित्सालयाः परीक्षणार्थं प्रयोगशालाः रोगिवाहनस्य च सुविधा रक्तकोशादयः च, यैः रोगिणाम् आवश्यक-स्वास्थ्य-सेवा निरीक्षणं च भवेत् । एतादृशीनां सुविधानां व्यवस्थां सञ्चालयितुम् अस्माकं कृते स्वास्थ्य-सेवकानां परिचारिकाणां योग्य-चिकित्सकानाम् अन्य-विशेषज्ञानां च आवश्यकता वर्तते ये उचितं परामर्शं दद्युः रोगस्य परिचयं दातुं समर्थाः भवेयुः तथा च उपचारं कर्तुं समर्थाः भवेयुः। रोगिणां चिकित्सार्थम् अस्मभ्यं आवश्यकानि औषधानि उपकरणानि च आवश्यकानि । यदा वयं रुग्णाः भवामः तदा स्वचिकित्सार्थम्, अस्माकं कृते एतेषां सुविधानाम् आवश्यकता भवति ।

भारते अधिकसङ्ख्यायां चिकित्सकाः औषधालयाः चिकित्सालयाः च सन्ति । देशस्य पार्श्वे सार्वजनिक-स्वास्थ्यसेवाः चालयितुं पर्याप्तः अनुभवः ज्ञानं च अपि विद्यते । एते तादृशाः चिकित्सालयाः तादृशानि स्वास्थ्यकेन्द्राणि च सन्ति येषां सञ्चालनं सर्वकारः करोति । सर्वकारः स्वजनसङ्ख्यायाः कस्यचित् बृहद्भागस्य सुरक्षां कर्तुं समर्थः अस्ति यः शताधिकेषु सहस्रेषु च ग्रामेषु विस्तृतः अस्ति । एतस्मिन् विषये वयं पश्चात् विस्तरेण चर्चां करिष्यामः । एतेन सह चिकित्साविज्ञाने महती असाधारणा प्रगतिः जाता अस्ति यस्याः कारणतः देशे चिकित्सायाः नूतनानि कौशलानि विधयः च उपलब्धाः सन्ति ।

तथापि द्वितीयः स्तम्भः दर्शयति यत् अस्माकं देशे स्वास्थ्यस्य स्थितिः कियती विकृता अस्ति । उपर्युक्तस्य सकारात्मकस्य विकासानन्तरम् अपि वयं जनतायाः कृते उचित-स्वास्थ्य-सुविधाः दातुम् असमर्थाः स्मः । एषा विरोधाभासोत्पादिका स्थितिः अस्ति या अस्माकम् अपेक्षाभ्यः विपरीता अस्ति । अस्माकं देशे धनम् अस्ति ज्ञानम् अस्ति अनुभविनः जनाः च सन्ति तथापि वयं सर्वेषां कृते आवश्यक-स्वास्थ्यसेवाः दातुम् असमर्थाः स्मः । वयम् एतस्मिन् अध्याये एतस्याः स्थितेः केषाञ्चित् कारणानां विषये ज्ञास्यामः ।

सर्वकारीयाणां चिकित्सालयानां रोगिभिः प्रायेण एतादृशीषु लम्बतरासु पङ्क्तीषु स्थित्वा प्रतीक्षा करणीया भवति ।

हाकिमशेखस्य कथा

हाकिमशेखः पश्चिमबङ्ग-कृषि-श्रमिक-समितेः एकः सदस्यः आसीत्, पश्चिमबङ्ग-कृषि-श्रमिक-समितिः इति पश्चिमिबङ्गप्रान्ते कृषकश्रमिकानाम् एकं सङ्घटनम् अस्ति । 1992 तमे वर्षे एकस्मिन् दिने सायङ्काले हाकिमशेखः गच्छतः रेलयानतः अपतत् तथा च तस्य शिरसि गभीराः व्रणाः जाताः। तस्य स्थितिः बहुगभीरा जाता अपि च तस्य कृते त्वरितचिकित्सायाः आवश्यकता आसीत् ।

सः कोलकातायाः एकस्मिन् सर्वकारीये चिकित्सालये नीतः परन्तु तत्रत्यैः अधिकारिभिः सः तस्मिन् चिकित्सालये न प्रवेशितः यतोहि तत्र कापि शय्या रिक्ता न आसीत् । अपरस्मिन् चिकित्सालये आवश्यक्यः सुविधाः अपि च तस्य चिकित्सार्थम् आवश्यकाः विशेषज्ञाः न आसन् । अनेन प्रकारेण अत्यन्त-गभीर-अवस्थायां सः चतुर्दशहोरासु अष्टौ सर्वकारीयेषु चिकित्सालयेषु नीतः परन्तु कश्चित् अपि तं न प्रवेशितवान् ।

अन्ते सः एकस्मिन् निजचिकित्सालये प्रवेशितः यत्र तस्य चिकित्सा जाता । सः स्वचिकित्सार्थं बहुधनं व्ययीकृतवान् । यैः चिकित्सालयैः तस्य प्रवेशः अनङ्गीकृतः आसीत् तेषाम् उपेक्षापूर्णेन व्यवहारेण खिन्नः भूत्वा हाकिमशेखः अपि च पी.बी.के.एम.एस. इति समितिः न्यायालये अभियोगं नियोजितवन्तः।

उपरि प्रदत्तां कथां पठन्तु । कल्पनां कुर्वन्तु यत् भवान् कश्चित् न्यायाधीशः अस्ति। भवान् हाकिमशेखं किं वदिष्यति ?

कस्याश्चित् चिकित्सायाः व्ययः

अमनः रञ्जनः च उत्तमे मित्रे स्तः। रञ्जनस्य कुटुम्बः साधनसम्पन्नः अस्ति अपरञ्च अमनस्य मातापितरौ यथाकथञ्चित् जीनवस्य निर्वहणं कुरुतः।



चिकित्सालयस्य भवनं तथा चाकचक्ययुक्तं प्रतिभाति स्म यत् अहं पञ्चतारात्पाहारगृहम् इति अनूभूतवान्। पिता कथयति स्म एषः कश्चित् निजचिकित्सालयः अस्ति तथा च उत्तमोत्तमानि चिकित्सासौविध्यानि तत्र लभन्ते।

स्वागतपटले एव पिता पञ्चशतरूप्यकाणि दत्तवान् जानाति भवान् चिकित्सकस्य निरीक्षणात् प्रागेव तत्र शोभनः सङ्गीतः ध्वन्यते स्म तथा च सर्वमपि कियत् स्वच्छतापूर्णं चाकचक्यपूर्णं च आसीत्।





चिकित्सकः मां बहुविधानि परीक्षणानि कारयितुम् उक्तवान्... परन्तु तत्र तु सर्वे जनाः मित्रवत् परस्परं वार्तालापं कुर्वन्ति स्म ! एकया महिलया निरीक्षणार्थं मम रक्तं स्वीकृतं वार्तालापप्रसङ्गे एव मत्तः रक्तं स्वीकृतवती तस्माद् अहं वेदनामेव न अनुभूतवान् !

यदा सर्वेषां परीक्षणानां परिणामाः समागताः तदा वयं पुनः चिकित्सकस्य पार्श्वे गतवन्तः। सः परिणामान् निरीक्षितवान् तथा च उक्तवान् यत् सर्वं सम्यक् अस्ति भवान् केवलम् आगमज्वरेण ग्रस्तः अस्ति। सः कानिचन औषधानि लिखितवान् आसीत् अपि च सः विश्रान्त्यर्थं माम् उक्तवान् आसीत्।





अपि च सत्यम् एव कियान् कालः तत्र व्यतीतः! वयम् एकं महान्तं चिकित्सालयं गतवन्तः। अस्माभिः ओ .पी.डी स्थले एव एकस्यां दीर्घायां पङ्क्तौ स्थातव्यम् अभवत्। मम स्वास्थ्यं तथा विकृतिं गच्छति स्म यत् अहं तु सम्पूर्णे काले पितुः आश्रयं स्वीकृत्य तत्र स्थितवान्।



यदा अस्माकं क्रमः आगतः तदा चिकित्सकः मम निरीक्षणं कृतवान् तथा च रक्तस्य निरीक्षणं कारयितुम् उक्तवान्। एतस्य कृते अस्माभिः एकस्याम् इतोऽपि दीर्घतरायां पङ्क्तौ स्थातव्यम् अभूत्। यत्र निरीक्षणार्थं रक्तं स्वीक्रियते स्म तत्र अपि बहु सम्मर्दः भवति स्म।



दिनत्रयाद् अनन्तरं वयं रक्तनिरीक्षणस्य विषये सूचनां प्राप्तवन्तः.. पुनः वयं चिकित्सालयं गतवन्तः। तस्मिन् दिने तत्र काचित् अपरा महिलाचिकित्सिका उपविष्टा आसीत्।





यदा भवन्तः रुग्णाः भवन्ति तदा कुत्र गच्छन्ति? किं भवद्भिः काश्चन समस्याः अनुभूयन्ते ? स्व-अनुभवानाम् आधारेण एकम् अनुच्छेदं लिखन्तु। सर्वकारीय-चिकित्सालये अमनः कासां कासां समस्यानां साक्षात्कारं कर्तुं बाध्यः जातः? भवतां चिन्तनानुसारं चिकित्सालयः कथं सम्यक्प्रकारेण कार्यं कर्तुं शक्नोति ? चर्चां कुर्वन्तु ।

रञ्जनः एतावद् धनं कथं व्ययीकर्तुं बाध्यः जातः? कारणं ज्ञापयतु ।

निजचिकित्सालयेषु वयं काभिः समस्याभिः बाधिताः भवामः? चर्चां कुर्वन्तु ।

अस्माभिः सर्वकाराय राजस्वं किमर्थं दातव्यं भवति ?

सर्वकारः राजस्वस्य माध्यमेन प्राप्तधनस्य उपयोगं विभिन्न-सार्वजनिक-सेवाः दातुं करोति यतः सर्वे जनाः लाभान्विताः भवन्ति ।

प्रतिरक्षा-आरक्षक-न्यायिक-व्यवस्था-राजमार्गादिभ्यः सेवाभ्यः सर्वे नागराः लाभान्विताः भवन्ति । अन्यथा एतासां सेवानां व्यवस्थां स्वयं नागराः न कर्तुं शक्नुवन्ति ।

राजस्वैः एव केचन विकासात्मकाः कार्यक्रमाः सेवाः च उपलब्धाः भवन्ति यथा शिक्षा स्वास्थ्यं वृत्तिः सामाजिक-कल्याणयोजनाः व्यवसायिक-प्रशिक्षणादयः च भवन्ति यैः आवश्यकतावद्भ्यः नागरेभ्यः लाभः जायते । राजस्वतः प्राप्तधनस्य उपयोगः काभ्यश्चित् प्राकृतिकीभ्यः आपद्भ्यः यथा जलौघात् भूकम्पात् सुनाम्यादिभ्यः इत्यादिभ्यः नागराणां सुरक्षार्थं क्रियते तथा च पुनर्वासकार्यार्थं क्षतिपूर्त्यर्थं च क्रियते । अन्तरिक्ष-परमाणुः तथा च प्रक्षेपास्त्र-सम्बद्ध-कार्यक्रमाः अपि कराणां माध्यमेन एव चाल्यन्ते । सर्वकारः विशेषरूपेण निर्धनेभ्यः काश्चित् सेवाः ददाति याः ते विपणितः न स्वीकर्तुं शक्नुवन्ति । एतस्याः एकम् उदाहरणं स्वास्थ्य-सम्बद्ध-सेवा वर्तते । किं भवन्तः एतादृशम् एकम् उदाहरणं दातुं शक्नुवन्ति ?

सार्वजनिकसेवाः निजस्वास्थ्यसेवाः च

उपर्युक्त-कथायाः माध्यमेन भवन्तः ज्ञातवन्तः स्युः यत् वयं स्थूलरूपेण स्वास्थ्यसेवाः द्वयोः भागयोः विभक्तुं शक्नुमः—

अ) सार्वजनिकस्वास्थ्यसेवाः

ब) निजस्वास्थ्यसेवाः

सार्वजनिकस्वास्थ्यसेवाः

सार्वजनिक-स्वास्थ्यसेवा स्वास्थ्यकेन्द्राणां चिकित्सालयानां च काचित् शृङ्खला वर्तते या सर्वकारेण सञ्चाल्यते । एतानि केन्द्राणि चिकित्सालयाः च परस्परं सम्बद्धाः सन्ति यस्मात् एते नागरेषु ग्रामीणेषु च क्षेत्रेषु सुविधाः प्रददति तथा च सर्वेषां रोगाणां (साधारणतः विशेष-निरीक्षा-अपेक्षितरोगाणां) निवारणं कुर्वन्ति । ग्रामीणस्तरे कश्चित् स्वास्थ्यकेन्द्रं भवति यत्र प्रायः एका परिचारिका कश्चित् ग्राम-स्वास्थ्य-सेवकः भवति । एते सामान्यरोगस्य चिकित्सार्थं प्रशिक्षिताः भवन्ति तथा च प्राथमिक-स्वास्थ्य-केन्द्रस्य चिकित्सकानां निरीक्षणे कार्यं कुर्वन्ति । ग्रामीणेषु क्षेत्रेषु एतादृशं केन्द्रं बहूनां ग्रामाणाम् आवश्यकताः पूरयति । मण्डलस्तरेण कश्चित् मण्डलीयः चिकित्सालयः भवति यः एतेषां सर्वेषां चिकित्सालयानां निरीक्षणं करोति । महत्सु नगरेषु अनेके सर्वकारीय-चिकित्सालयाः भवन्ति एतेषु कश्चित् सः आसीत् यत्र अमनः नीतः आसीत् तथा च एतादृशाः अपि विशिष्टाः चिकित्सालयाः सन्ति येषां वर्णनं हाकिम-शेखस्य कथायाम् अभवत् ।

एताः स्वास्थ्यसेवाः बहुभिः कारणैः सार्वजनिकसेवाः इति उच्यन्ते । सर्वकारः सर्वेषां नागरिकाणां कृते स्वास्थ्यसेवाः प्रदातुं वचनबद्धः अस्ति । एतां वचनबद्धतां पूरयितुम् एते चिकित्सालयाः स्वास्थ्यकेन्द्राणि च स्थापितानि सन्ति । एताः सेवाः सञ्चालयितुं धनस्य व्यवस्था जनैः प्रदत्तेन करेण भवति । अतः एताः सुविधाः सर्वेषां कृते सन्ति । सार्वजनिकस्वास्थ्यव्यवस्थायाः कश्चित् महत्त्वपूर्णः पक्षः अयम् अस्ति यत् एतस्याः उद्देश्यं सुव्यवस्थित-रूपेण निःशुल्करूपेण च अत्यल्प-मूल्येन च स्वास्थ्य-सेवानां प्रदानम् अस्ति यतः निर्धनाः जनाः अपि रोगनिवारणं कर्तुं समर्थाः भवेयुः। स्वास्थ्य-सेवानाम् अन्यत्

महत्त्वपूर्णं कार्यम् अस्ति रोगाणां शमनं यथा क्षयरोग-सन्निपात-ज्वर-पाण्डुरोग-अतिसार-विसूचिका-चिकनगुनिया इत्यादीनां विस्तारस्य नियन्त्रणम् । एतस्य व्यवस्था सर्वकारेण जनानां सहयोगेन करणीया भवति अन्यथा एषा व्यवस्था विफला भविष्यति । उदाहरणार्थं मशकानां प्रजननसम्बन्धि अभियानं सफलीकर्तुम् इदं निश्चेतव्यं स्यात् यत् क्षेत्रस्य सर्वे जनाः स्ववातानुकूलक-यन्त्रेषु गृहछद्याम् इत्यादिषु जलस्य एकत्रीकरणं न भवेत् इति दिशि अवधानवन्तः भवेयुः।

हाकिमशेखस्य प्रकरणं पुनः स्मरन्तु । किं भवन्तः ज्ञातुम् इच्छन्ति यत् तेषां विषये न्यायालयः कीदृशं निर्णयं कृतवान् ?

अस्माकं संविधानस्य अनुसारं जनानां हितानि सुनिश्चेतव्यानि तथा च सर्वे जनाः स्वास्थ्यसेवायाः लाभं प्राप्नुयुः इति सर्वकारस्य प्राथमिकं कर्तव्यम् अस्ति ।

सर्वकारेण प्रत्येकं जनस्य जीवनाधिकारः रक्षणीयः। न्यायालयेन उक्तम् अस्ति यत् हाकिमशेखः यादृशानि कष्टानि सोढवान् तैः तस्य प्राणान्तः अपि भवितुं शक्नोति स्म । यदि कश्चित् चिकित्सालयः उचिते काले कस्मैचित् अपि जनाय स्वास्थ्यसेवां न अदास्यत् तर्हि एतस्य तात्पर्यम् अस्ति यत् तेन तस्मै जनाय जीवनस्य सुरक्षा न दीयते।

न्यायालयेन इदम् अपि उक्तं यत् सर्वकारस्य कर्त्तव्यम् अस्ति यत् सः रोगिणां कृते आवश्यक-स्वास्थ्य-सेवाः दद्यात् यस्याम् आकस्मिकरोग-निवारणस्य सुविधा अपि सम्मिलिता भवेत्। चिकित्सालयः तत्सम्बन्धिनः कर्मचारिणः च स्वस्य आवश्यक-चिकित्सायाः प्रदानस्य दायित्वं सम्पूर्णतया निर्वहेयुः । बहुभिः सर्वकारीय-चिकित्सालयैः हाकिम-शेखस्य चिकित्सा न कृता तैः प्रत्यक्षतः अनङ्गीकृतम् । अतः न्यायालयेन राज्यसर्वकारः उक्तः यत् सः हाकिम-शेखेन चिकित्सायाः कृते यद् धनं व्ययीकृतं तत् सम्पूर्णं धनं तस्मै दद्यात् ।

निजस्वास्थ्यसेवाः

अस्माकं देशे बहुविधाः निज-स्वास्थ्य-सेवाः उपलभ्यन्ते । व्यापक-स्तरे चिकित्सकाः निज-औषधालयान् चालयन्ति । ग्रामीणेषु क्षेत्रेषु पञ्जीकृताः चिकित्सा-व्यवसायिनः (आर.एम.पी.) उपलभ्यन्ते । नागरक्षेत्रेषु व्यापक-सङ्ख्यायां चिकित्सकाः सन्ति येषु बहवः

ग्रामस्य कस्मिंश्चित् स्वास्थ्यकेन्द्रे रुग्ण-महिलायै औषधिं यच्छन्ती काचित् महिलाचिकित्सिका ।

एकस्मिन् सर्वकारीय-चिकित्सालये स्वरुग्णबालकेन सह काचित् महिला । यूनिसेफसंस्थायाः अनुसारं प्रतिवर्षं २० लक्षं शिशवः एतादृशैः सङ्क्रमणैः मृत्युं प्राप्नुवन्ति येषां सङ्क्रमणानां नियन्त्रणं सम्भवम् अस्ति।

केषु केषु अर्थेषु 'सार्वजनिकस्वास्थ्यव्यवस्था' सर्वेषां कृते उपलब्धा सेवा अस्ति ?

केषाञ्चित् स्वास्थ्यकेन्द्राणाम् अथवा चिकित्सालयानां सूचीं कुर्वन्तु ये भवतां गृहस्य पार्श्वे सन्ति । स्व-अनुभवस्य अनुसारम् अथवा तेषु कञ्चित् चिकित्सालयं गत्वा केन्द्रसञ्चालकानां जनानां विषये अपि च तत्र दीयमानानां सुविधानां विषये जानन्तु।

देहलीनगरस्य कस्मिंश्चित् प्रमुखे निजचिकित्सालये शल्यचिकित्सायाः पश्चात् रोगिणां निरीक्षणस्य कश्चित प्रकोष्ठः।

भवतः गृहस्य समीपे काः निजस्वास्थ्यसेवाः विद्यन्ते ? तत्रत्यानां सञ्चालकानां सुविधानां च विषये जानन्तु ?

भारतीयायुर्विज्ञानपरिषदः आयुर्विज्ञान-नैतिकसंहिता कथयति -

यत् यथा सम्भवं प्रत्येकं चिकित्सकः औषधीनां जेनेरिकनामानि एव उपचारचिटिकायां लिखेत् तथा च सुनिश्चेतव्यं यत् इदं युक्तियुक्तं उपयुक्तं च स्यात्।

स्वास्थ्यसेवाः इतोऽपि न्यूनमूल्ययुक्ताः कथं कर्तुं शक्यन्ते? एतस्मिन् विषये चर्चां कुर्वन्तु।

ग्रामीणक्षेत्रेषु प्रायेण किञ्चित् जीपयानम् एव रोगिणां कृते चलौषधालयस्य रूपेण कार्यं करोति।

विशेषज्ञरूपेण कार्यं कुर्वन्ति । निजरूपेण सञ्चाल्यमानाः केचन चिकित्सालयाः परिचारिका-गृहाणि च सम्मिलितानि सन्ति । व्यापक-सङ्ख्यायां प्रयोगशालाः सन्ति याः परीक्षणं कुर्वन्ति अपि च विशिष्ट-सुविधाः यच्छन्ति यथा एक्स्रे-अल्ट्रासाउंड इत्यादयः। एतादृशाः आपणाः अपि सन्ति यतः वयम् औषधानि क्रेतुं शक्नुमः। यथा एतस्याः नाम्ना एव ज्ञायते निजस्वास्थ्य-सेवासु सर्वकारस्य स्वामित्वं नियन्त्रणं वा न भवति । सार्वजनिक-स्वास्थ्य-सेवानां विपरीततया एतासु निजस्वास्थ्य-संस्थासु रोगिभिः प्रत्येकं सेवायाः कृते आधिक्येन धनस्य व्ययः करणीयः भवति।

अद्यत्वे निजस्वास्थ्यसेवाः सर्वत्र दृश्यन्ते । अधुना तु महान्तः व्यवसायिसमूहाः चिकित्सालयान् अपि सञ्चालयन्ति । केचन व्यवसायिसमूहाः औषध-निर्माणकार्ये तस्य विक्रयणे च संलग्नाः सन्ति । नगरे प्रत्येकं भागे औषधानाम् आपणाः द्रष्टुं शक्यन्ते।

स्वास्थ्यसेवाः समानताः च - किं सर्वेषां कृते पर्याप्तमात्रया स्वास्थ्यसेवाः उपलब्धाः सन्ति ?

अधुना भारते तथा परिस्थितयः सन्ति यत्र निजसेवाः तु वर्धन्ते परन्तु सार्जनिकसेवाः न वर्धन्ते । एतादृश्यां स्थितौ जनाः केवलं निजसेवाः एव प्राप्नुवन्ति । एताः नागरेषु क्षेत्रेषु एव उपलब्धाः सन्ति । एतासां सेवानां मूल्यम् अपि अपेक्षातः अधिकं भवति । औषधानि बहुमूल्यानि भवन्ति । बहवः जनाः औषधानि क्रेतुं समर्थाः न भवन्ति अतः यदा परिवारे रोगः जायते तदा ते ऋणं गृहीत्वा चिकित्सां कारयन्ति।

काश्चन निजसेवाः अधिकम् अर्जयितुं प्रायः एतादृशानि कार्याणि प्रोत्साहयन्ति यानि उचितानि न सन्ति । कदाचित् अल्प-मूल्यकेषु उपायेषु विद्यमानेषु सत्सु अपि रोग-निवारणार्थं ते उपायाः न प्रयुज्यन्ते । उदाहरणार्थं प्रायेण दृश्यते यत् केचन चिकित्सकाः निरर्थकम् औषधानि लिखन्ति यासां कदाचित् आवश्यकता अपि न स्यात् यथा यदि साधारण-चिकित्सा अपि पर्याप्ता भवितुं शक्नोति तथापि सूच्यौषधस्य अथवा सेलाइनादिकस्य विषये परामर्शं यच्छन्ति।

तथ्यम् इदम् अस्ति यत् जनसङ्ख्यायाः 20 प्रतिशतं जनाः एव रोगकाले आवश्यकौषधानि क्रेतुं समर्थाः भवन्ति । ते जनाः अपि यान् वयम् एते निर्धनाः न सन्ति इति अभिजानीमः ते अपि औषधानां व्ययस्य भारं निर्वोढुं कष्टम् अनुभवन्ति । एकस्मात् अध्ययनात् ज्ञातं यत् ये जनाः चिकित्सालये केनचित् रोगेण अथवा व्रणितावस्थायां प्रवेशं स्वीकुर्वन्ति तेषु चत्वारिंशत् प्रतिशतं जनाः चिकित्सा-व्ययार्थं रूप्यकाणि ऋणरूपेण स्वीकुर्वन्ति अथवा स्वसम्पत्तेः कञ्चित् भागं विक्रीणन्ति ।

एषा गर्भवती महिला स्वस्य निरीक्षणं योग्यचिकित्सकस्य समीपे कारयितुं पद्भ्यां दूरं चलितुं बाध्या अस्ति ।

निर्धनजनानां कृते परिवारे प्रत्येकं रोगः चिन्तायाः कष्टस्य च कारणरूपं भवति । एतस्माद् अपि महत्त्वपूर्णं तथ्यम् इदम् अस्ति यत् एतादृशी स्थितिः पौनःपुन्येन आगच्छति । निर्धनाः पूर्वम् एव कुपोषणग्रस्ताः भवन्ति । एते परिवाराः तावन्मात्रया भोजनं न कुर्वन्ति यावन्मात्रया तैः भोक्तव्यं भवति । तेषां कृते जीवनस्य आधारभूताः आवश्यकता-अनुगुणाः सुविधाः यथा पानीयं जलं गृहस्य कृते पर्याप्तस्थानं स्वच्छवातावरणादीनि न उपलभ्यन्ते । अतः तेषां मध्ये रोगोत्पतेः सम्भावना अधिका भवति । रोगनिवारणे यः व्ययः भवति तस्मात् कारणात् तेषां स्थितिः इतोऽपि असमीचीना जायते ।

कदाचित् केवलं धनकारणात् एव जनाः उत्तमां चिकित्सां न कारयितुं पारयन्ति इति अपि नास्ति । उदाहरणार्थं महिलाः शीघ्रम् एव चिकित्सकस्य पार्श्वे रोगनिवारणार्थं न प्रापयन्ति । अनेकेषु आदिवासिक्षेत्रेषु स्वास्थ्यकेन्द्राणि न्यूनानि सन्ति तथा च तानि अपि सम्यग्रूपेण न चलन्ति । तत्र निजस्वास्थ्यसेवाः न विद्यन्ते ।

किं कर्तुं शक्यते ?

अत्र कश्चित् अपि सन्देहः नास्ति यत् अस्माकं देशे जनानां स्वास्थ्यस्य स्थितिः सम्यक् नास्ति । एतत् सर्वकारस्य उत्तरदायित्वम् अस्ति यत् सः सर्वेभ्यः नागरेभ्यः विशेषतया निर्धनानां सुविधाहीनानां च जनानां कृते गुणात्मक-स्वास्थ्य-सेवानाम् उपलब्धिं कारयेत् । पुनरपि जनानां स्वास्थ्यं यावद् जीवनस्य आधारभूतानां सुविधानां कृते तथा च सामाजिक-स्थितौ आश्रितम् अस्ति तावद् एव स्वास्थ्य-सेवानाम् अपि आश्रितम् अस्ति । अतः जनानां स्वास्थ्यसेवायाः अवस्थां परिष्कर्तुम् उभयोः पक्षयोः कार्यं भवेत् इति आवश्यकम् अस्ति । एतत् कर्तुं शक्यते । अग्रिमे पृष्ठे प्रदत्तानि उदहरणानि पश्यन्तु-

आन्ध्रप्रदेशराज्यस्य पुनर्सङ्घटनानन्तरं जूनमासस्य द्वितीयदिनाङ्के 2014 तमे वर्षे तेलङ्गाना भारतस्य एकोनत्रिंशततमं राज्यं जातम् ।

उपरिप्रदत्तस्य भारतस्य मानचित्रे केरलराज्यं पाटलवर्णेन दर्शितम् अस्ति ।

एतस्य पुस्तकस्य १२३ तमे पृष्ठे भारतस्य मानचित्रं प्रदत्तम् अस्ति । एतस्मिन् मानचित्रे स्वाङ्कन्या केरलराज्यस्य आकृतिं रचयतु ।

केरलराज्यस्य अनुभवः

1996 तमे वर्षे केरलसर्वकारेण कानिचन महत्त्वपूर्णानि परिवर्तनानि कृतानि । राज्यस्य सम्पूर्णस्य वार्षिक-आय-व्ययविवरणपत्रस्य 40 प्रतिशतं पञ्चायतानां कृते प्रदत्तम् । एतेन धनेन पञ्चायतानि स्वावश्यकताः योजनाबद्धाः कृत्वा तासां पूर्तिं कर्तुं शक्नुवन्ति स्म । एतेन ग्रामस्य कृते पेयजलम् आहारः महिलानां विकासाय शिक्षादीनां कृते च उचितव्यवस्थायाः सुनिश्चितीकरणं सम्भवं जातम् । एतस्मात् परिणामतः जलवितरणव्यवस्थायाः निरीक्षणं जातम् । विद्यालयानां बालवाटिकानां च कार्यं निर्धारितं तथा च ग्रामीणसमस्यानां विषये विशेषतया ध्यानं दत्तम् । स्वास्थ्यकेन्द्रेषु अपि परिष्कारः कृतः । एतैः सर्वैः कार्यैः स्थितिः समीचीना जाता । एतावतां प्रयत्नानाम् अनन्तरम् अपि काश्चन समस्याः यथावत् स्थिताः, यथा औषधानां न्यूनता चिकित्सालयेषु अपर्याप्ताः शय्याः चिकित्सकानाम् अपर्याप्तता इत्यादि । एतासां समस्यानां दूरीकरणम् आवश्यकम् अस्ति ।

आगच्छन्तु अधुना कस्यचित् अन्यस्य देशस्य उदाहरणं पश्यामः तथा च स्वास्थ्यसम्बद्धविषयेषु तेषां कार्यपद्धतिं जानीमः।

कोस्टारिकायाः शैली

कोस्टारिका दक्षिण-अमेरिकायाः सर्वतः अधिकः स्वस्थदेशः मन्यते । एतस्य मुख्यकारणं तस्य संविधाने निहितम् अस्ति । बहुभ्यः वर्षेभ्यः प्राक् कोस्टारिकया कश्चित् महत्त्वपूर्णः निर्णयः स्वीकृतः आसीत् यत् कोस्टारिका देशे सैन्यं न स्थापयिष्यति । एतस्मात् सेनायां यः व्ययः भवति स्म तस्य धनस्य उपयोगः जनानां स्वास्थ्यस्य शिक्षायाः तथा च अन्यासाम् आधारभूतानाम् आवश्यकतानां कृते कृतः । कोस्टारिकायाः सर्वकारः मन्यते यत् देशस्य विकासार्थं देशस्य स्वास्थ्यम् आवश्यकम् अस्ति तथा च एतस्मात् कारणात् एव तत्रत्यः सर्वकारः स्वस्य देशवासिनां स्वास्थ्यस्य विषये महद् अवधानं करोति । कोस्टारिकायाः सर्वकारः स्वस्य सर्वेभ्यः निवासिभ्यः स्वास्थ्यस्य कृते मूलभूतसेवाः सुविधाः च प्रयच्छति यथा पेयजलं स्वच्छतां पोषणम् आवासं च । स्वास्थ्यस्य शिक्षा अतीव महत्त्वपूर्णा मन्यते तथा च सर्वेषु स्तरेषु "स्वास्थ्य-सम्बन्धि-ज्ञानं" शिक्षायाः कश्चित् आवश्यकः भागः अस्ति ।

अभ्यासः

1 अस्मिन् अध्याये भवद्भिः पठितम् अस्ति यत् स्वास्थ्ये केवलं रोगस्य चर्चा न कर्तुं शक्यते । संविधानतः स्वीकृतम् अंशम् अत्र पठन्तु तथा च स्वशब्देषु ज्ञापयन्तु यत् "जीवनस्तरस्य सार्वजनिकस्वास्थ्यस्य च के मानकबिन्दवः भविष्यन्ति ।

2 सर्वेषां कृते स्वास्थ्यसुविधाः दातुं सर्वकारः कान् कान् प्रयासान् कर्तुं शक्नोति ? चर्चां कुर्वन्तु ।

3 भवन्तः स्वक्षेत्रे उपलब्धानां सार्वजनिकसेवानां निजस्वास्थ्यसेवानां च मध्ये काः काः विभिन्नताः पश्यन्ति ? अधोलिखिततालिकां पूरयन् एतेषां तुलनां कुर्वन्तु तथा च अन्तरं ज्ञापयन्तु ।

संविधानस्य एकः महत्त्वपूर्णः भागः एतत् कथयति यत् पोषाहारस्तरस्य जीवनस्तरस्य च उन्नयनं तथा च लोकस्वास्थ्यस्य परिष्कारः राज्यसर्वकारः दायित्त्वम् अस्ति ।

सुविधा	*सामर्थ्यम्*	*उपलब्धता*
गुणवत्ता		
निजः		
सार्वजनिकः		

4. जलस्य स्वच्छतायाः च गुणवत्तायाः परिष्कारं कृत्वा अनेकेषां रोगाणां नियन्त्रणं कर्तुं शक्यते । उदाहरणं प्रदर्श्य इदं कथनं स्पष्टीकरोतु ।

शब्द-सङ्कलनम्

सार्वजनिकः – *सा सेवा अथवा तत् कार्यं भवति यः देशस्य सर्वेषां जनानां कृते अस्ति तथा च मुख्यरूपेण सर्वकारेण आयोज्यते । एतस्यां विद्यालयाः चिकित्सालयाः संचारसेवाः च सम्मिलिताः सन्ति । जनाः एतासां सेवानां याचनां कर्तुं शक्नुवन्ति तथा च यदि संस्थाः सम्यग्-रूपेण कार्यं कर्तुं समर्थाः न भवेयुः तदा जनाः एतासु आक्षेपं कर्तुं शक्नुवन्ति ।*

निजी - *सा सेवा अथवा तत्कार्यं यत् केनचित् जनेन अथवा केनचित् व्यवसायिसमूहेन स्वलाभार्थम् आयोजितः स्यात् ।*

चिकित्सापर्यटकः – *एते ते वैदेशिकपर्यटकाः सन्ति ये एतस्य देशस्य तेषु चिकित्सालयेषु स्वचिकित्सां कारयितुं विशेषरूपेण आगच्छन्ति यत्र स्वदेशस्य तुलनायां न्यूनतमे मूल्ये विश्वस्तरीयाः सुविधाः उपलभ्यन्ते ।*

सङ्क्रामकरोगाः - *एते रोगाः तादृशाः भवन्ति ये परस्परम् अन्योऽन्यं प्रति सञ्चारिताः भवन्ति यथा भोजनेन जलेन वायुना च गच्छन्ति ।*

ओ.पी.डी. – *एतत् बाह्यरोगिविभागस्य संक्षिप्तरूपम् अस्ति । चिकित्सालये कस्मिंश्चित् विशिष्टे विभागे प्रवेशात् पूर्वं रोगिणः बाह्यरोगिविभागं गच्छन्ति ।*

नैतिकाचारः – *कस्यापि जनस्य व्यवहारं प्रभावयितुं नैतिकसिद्धान्ताः ।*

जेनेरिकनाम – *औषधीनां रासायनिक-नामानि । तानि औषधिषु प्रयुक्तसामग्रीः परिचेतुं साहाय्यं कुर्वन्ति । ते वैश्विकस्तरे मान्यताप्राप्ताः सन्ति। उदाहरणार्थम् एसिटाइल-सालिसैलिक-एस्पिरिन इत्यस्य जेनेरिकनाम अस्ति ।*

अध्याय 3

कस्य दायित्वम् ?



विधायकः कः भवति?

उपर्युक्ते भागे भवन्तः पातालपुरस्य कासाञ्चित् घटनानां विषये पठितवन्तः। भवन्तः प्रायेण मण्डलाधीश-चिकित्साधिकारि-सदृशानाम् अधिकारिणां नामभिः परिचिताः स्युः। परन्तु किं भवन्तः विधायकस्य विधानसभायाः च विषये श्रुतवन्तः? किं भवन्तः स्वक्षेत्रस्य विधायकस्य अर्थात् एम.एल.ए. इत्यनेन परिचिताः सन्ति ? किं भवन्तः जानन्ति यत् सः केन दलेन सम्बद्धः अस्ति ?

पातालपुरे किं भवति ?

एषा समस्या एतावती गभीरा किमर्थम् अस्ति ?

भवतां मतानुसारम् उपर्युक्त-स्थितौ के के प्रयासाः कर्तुं शक्यन्ते अथवा किं कर्तुं शक्यते अपि च भवताम् अनुसारं केन एतत् कार्यं करणीयं स्यात् । भवन्तः एतस्मिन् विषये किं चिन्तयन्ति ?

स्वशिक्षकेण सह एतासां शब्दावलीनां विषये चर्चां कुर्वन्तु – सामान्यसभा भारतस्य राज्यानि निर्वाचनक्षेत्राणि बहुमतं सत्तारूढदलं विरोधिदलं च।

किं भवन्तः स्वराज्यस्य सन्दर्भे एतेषाम् उदाहरणानि दातुं शक्नुवन्ति – बहुमतं, सत्तारूढदलं विरोधिदलं च?

आन्ध्रप्रदेश-राज्यस्य पुनर्घटनानन्तरं जूनमासस्य द्वितीये दिनाङ्के 2014 तमे वर्षे तेलङ्गाना भारतस्य एकोन-त्रिंशत्तमं राज्यं जातम्।
उपरिप्रदत्ते मानचित्रे हिमाचल-प्रदेशः हरितवर्णेन चित्रितः अस्ति।
एतस्य पुस्तकस्य 123 तमे पृष्ठे प्रदत्तस्य भारतस्य मानचित्रे अङ्कन्या एतेषाम् आकृतिं रचयन्तु-
i)भवन्तः यस्मिन् राज्ये निवसन्ति तस्य आकृतिं रचयन्तु।
ii) हिमाचल-प्रदेश-राज्यस्य।

विधानसभायाः सदस्यः विधायकः (एम.एल.ए) इति उच्यते । एम.एल.ए." मेम्बर-आफ-लेजिस्लेटिव-असेम्बली" इत्यस्य संक्षिप्तरूपम् अस्ति।

विधान-सभा-सदस्यस्य चयनं जनताद्वारा क्रियते । पुनः ते लेजिस्लेटिव-असेंबली इत्यस्य अर्थात् विधान-सभायाः सदस्याः भवन्ति अपि च सर्वकारं निर्मान्ति । अनेन प्रकारेण वयं कथयितुं शक्नुमः यत् विधायकाः जनतायाः प्रतिनिधित्वं कुर्वन्ति । अधोलिखितेन उदाहरणेन इदं तथ्यम् इतोऽपि स्पष्टं भविष्यति।

भारतस्य प्रत्येकं राज्ये विधानसभा अस्ति । प्रत्येकं राज्यम् अनेकेषु निर्वाचनक्षेत्रेषु विभक्तम् अस्ति । उदाहरणार्थम् अत्र प्रदत्तं मानचित्रं पश्यतु । एतस्मिन् दर्शितम् अस्ति यत् हिमाचल-प्रदेशः 68 निर्वाचनक्षेत्रेषु विभक्तः अस्ति । प्रत्येकस्मिन् निर्वाचनक्षेत्रे जनता प्रतिनिधिं चिनोति यः विधानसभायाः सदस्यः अर्थात् विधायकः भवति । भवन्तः दृष्टवन्तः स्युः यत् निर्वाचने जनाः विभिन्नेभ्यः दलेभ्यः निर्वाचने भागं गृह्णन्ति । अतः एते विधायकाः पृथक् पृथक् दलैः सह सम्बद्धाः भवन्ति।

ये जनाः विधायकाः भवन्ति, ते मन्त्रिणः अथवा उपमुख्यमन्त्रिणः कथं जायन्ते ? यस्य राजनैतिक-दलस्य विधायकाः अर्धाधिक-निर्वाचन-क्षेत्रेषु विजयं प्राप्नुवन्ति राज्ये तत् दलं बहुमते अस्ति इति मन्यते । यस्मै राजनैतिकसमूहाय बहुमतं प्राप्तं भवति सः सत्तापक्षः तथा च इतरे सर्वे विरोधि-पक्षिणः इति उच्यन्ते । उदाहरणार्थं हिमाचल-प्रदेशस्य विधानसभायां विधायकानां 68 निर्वाचनक्षेत्राणि सन्ति।

जम्मूराज्यं कश्मीरराज्यं च

हिमाचलप्रदेशस्य 2003 तमस्य वर्षस्य विधानसभानिर्वाचनस्य परिणामः	
राजनैतिकदलानि	*निर्वाचितसदस्यानां सङ्ख्या*
भारतीय-राष्ट्रिय-काङ्ग्रेस-दलम् (आई.एन.सी).....	*43*
भारतीय-जनता-दलम् (बी.जे.पी.)	*16*
अन्यराजनैतिकदलम्	*03*
निर्दलीयाः (ये केनापि दलेन सम्बद्धाः न सन्ति)	*06*
सम्पूर्णः योगः	68

विभिन्नानां राजनैतिक-दलानां प्रत्याशिभिः 2003 तमस्य वर्षस्य विधानसभायाः निर्वाचनं जितं तथा च ते विधायकपदम् अलङ्कृतवन्तः। विधानसभायां सम्पूर्ण-विधायकानां सङ्ख्या 68 वर्तते । अतः बहुमतं प्राप्तुं कस्यापि राजनैतिक-दलस्य कृते चतुस्त्रिंशत्तः (34) अधिकानां विधायकानाम् आवश्यकता भविष्यति । भारतीय-राष्ट्रिय-काङ्ग्रेस-दलस्य पार्श्वे 43 विधायकाः आसन् तस्मात् कारणात् ते बहुमतं प्राप्तवन्तः तथा च ते सत्ताधारिदलस्य सदस्याः जाताः। अन्ये सर्वे विधायकाः विरोधिदलस्य सदस्याः जाताः। एतस्मिन् उदाहरणे भारतीय-जनतादलं मुख्यविरोधि-दलरूपेण भागं गृहीतवान् यतोहि भारतीयराष्ट्रिय-काङ्ग्रेस-दलानन्तरं सर्वाधिकाः विधायकाः तस्य एव दलस्य आसन् । विरोधिपक्षे अन्यानि दलानि अपि आसन् तथा च केचन निर्दलीयाः प्रत्याशिनः अपि आसन् ये निर्वाचनं विजित्य आगतवन्तः आसन् ।

निर्वाचनान्तरं सत्ताधारि-दलस्य विधायकाः स्वस्य नेतुः चयनं कुर्वन्ति यः मुख्यमन्त्रि-पदम् अलङ्करोति । एतस्मिन् उदाहरणे काङ्ग्रेसदलेन स्वविधायक-नेतृरूपेण वीरभद्रसिंहः चितः तथा च सः मुख्य-मन्त्रिपदम् अलङ्कृतवान् । एतदनन्तरं मुख्यमन्त्री मन्त्रिणां चयनं करोति । निर्वाचनान्तरं राज्यस्य राज्यपालः मुख्य-मन्त्रिणां मन्त्रिणां च नियुक्तिं करोति ।

मुख्य-मन्त्रिणां तथा च अन्यमन्त्रिणाम् इदं दायित्वं भवति यत् ते शासनस्य विभागानां मन्त्रालयानां च सञ्चालनं कुर्युः। तेषां विभिन्नाः कार्यालयाः भवन्ति । विधानसभा एतादृशं स्थानं भवति यत्र सर्वे विधायकाः, ते सत्ताधारि-दलस्य भवेयुः अथवा विरोधिदलस्य वा भवेयुः विभिन्नेषु विषयेषु चर्चार्थम् एकत्रिताः भवन्ति ।

स्वप्रदेशस्य विषये तादृशीम् अनुमानित-सङ्ख्यां जानन्तु यथा भवद्भिः हिमाचलप्रदेशस्य तालिकायां दृष्टम् । ताः सङ्ख्याः तालिकायाः रूपेण दर्शयन्तु

राज्यस्य प्रमुखः राज्यपालःइति उच्यते । तस्य नियुक्तिः केन्द्रसर्वकारेण एतत् सुनिश्चेतुं क्रियते यत् राज्यसर्वकारः संविधानस्य नियमानाम् अधिनियमानां च अनुसारं स्वकार्यस्य सम्पादनं कुर्यात् ।

कदाचित् सत्ताधारिदलं कस्यचित् एकस्य एव दलस्य न भूत्वा विभिन्नैः राजनैतिकदलैः मिलित्वा जायते। सः एव गठबन्धनसर्वकारः इति उच्यते । स्वशिक्षकेण सह एतस्मिन् विषये चर्चां कुर्वन्तु।

अनेन प्रकारेण केषाञ्चित् विधायकानां समीपे द्विविधं दायित्वं भवति एकं तु विधायक-रूपेण तथा च अपरं मन्त्रिरूपेण। एतस्मिन् विषये वयम् अग्रे पठिष्यामः।

विधानसभायां काचित् चर्चा

आफरीनः सुजाता तथा च तस्य विद्यालयस्य अनेकैः विद्यार्थिभिः विधानसभां द्रष्टुं राजधान्याः यात्रा कृता। विधानसभा एकस्मिन् अत्यन्ते भव्ये तथा च प्रभावशालि-भवने स्थिता आसीत्। बालाः अतीव उत्सुकाः आसन्। सुरक्षा-निरीक्षणानन्तरं ते उपरि नीताः। उपरि काचित् दर्शकदीर्घा आसीत् यतः ते अधस्तनं विशालं सभाकक्षं द्रष्टुं शक्नुवन्ति स्म। सभागारे उत्पीठिकानाम् अनेकाः पङ्क्तयः आसन्।

इयं विधानसभा तेषु दिनेषु कस्याश्चित् तत्कालीन-समस्यायाः विषये चर्चां करोति स्म। विधान-सभायाः चर्चायां विधायकाः स्व-अभिमतिं प्रकटयितुं शक्नुवन्ति सम्बन्धितविषये प्रश्नान् प्रष्टुं शक्नुवन्ति अथवा परामर्शान् दातुं शक्नुवन्ति यत् सर्वकारेण एतस्मिन् विषये किं करणीयं स्यात्। सदस्याः एतस्मिन् विषये याम् अपि प्रतिक्रियां व्यक्तीकर्तुम् इच्छन्ति तां व्यक्तीकर्तुं शक्नुवन्ति तदनन्तरं मन्त्रिणः प्रश्नानाम् उत्तराणि यच्छन्ति तथा च सदनं आश्वस्तीकुर्वन्ति यत् आवश्यकाः प्रयासाः क्रियन्ते।

मुख्यमन्त्रिभिः अन्यमन्त्रिभिः च निर्णयाः स्वीकर्तव्याः भवन्ति अपि च सर्वकारस्य सञ्चालनं करणीयं भवति। वयं प्रायः तेषां निर्णयानां विषये शृणुमः अथवा तेषां विषये समाचार-पत्रेषु पठामः पश्यामः वा। अपरञ्च ये निर्णयाः स्वीक्रियन्ते ते विधान-सभा-सदस्यैः अनुमोदिताः भवेयुः। लोकतन्त्रे विधान-सभा-सदस्याः मन्त्रिभ्यः मुख्यमन्त्रिणः च प्रश्नान् प्रष्टुम् अर्हन्ति कस्मिंश्चित् महत्त्वपूर्णे च विषये चर्चां कर्तुं शक्नुवन्ति निर्णयान् स्वीकर्तुं शक्नुवन्ति यत् धनं कुत्र व्ययीकरणीयम् इत्यादिः। इत्थं मुख्याधिकारः तेषाम् एव भवति।

प्रथमः विधायकः – मम निर्वाचन-क्षेत्रान्तर्गतम् अखण्डग्रामे विगतेभ्यः त्रिभ्यः सप्ताहेभ्यः विसूचिकायाः कारणतः पञ्चदशानां जनानां मृत्युर्जातः। मम विचारानुसारं सर्वकारस्य इयं लज्जास्पद-स्थितिः अस्ति। अयं सर्वकारः यः आत्मानं प्रौद्योगिकक्षेत्रे सर्वश्रेष्ठं मन्यते विसूचिका-सदृशस्य सामान्यरोगस्य नियन्त्रणे असफलः जायते। वयं स्वास्थ्य-मन्त्रि-महोदयस्य अवधानम् एतस्मिन् विषये आकर्ष्टुम् इच्छामः यत् सः स्थितिं नियन्त्रयितुं तत्कालम् आवश्यक-प्रयासान् कुर्यात्।

द्वितीयः विधायकः – मम प्रश्नः अयम् अस्ति यत् सर्वकारीय-चिकित्सालयानां स्थितिः तावती दयनीया किमर्थम् अस्ति ? सर्वकारः मण्डलीय-चिकित्सालयेषु वैद्यानां चिकित्सा-कर्मचारिणां च नियुक्तिं सम्यक्तया किमर्थं न करोति ? अहं इदम् अपि ज्ञातुम् इच्छामि यत् सर्वकारः एतस्याः परिस्थितेः सम्मुखीकरणं केन प्रकारेण करिष्यति, यतः जनाः व्यापक-सङ्ख्यायां प्रभाविताः सन्ति अपि च इयं सङ्ख्या अनुदिनं वर्धते एव ? इदानीम् इयं महारोगस्य रूपेण प्रसृता अस्ति।

तृतीयः विधायकः – मम निर्वाचनक्षेत्रे तोलपट्ट्याम् अपि जलस्य न्यूनतायाः गभीरा समस्या अस्ति। महिलाभिः जलम् आनेतुं किलोमीटर-चतुष्टय-परिमितं पञ्चकिलो-मीटर-परिमितं वा पादाभ्यां गन्तव्यं भवति। अहं ज्ञातुम् इच्छामि यत् जलं प्रापयितुं कियतां जलगार-ट्रक-यानानां प्रयोगः क्रियते ? कियतां कूपानां तडागानां च स्वच्छतां कारयित्वा ते सङ्क्रमणमुक्ताः कृताः ?

चतुर्थः विधायकः – अहम् अनुभवामि यत् मम मित्राणि समस्यां विस्तारीकृत्य ज्ञापयन्ति। सर्वकारेण स्थितिं नियन्त्रयितुं प्रयासाः कृताः। जलस्य जलगार-ट्रक-यानानां प्रयोगः क्रियते। ओ.आर.एस. इत्यस्य पुटकानि वितीर्यन्ते। सर्वकारः जनानां साहाय्यर्थं बहुविधान् प्रयासान् करोति।

पञ्चमः विधायकः - अस्माकं चिकित्सालयेषु सुविधानां स्थितिः शोचनीया अस्ति। बहवः एतादृशाः चिकित्सालयाः सन्ति येषु कश्चित् अपि वैद्यः नास्ति तथा च चिकित्सा-कर्मचारिणां नियुक्तिः बहुभ्यः वर्षेभ्यः न जाता अस्ति। अपरस्मिन् चिकित्सालये चिकित्सकाः दीर्घकालीनेषु अवकाशेषु सन्ति। इयं लज्जास्पदस्थितिः अस्ति। मम चिन्तनस्य अनुसारं स्थितिः अतीव शोचनीया जाता अस्ति। वयं कथम् आश्वस्ताः भवेम यत् प्रभावितक्षेत्रस्य सर्वैः परिवारैः ओ.आर.एस. इत्यस्य पुटकानि प्राप्तव्यानि स्युः?

षष्ठः विधायकः – विरोधिपक्षस्य सदस्याः अकारणमेव सर्वकारे दोषारोपणं कुर्वन्ति। गतसर्वकारेण स्वच्छतायाः विषये किञ्चिद् अवधानं न कृतम् आसीत्। अधुना अस्माभिः बहुभ्यः वर्षेभ्यः परितः प्रकीर्णस्य अवकरं स्वच्छीकारयितुम् अभियानं प्रारब्धम् अस्ति।

किं प्रदत्ते चित्रे भवन्तः सत्तापक्षस्य विपक्षस्य च विधायकान् परिचेतुं शक्नुवन्ति? सत्तापक्षस्य विधायकान् एकेन वर्णेन विपक्षिविधायकान् च अपरेण वर्णेन वर्णयन्तु।



ये विधायकाः चिन्तयन्ति स्म यत् सर्वकारः स्थितिं गभीरतया न स्वीकरोति, ते मुख्यरूपेण कान् कान् तर्कान् यच्छन्ति स्म?

यदि भवान् स्वास्थ्यमन्त्री अभविष्यत् तर्हि उपर्युक्तायाः चर्चायाः उत्तरं केन प्रकारेण अदास्यत्?

भवतां विचारेण किम् उपर्युक्तचर्चा केषुचित् अर्थेषु उपयोगिनी आसीत्? कथम्? चर्चां कुर्वन्तु।

व्याख्यां कुर्वन्तु यत् सर्वकारस्य कार्यप्रणाल्यां कश्चित् सामान्यः विधायकः तथा च सः विधायकः यः मन्त्री अपि अस्ति द्वयोः किम् अन्तरम् अस्ति?

उक्ते भागे भवन्तः विधानसभायां जायामानायाः चर्चायाः विषये पठितवन्तः। सदस्याः सर्वकारेण कृतस्य कार्यस्य अथवा अकृतकार्यस्य च विषये चर्चां कुर्वन्ति स्म । एतादृशम् एतदर्थम् अस्ति यतोहि विधायकाः सामूहिकरूपेण सर्वकार-कार्यस्य कृते उत्तरदायिनः भवन्ति।
शासनस्य विभिन्नविभागाः, तेषां प्रभारिणः मन्त्रिणः च इत्येतत् सर्वं मिलित्वा सर्वकारशब्दस्य सामान्यभाषायां तात्पर्यम् अस्ति।

एतेषां सर्वेषां मन्त्रिणां सामूहिकप्रमुखः मुख्यमन्त्री भवति। वास्तविकरूपेण एषः एव सर्वकारस्य कार्यकारिभागः अर्थात् कार्यपालिका इति उच्यते । अपरस्मिन् पक्षे सर्वे विधायकाः ये विधानसभायां एकत्र भवन्ति विधायिका इति उच्यते । विधायिकायाः रूपेण सर्वकारस्य कार्यकारिभागाय कार्य्यं कर्तुम् अधिकारं यच्छन्ति तथा च पुनः तस्य कार्यस्य निरीक्षणम् अपि कुर्वन्ति । यथा भवद्भिः पाठस्य प्रारम्भे दृष्टम् आसीत् एतेभ्यः एव चित्वा कश्चित् कार्य-पालिकायाः प्रमुखः क्रियते अथवा मुख्यमन्त्रिपदे अलङ्क्रियते।

शासनस्य कार्यप्रणाली

केवलं विधान-सभायाम् एव सर्वकारस्य कार्यस्य विषये आक्षेपः अपि च सर्वकारतः क्रियान्वयनस्य याचना न क्रियते । भवन्तः नियमितरूपेण समाचारपत्राणि दूरदर्शन-प्रणालिकाः अन्यसङ्घटनानि च सर्वकारस्य विषये चर्चां कुर्वतः पश्यन्ति । लोकतन्त्रे अनेकैः माध्यमैः जनाः स्वविचाराणाम् अभिव्यक्तिं कुर्वन्ति तथा च विरुद्ध्य कार्यं कुर्वन्ति। एतादृशम् एव कञ्चित् उपायम् अत्र पश्यन्तु।
विधानसभायां चर्चानन्तरं स्वास्थ्यमन्त्रिणा संवाददातृ-वार्ता आयोजिता । एतस्यां विभिन्नानां समाचारपत्राणां प्रतिनिधयः व्यापक-सङ्ख्यायाम् आगतवन्तः। एतस्यां मन्त्री तथा च केचन शासकीयाः अधिकारिणः अपि उपस्थिताः आसन् । मन्त्रिणा सर्वकारेण क्रियामाणानां प्रयासानां विषये प्रतिपादितम् । एतस्यां प्रेसवार्तायां समाचारपत्राणां संवाद-दातारः अनेकान् प्रश्नान् पृष्टवन्तः । एतस्याः चर्चायाः सूचना विभिन्नेषु समाचारपत्रेषु प्रकाशिता जाता। अग्रिमे पृष्ठे एतादृशी एव काचित् सूचना प्रदत्ता अस्ति।

अग्रिमे सप्ताहे मुख्यमन्त्री तथा च स्वास्थ्यमन्त्री पातालपुर-मण्डलं यात्रार्थम् आगतवन्तौ । तौ तैः परिवारैः सह मिलितवन्तौ येषां परिवारजनानां मृत्युः जातः आसीत् । तौ अस्वस्थजनान् द्रष्टुं चिकित्सालयम् अपि गतवन्तौ । सर्वकारः एतेषां परिवाराणां कृते क्षतिपूर्तिराशिम् अपि घोषितवान् । मुख्यमन्त्री उक्तवान् यत् तस्य विचारस्य अनुसारं केवलं स्वच्छतायाः न आसीत् परन्तु पेयजलस्य अपि न्यूनता आसीत्। सः उक्तवान् यत्

सर्वकारः अवकरस्य विषये ज्ञातवान्...
मुख्यमन्त्री धनराशेः दानस्य प्रतिज्ञां कृतवान् पातालपुरं (रविः आहूजा) गतेषु केषुचित् सप्ताहेषु राज्यस्य केषुचित् मण्डलेषु अनेके जनाः कालग्रासाः जाताः। एतस्मिन् विषये तीव्रा प्रतिक्रिया अभवत् यत् सर्वकारेण स्थितिः गभीरतया न स्वीकृता । अद्य जातायां संवाददातृ-वार्तायां स्वास्थ्यमन्त्री उक्तवान् यत् तस्य सर्वकारेण सर्वे मण्डलाधीशाः मुख्य-चिकित्सा-अधिकारिणः च आवश्यकोपायान् कर्तुं निर्दिष्टाः। सर्वासु समस्यासु महत्त्वपूर्णा समस्या पेयजलस्य अस्ति । मन्त्री महोदयः उक्तवान् यत् तस्य इच्छा वर्तते यत् जलागार-यानैः प्रत्येकं ग्रामं यावत् जलस्य प्राप्तिः भवेत् । मुख्यमन्त्री एतस्य कार्यस्य कृते धनस्य उपलब्धतायाः वचनं दत्तवान् । तेषां योजना अस्ति यत् जनाभियानं चालयित्वा जनाः अपि सूचनीयाः यत् ते कैः कैः उपायैः विसूचिकातः आत्मरक्षां कर्तुं शक्नुवन्ति । यदा कश्चित् पत्रकारः तं पृष्टवान् यत् बहुभ्यः मासेभ्यः यः अवकरः एकत्रीभूतः अस्ति तस्य अपसारणाय किं क्रियते तदा सः उक्तवान् यत् ते अस्मिन् विषये अवधानं करिष्यन्ति ।

विसूचिकां नियन्त्रयितुं सर्वकारेण कृतयोः द्वयोः उपाययोः उल्लेखं कुर्वन्तु ।

प्रेसवार्तायाः किम् उद्देश्यम् अस्ति ? संवाददातृ-सम्मेलनं केन प्रकारेण सर्वकारेण कृतानां कार्याणां विषये सूचनां प्राप्तुं सहायकं भवति?

यत् काचित् उच्चस्तरीया निरीक्षणसमितेः निर्माणं भविष्यति या स्वच्छता-सुविधानां कृते मण्डलस्य आवश्यकतानां विषये विचारं करिष्यति तथा च लोकनिर्माण-मन्त्रिणः कृते निर्देशान् दास्यति यतः सः क्षेत्रे जलस्य उचित-व्यवस्थायाः विषये अवधानं कुर्यात्।

यथा भवन्तः उपरि दृष्टवन्तः, ते जनाः ये सत्तायां सन्ति यथा मुख्यमन्त्री स्वास्थ्यमन्त्री च एतादृशैः जनैः समस्यानां निवारणं करणीयं भवति । ते एतादृशानि कार्याणि विभिन्नैः विभागैः कारयन्ति यथा लोकनिर्माण-विभागेन कृषिविभागेन स्वास्थ्यविभागेन शिक्षाविभागेन च इत्यादिभिः । तैः विधानसभायाम् उत्थापित-प्रश्नानाम् अपि उत्तराणि दातव्यानि भवन्ति तथा च प्रश्नकर्तारः जनाः अपि आश्वस्ताः करणीयाः भवन्ति यत् उचिताः प्रयासाः क्रियन्ते । एतेन सह एव समाचारपत्रैः अन्यैः माध्यमैः च अपि एतेषु विषयेषु चर्चा भवति, यस्याः उत्तरं सर्वकारेण दातव्यं भवति – यथा संवाददातृ-वार्तायाः आयोजनम्।

सर्वकारः स्वच्छतायाः स्वास्थ्यसेवानां च कृते नूतनाभिनियम-निर्माणस्य अपि निर्णयं स्वीकर्तुं शक्नोति । उदाहरणार्थं सः अधिनियमं निर्माय प्रत्येकं नगरनिगमस्य कृते एतत् अनिवार्यत्वेन आदेशं कर्तुं शक्नोति यत् नगरेषु

पर्याप्तशौचालयानां व्यवस्था भवेत् । इदम् अपि सुनिश्चेतुं शक्यते यत् प्रत्येकस्मिन् ग्रामे कस्यचित् स्वास्थ्यकर्मिणः नियुक्तिः भवेत् । कस्मिंश्चित् विषये अधिनियम-निर्माणस्य कार्यं प्रत्येकं राज्यस्य विधानसभया क्रियते । तदनन्तरं विभिन्न-शासकीय-विभागाः एतेषाम् अधिनियमानां क्रियान्वयनं कुर्वन्ति । सम्पूर्णस्य देशस्य कृते अधिनियमानां निर्माणं संसदि क्रियते । संसदः विषये भवन्तः अग्रिमे वर्षे पठिष्यन्ति ।

लोकतन्त्रे विधान-सभा-सदस्यानां रूपेण जनता स्वप्रतिनिधीः चिनोति अपि च अनेन प्रकारेण शासनं मुख्यतः जनतायाः एव भवति । पुनः सत्तापक्षस्य सदस्याः सर्वकारं निर्मान्ति तथा च केचन सदस्याः मन्त्रिपदे आसीनाः भवन्ति । एते मन्त्रिणः सर्वकारस्य विभिन्नानां विभागानां प्रभारिणः भवन्ति यथा उपरि प्रदत्ते उदाहरणे स्वास्थ्यविभागः । एतैः विभागैः यत् कार्यं क्रियते तत् कार्यं विधायिकया अनुमोद्यते स्वीक्रियते च ।

लोकतन्त्रे जनाः स्वस्य मतस्य अभिव्यक्तिं कर्तुं तथा च सर्वकारस्य विरोधं कर्तुं सभानाम् आयोजनं कुर्वन्ति ।

विभागस्य नाम	*तेषां कार्याणाम् उदाहरणानि*
विद्यालय-शिक्षा-विभागः	
लोक-निर्माण-विभागः	
कृषि-विभागः	

भित्तिपत्रस्य परियोजना

भित्तिपत्रं काचित् रुचिपूर्णा गतिविधिः अस्ति यस्य माध्यमेन स्व-रुचेः अनुसारं कस्मिंश्चित् विषये शोधकार्यं कर्तुं शक्यते। अत्र यानि चित्राणि दत्तानि सन्ति ते कक्ष्यायां भित्तिपत्र-निर्माणस्य विभिन्नान् पक्षान् प्रस्तुवन्ति ।

शिक्षिका चितविषयस्य सम्पूर्णां कक्ष्यां परिचिनोति तथा च संक्षिप्तचर्चां कृत्वा कक्ष्यां समूहेषु विभक्तां करोति । समूहः तस्मिन् विषये चर्चयति तथा च निश्चयं करोति यत् भित्तिपत्रे किं किं स्थापयितव्यम् । तत्पश्चात् बालकाः स्वयम् अथवा भागद्वये विभक्तां सामग्रीं पठन्ति अपि च स्वस्य अनुभवान् विचारान् च लिखन्ति । एतदर्थं ते कवितानां कथानां साक्षात्काराणां विवरणादीनां च रचनां कर्तुं शक्नुवन्ति।

स्वस्य शिक्षकस्य साहाय्येन जानन्तु यत् उपर्युक्तशासकीयविभागः कीदृशं कार्यं करोति ? तानि कार्याणि तालिकायाः रिक्तस्थानेषु लिखन्तु।

या सामग्री चिता रचिता अथवा लिखिता तां समूहस्य छात्राः मिलित्वा पश्यन्ति । ते परस्परं लिखितं पठन्ति अपि च स्वपरामर्शान् यच्छन्ति । ते मिलित्वा निश्चयं कुर्वन्ति यत् भित्तिपत्रे किं किम् अङ्कनीयं तथा च तस्य आकृतिं रचयन्ति।

तदनन्तरं प्रत्येकं समूहः स्वभित्तिपत्रं सम्पूर्णायाः कक्ष्यायाः पुरतः प्रस्तौति । इदं महत्त्वपूर्णम् अस्ति यत् समूहस्य एकाधिकान् सदस्यान् प्रस्तुत्यर्थम् उच्येत तथा च सर्वेभ्यः समूहेभ्यः स्वस्वकार्यं प्रदर्शयितुं समानः कालः लभ्येत । यदा सर्वे समूहाः स्व-प्रस्तुतीकरणं कुर्युः तदा समीक्षार्थम् एतादृशानां प्रश्नानां पृच्छा सम्यक् भवति यत् ते स्वयं किं किं कर्तुं समर्थाः आसन् ? कीदृशेन कार्येण तेषां कार्यम् इतोऽपि व्यवस्थितं स्यात् ? लेखने प्रस्तुतीकरणे च परिष्कारार्थं किं कर्तुं शक्यते स्म ?

2006 तमे वर्षे डेंगू इति महारोगस्य विषये इदं भित्तिपत्रं षष्ठकक्ष्या-बी भागः केन्द्रीयविद्यालयः क्रमाङ्कः 2, हिन्डन, गाजियाबादः उत्तरप्रदेशस्य विद्यार्थिनः रचितवन्तः ।

स्वराज्यस्य सर्वकारस्य कार्यसम्बद्धे कस्मिंश्चित् अन्यस्मिन् विषये एतादृशीम् एव भित्ति-पत्र-रचनायाः एकां परियोजनां करोतु यथा ज्वरस्य महारोगः कश्चित् शिक्षा-कार्यक्रमः अधिनियमस्य व्यवस्थायाः च कश्चित् विषयः मध्याह्न-भोजन-कार्यक्रमादिः।

अभ्यासः

1. निर्वाचन-क्षेत्र-प्रतिनिधि-शब्दयोः प्रयोगं कुर्वन् स्पष्टं कुर्वन्तु यत् विधायकः कः भवति तथा च तस्य चयनं केन प्रकारेण भवति ?

2. केचन विधायकाः मन्त्रिपदं कथम् अलङ्कुर्वन्ति ? स्पष्टीकुर्वन्तु ।

3. मुख्यमन्त्रिणा अन्यैः मन्त्रिभिः च स्वीकृत-निर्णयेषु विधानसभायां चर्चा किमर्थं भवेत् ?

4. पातालपुरे का समस्या आसीत् ? एतस्मिन् विषये का चर्चा अथवा कार्याणि कृतानि ? निम्नतालिकायां पूरयन्तु -

सामान्यसभा
विधानसभा
संवाददातृ-सम्मेलनम्
मुख्यमन्त्री

5. विधान-सभा-सदस्येन विधायिकायां कृतकार्याणां शासकीय-विभागैः च कृतकार्याणां मध्ये कः भेदः अस्ति?

शब्द-सङ्कलनम्

निर्वाचन-क्षेत्रम् – *एतस्य तात्पर्यं कस्माच्चित् निश्चितक्षेत्रतः अस्ति तत्रत्याः निवासिनः सर्वे मतदातारः स्वप्रतिनिधिं चिन्वन्ति । उदाहरणार्थम् इदं किञ्चित् पंचायतस्य वार्ड इति अथवा तत् क्षेत्रं भवितुं शक्नोति यं विधान-सभा-सदस्यः चिनोति ।*

बहुमतम्- *एतस्य अर्थः एतादृश्याः स्थितेः अस्ति यदा कस्यचित् समूहस्य अर्धात् अधिक-सङ्ख्यायां जनाः कस्माच्चित् निर्णयात् विचारात् वा सहमताः भवेयुः । एतत् एव साधारण-बहुमतम् अपि उच्यते ।*

विरोधिपक्षः – *एतस्य तात्पर्यं तेभ्यः चितेभ्यः प्रतिनिधिभ्यः अस्ति ये सत्तापक्षस्य सदस्याः न सन्ति तथा च येषां भूमिका सर्वकारि-निर्णयेषु अपि च कार्येषु प्रश्नकरणस्य तथा च विधानसभायां विचारार्थं नूतनानां विषयाणम् उत्थापनस्य भवति ।*

संवाद-दातृ-वार्ता-सम्मेलनम् - संचार-माध्यमैः सम्बद्ध-पत्र-काराणाम् एतादृशः समूहः यः कस्मिंश्चित् विषये स्वपक्षं वक्तुं तथा च तस्मिन् विषये प्रश्नान् प्रष्टुम् आमन्त्रितः स्यात् । तस्मात् अपेक्षा क्रियते यत् ते संचारस्य माध्यमैः एतस्मिन् विषये महान्तं जनसमूहं प्रति वक्ष्यन्ति ।

तृतीयः घट्टः

लिङ्गबोधः (जेंडर इति)

शिक्षकाणां कृते

लिङ्गबोधः अथवा जेंडर इति कश्चित् एतादृशः शब्दः अस्ति यं प्रायः भवन्तः सर्वे शृण्वन्ति। प्रायः अयं सरलतया स्पष्टः न भवति। इत्थं प्रतिभाति यत् एतस्य अस्माकं जीवने विशिष्टा प्रवृत्तिः हस्तक्षेपः वा नास्ति तथा च वयं प्रशिक्षण-कार्यक्रमेषु एव एतस्य चर्चाः शृणुमः। वास्तविकतायां तु वयं सर्वे स्वजीवने प्रतिदिनम् एव एतस्य सत्यस्य अनुभवं कुर्मः। एतत् निर्धारयति यत् वयं के स्मः अपि च के भवितुं शक्नुमः तथा च वयं कुत्र गन्तुं शक्नुमः, कुत्र च गन्तुं न शक्नुमः। जीवनस्य बहुविधाः विकल्पाः अस्माकं कृते अन्ततः एतेन आधारेण एव निश्चिताः भवन्ति। लिङ्गबोधस्य अथवा जेंडर इत्यस्य अस्माकं ज्ञानम् अस्माकं परिवारेण समाजेन एव जायते। इदम् अस्मान् तस्यां दिशि चिन्तयितुं प्रेरयति यत् वयं स्व-परिवेशे महिलाः पुरुषान् च यान् भूमिकायाः निर्वहणं कुर्वतः पश्यामः ताः भूमिकाः स्वाभाविक्यः पूर्वनिर्धारिताः च सन्ति। यथार्थरूपेण एतानि कर्तव्यानि सम्पूर्णे विश्वे विभिन्नानां समुदायानां कृते पृथक्-पृथक् भवन्ति। अतः लिङ्गबोधतः अस्माकम् अभिप्रायः तेभ्यः अनेकेभ्यः सामाजिक-मूल्येभ्यः तथा च रूढिवादिधारणाभ्यः अस्ति, याः अस्माकं संस्कृत्या अस्माकं स्त्रीलिङ्ग-भवनस्य पुँल्लिङ्ग-भवनस्य च जैविकेन अन्तरेण सह योजितः अस्ति। अयं शब्दः अस्माकं बहूनाम् असमानतानां स्त्रीपुरुषयोः मध्ये शक्तिसम्बन्धान् अपि ज्ञातुं साहाय्यं करोति।

अग्रिमौ द्वौ अध्यायौ अस्माकं समाजस्य लैङ्गिकसङ्कल्पनाः एतस्य शब्दस्य प्रयोगं विना अस्माकं पुरतः स्थापयतः। एतत् समीचीनं स्यात् यत् विद्यार्थिनः एतस्य विषयस्य कृते प्रोत्साहनीयाः यत् विभिन्न-शैक्षणिक-पद्धतयः यथा कथानां प्रस्तुतिः विशिष्टेषु अध्ययनेषु चर्चाः, कक्ष्यायां गतिविधयः, तथ्यानां व्याख्यानं तथा च चित्राणां समीक्षायाः माध्यमेन ते स्वजीवनस्य स्वपार्श्वस्थस्य समाजस्य च विषये विचारं कुर्युः अपि च प्रश्नान् कुर्युः। जेंडर इति शब्दे आगते सति प्रायः कयाचित् विशेषदृष्ट्या जनाः एतम् अपूर्णम् अर्थम् अपि कुर्वन्ति यत् अयं शब्दः केवलं महिलाभिः बालिकाभिः च सम्बद्धः अस्ति। अतः एतेषु अध्यायेषु एतस्य तथ्यस्य अपि विषये जागरूकता धृता अस्ति यत् केवलं बालिकाः एव न अपितु बालकाः अपि चर्चायां सहभागिनः भवेयुः।

चतुर्थे अध्याये विशिष्टे द्वे अध्ययने सम्मिलिते, ये पृथक् समयैः स्थानैः च सम्बद्धे स्तः तथा च अस्माकं पुरतः इदं तथ्यं प्रस्तुतं यत् बालकाः बालिकाः च कथं वयस्काः भवन्ति अपि च तेषां सामाजिकभिन्नता कथं रूपं धरति। एतानि उदाहरणानि छात्राणां कृते एतत् ज्ञातुं साहाय्यं करिष्यन्ति यत् सामाजीकरणं सर्वत्र समानं नास्ति। तत् समाजतः निर्धारितं भवति तथा च एतस्मिन् यथाकालं निरन्तरं परिवर्तनं चलति। एते अध्यायाः अस्मान् इदम् अपि बोधयन्ति यत् कथं समाजे स्त्रीपुरुषयोः कृते विभिन्नानि मूल्यानि निर्धार्यन्ते तथा च इतः एव भेदस्य असमानतायाः च प्रारम्भः भवति। केनचित् चित्रित-कथा-पट्टेन बालकाः गृहस्य सम्पूर्णेषु कार्येषु चर्चां करिष्यन्ति यानि मुख्यतः महिलाभिः क्रियन्ते। ते चर्चां करिष्यन्ति यत् कथं गृहेषु महिलाभिः कृतकार्यं कार्यस्य श्रेण्याम् एव गण्यते अथवा पुनः तत् अर्थहीनम् इति मन्यते।

पञ्चमः अध्यायः कार्यस्य क्षेत्रे लिङ्ग-आधारिते भेदभावे केन्द्रितः अस्ति तथा च समानतायाः कृते महिलानां कृतसङ्घर्षम् अपि प्रस्तौति। कक्ष्यायाः गतिविधिषु बालाः कार्याणि व्यवसायान् च आधारीकृत्य समाजे प्रचलितानां रूढिवादिमान्यतानां विषये प्रश्नान् प्रष्टुम् आरप्स्यन्ति। अस्मिन् अध्याये एतस्मिन् विषये अपि सङ्केताः प्राप्स्यन्ते यत् कथं बालकानां बालिकानां च कृते शिक्षासदृशाः अवसराः समानरूपेण उपलब्धाः न सन्ति। एकोनविंशति-विंशत्योः शताब्द्योः द्वयोः महिलयोः जीवनस्य कथासु बालाः द्रक्ष्यन्ति यत् एतासां स्त्रीणां कृते मुक्तेः सङ्घर्षः कथं प्रारब्धः तथा च लेखने पाठने च शिक्षणेन तेषां जीवनं कथं परिवर्तितम्। महान्ति परिवर्तनानि प्रायेण सामूहिक-सङ्घर्षैः एव भवन्ति। अस्य अध्यायस्य अन्ते कश्चित् चित्रनिबन्धः अस्ति यः स्त्री-आन्दोलनेन परिवर्तनार्थम् प्रयुक्तानां नीतीनाम् उदाहरणानि प्रस्तौति।

चतुर्थः अध्यायः

बालकानां बालिकानां च रूपेण विकासः

बालकजन्म बालिकाजन्म वा कस्यापि कश्चित् महत्त्वपूर्णः परिचयः अस्ति तस्य अस्मिता वर्तते। यस्मिन् समाजे अस्माकं विकासः भवति सः अस्मान् शिक्षयति यत् बालकानां बालिकानां च कीदृशः व्यवहारः स्वीकर्तव्यः अस्ति । तैः किं करणीयं भवति तथा च किं न कर्तव्यं भवति। वयं प्रायेण इत्थं चिन्तयन्तः एव वृद्धिं गच्छामः यत् एते विषयाः प्रायः सर्वत्र समानाः एव सन्ति । परन्तु किं सर्वेषु समाजेषु बालकान् बालिकाः च प्रति समानः दृष्टिकोणः अस्ति ? अस्मिन् पाठे वयम् एतस्य एव प्रश्नस्य उत्तरं ज्ञातुं प्रयत्नं करिष्यामः। वयम् एतदपि द्रक्ष्यामः यत् बालकानां बालिकानां च कृते दीयमानानि पृथक्-पृथक् दायित्वानि तान् भविष्यत्कालिकस्य स्त्रीपुरुषयोः दायित्वस्य कृते सज्जीकरोति । अस्मिन् पाठे वयं द्रक्ष्यामः यत् अधिकांशसमाजाः स्त्रीपुरुषाणां कृते पृथक्तया महत्त्वं यच्छन्ति। स्त्रियः यासां कर्तव्यानां निर्वहणं कुर्वन्ति तासां दायित्वानां कृते पुरुषैः निरूह्यमाणानां दायित्वानां कार्याणां च अपेक्षया अल्पमहत्त्वं दीयते । अस्मिन् पाठे वयम् एतत् अपि द्रक्ष्यामः यत् स्त्रीपुरुषयोः मध्ये कार्यस्य क्षेत्रे असमानताः कथं विकसन्ति।

1920 तमे दशके सामोवा-द्वीपे बालानां विकासः

सामोवा-द्वीपं प्रशान्तमहासागरस्य दक्षिणे स्थितानां लघुद्वीपसमूहानां कश्चित् भागः अस्ति । सामोवानसमाजम् आधृत्य कृतानुसन्धानस्य आख्यानुसारं 1920 तमे दशके बालाः विद्यालयं न गच्छन्ति स्म । ते वरिष्ठबालकेभ्यः वयस्केभ्यः च बहुविधविषयान् शिक्षन्ते स्म यथा कनिष्ठबालानां पालनं निरीक्षणं अपि च गृहकार्यं कथं करणीयं भवति इत्यादिविषये शिक्षन्ते स्म । द्वीपेषु मत्स्यग्रहणं किञ्चित् महत्त्वपूर्णं कार्यम् आसीत् अतः किशोराः बालकाः मत्स्यग्रहणाय सुदूरयात्राः प्रति गमनं शिक्षन्ते स्म । परन्तु एतान् विषयान् ते स्वबाल्यस्य पृथक्-पृथक्-काले शिक्षन्ते स्म ।

लघुबालकाः यदा गमनस्य प्रारम्भं कुर्वन्ति स्म तेषां मातरः अथवा वरिष्ठाः जनाः तेषां संरक्षणस्य कार्यं त्यजन्ति स्म । एतत् दायित्वं ज्येष्ठ-बालकानां भवति स्म ये प्रायः स्वयम् अपि पञ्चवर्षीयाः भवन्ति स्म । बालकाः बालिकाः च स्वस्य लघुभ्रातॄणां भगिनीनां च निरीक्षणं कुर्वन्ति स्म परन्तु यदा कश्चित् बालकः प्रायः नववर्षीयः भवति स्म तदा वरिष्ठबालकानां समूहे सम्मिलितः भवति स्म तथा च बाह्यानि कार्याणि शिक्षते स्म यथा मत्स्यग्रहणं नारिकेलवृक्षाणां रोपणं च । बालिकाः यावत्पर्यन्तं त्रयोदशवर्षीयाः चतुर्दशवर्षीयाः वा न भवन्ति तावत्पर्यन्तं ताः लघुबालकानां संरक्षणं तथा च ज्येष्ठानां लघूनि लघूनि कार्याणि कुर्वन्ति स्म । प्रायः चतुर्दशवर्षाणां वयसः अनन्तरं ताः अपि मत्स्यग्रहणार्थं गच्छन्ति स्म उद्यानेषु कार्यं कुर्वन्ति स्म तथा च वेणुपात्राणां निर्माणं शिक्षन्ते स्म । भोजनपाकस्य कार्यं पृथङ्-निर्मितासु पाकशालासु एव भवति स्म यत्र बालकैः एव अधिकं कार्यं करणीयं भवति स्म तथा च बालिकाः तेषां साहाय्यं कुर्वन्ति स्म ।



सप्तम-कक्ष्यायाः कश्चित् सामोवा-च्छात्रः स्वविद्यालयीये वेशे वर्तते ।

भवतां तरुणावस्थायाः अनुभवाः समोवा-देशस्य बालानां किशोराणां च अनुभवेभ्यः केन प्रकारेण भिन्नाः सन्ति ? एतेषु अनुभवेषु वर्णितः किं कश्चित् विषयः अस्ति यं भवन्तः स्वस्य वयस्कतायाः अनुभवेन सह संयोजितुम् इच्छन्ति ?

1960 तमे दशके मध्यप्रदेशे पुरुषस्य रूपेण वृद्धिं प्रति गमनम्

निम्नलिखितालेखः 1960 तमे वर्षे मध्यप्रदेशस्य एकस्मिन् लघुनगरे वासस्य विषये तथा च विद्यालय-गमनस्य विषये कृत-वर्णनतः गृहीतः अस्ति।

बालिकाः विद्यालयस्य गमनकाले समूहं निर्माय चलनं किमर्थं इच्छन्ति?

स्वप्रतिवेशस्य कस्याश्चित् वीथेः क्रीडा-उद्यानस्य वा चित्रं रचयतु । तस्मिन् लघुबालकैः लघुबालिकाभिः च क्रियामाणानां विभिन्नानां गतिविधीनां च अङ्कनं कुर्वन्तु ।

भवद्भिः रचिते चित्रे किं तावत्यः एव बालिकाः सन्ति यावन्तः बालकाः सन्ति ? सम्भवतः भवद्भिः बालिकानां सङ्ख्या न्यूना दर्शिता स्यात् । किं भवन्तः तानि कारणानि ज्ञापयितुं शक्नुवन्ति यतः भवतां प्रतिवेशे राजमार्गे उद्यानेषु विपणिषु च चिरं यावत् सायङ्काले अथवा रात्रौ स्त्रियः बालिकाः च विरलतया दृश्यन्ते?

किं बालकाः बालिकाः च भिन्नेषु भिन्नेषु कार्येषु संलग्नाः सन्ति ? किं भवन्तः विचार्य एतस्य कारणं वक्तुं शक्नुवन्ति ? यदि भवन्तः बालिकानां बालकानां च स्थानं परस्परं परिवर्तयिष्यन्ति अर्थात् बालिकानां स्थाने बालकान् तथा च बालकानां स्थाने बालिकाः स्थापयिष्यन्ति तदा किं भविष्यति ?

षष्ठकक्ष्यायां प्राप्तेः अनन्तरं बालकाः बालिकाः च पृथक्-पृथक् विद्यालयेषु पठनार्थं गच्छन्ति स्म । बालिकानां विद्यालयाः बालकानां विद्यालयतः सर्वथा भिन्नप्रकारेण निर्मीयन्ते स्म । तेषां विद्यालयस्य मध्ये किञ्चित् क्रीडाङ्गणं भवति स्म, यत्र ते बाह्यसंसारतः सर्वथा पृथक् भूत्वा विद्यालयस्य सुरक्षायां क्रीडन्ति स्म । बालकानां विद्यालये एतादृशं क्रीडाङ्गणं न भवति स्म अपितु तेषां क्रीडाक्षेत्रं केवलं किञ्चित् बृहत् प्रथितं स्थानम् आसीत् यत् विद्यालयेन संलग्नम् आसीत् । प्रत्येकं सायङ्काले विद्यालयस्य अवकाशात् पश्चात् बालकाः शताधिकबालिकानां समूहं सङ्कीर्ण-वीथिभ्यः गच्छन्तं पश्यन्ति स्म । राजमार्गेषु गच्छन्त्यः एताः बालिकाः अतिगभीराः दृश्यन्ते स्म । एतत् तथ्यं बालकेभ्यः पृथक् आसीत् ये बालकाः राजमार्गान् अनेकेषां कार्याणां कृते प्रयुञ्जते स्म यथा एवमेव स्थित्वा रिक्तकालं यापयितुं धावनार्थं क्रीडार्थं द्विचक्रिका-चालनस्य कृते विविध-क्रिया-कलापान् कर्तुं च कुर्वन्ति स्म । बालिकानां कृते वीथिः केवलं गृहं गन्तुं काचित् माध्यमरूपा आसीत् । बालिकाः सदैव समूहेषु गच्छन्ति स्म । प्रायः कदाचित् तासां मनसि इदं भयम् आसीत् यत् कश्चित् ताभिः सह अनुचितं व्यवहारं न कुर्यात् अथवा आक्रमणं न कुर्यात् ।

उपर्युक्तयोः द्वयोः उदाहरणयोः पाठानन्तरं वयम् अनुभवामः यत् वयस्कभावस्य प्राप्तेः अपि अनेके उपायाः सन्ति । वयं प्रायः चिन्तयामः यत् बालकाः एकेन एव उपायेन ज्येष्ठत्वं प्राप्नुवन्ति । एतादृशम् एतदर्थम् अस्ति यतोहि वयं स्व-अनुभवैः एव आधिक्येन परिचिताः भवामः। यदि वयं स्वस्य परिवारस्य वृद्धैः सह वार्तालापं करिष्यामः तदा अनुभविष्यामः यत् तेषां बाल्यकालः प्रायः अस्माकं बाल्यकालस्य अपेक्षया सर्वथा भिन्नः आसीत् ।

वयम् इदम् अपि अनुभवामः यत् समाजः बालिकाबालकयोः मध्ये स्पष्टतया अन्तरं करोति । अयं भेदः अल्पायुषः एव प्रारभते। उदाहरणार्थं तेभ्यः क्रीडनार्थं पृथक् क्रीडनकानि दीयन्ते । बालकेभ्यः क्रीडनार्थं प्रायः कारयानानि दीयन्ते तथा च बालिकानां कृते पाञ्चालिकाः। द्वे अपि क्रीडनके क्रीडार्थम् आनन्ददायके भवितुं शक्नुतः पुनरपि बालिकानां कृते पाञ्चालिकाः बालकानां च कृते कारयानानि एव किमर्थं दीयन्ते ? क्रीडनकानि बालान् एतत् बोद्धुं माध्यमभूतानि जायन्ते यत् यदा ते वयस्काः भूत्वा स्त्रीरूपेण पुरुषरूपेण वा भविष्यन्ति तदा तेषां भविष्यं पृथक्-पृथक् भविष्यति । यदि वयं विचारयामः तर्हि इदम् अन्तरं प्रायः दैनन्दिनस्य लघुषु लघुषु विषयेषु कल्प्यते । बालिकाभिः कीदृशानि वस्त्राणि धरणीयानि बालकाः उद्याने काः काः क्रीडाः क्रीडेयुः बालिकाभिः निम्नस्वरेण वार्ताः करणीयाः तथा च बालकैः उच्चस्वरेण अथवा रौद्रस्वरेण वार्ता करणीया । एते सर्वे उपायाः बालकानां कृते एतत् बोधनार्थं सन्ति यत् ते यदा युवकाः युवतयः वा भविष्यन्ति तदा तेषां विशिष्टाः भूमिकाः भविष्यन्ति । भाविजीवने एतस्य प्रभावः अस्माकम् अध्ययनस्य विषयेषु अथवा व्यवसायस्य चयने अपि भवति ।

“मम माता कार्यं न करोति”

अधिकांश-समाजेषु येषु अस्माकं समाजः अपि सम्मिलितः अस्ति तत्र पुरुषाणां स्त्रीणां च दायित्वानां तेषां कार्याणां च यत् महत्त्वं वर्तते तत् सामान्यतया न अवगम्यते । पुरुषाणां महिलानां च सामर्थ्यं समानं न भवति । आगच्छन्तु पश्यामः यत् पुरुषैः महिलाभिः च कृतकार्येषु इयम् असमानता कथम् अस्ति ।

गृह्यकार्यस्य मूल्यम्

हरमीतायाः परिवारः न अनुभवति स्म यत् जसप्रीता गृहसम्बन्धिनं यत् कार्यं करोति स्म तत् कार्यं वास्तविकतायां कार्यं न आसीत् । सम्पूर्णे संसारे गृह्यकार्यस्य दायित्वं स्त्रीणाम् एव भवति यथा निभालन-सम्बद्धं कार्यं परिवारस्य

विषये अवधानम्, विशेषतया शिशूनां वृद्धानां रुग्णानां च विषये अवधानम्। पुनरपि यथा अस्माभिः दृष्टं गृह्यकार्याणि महत्त्वपूर्णानि न इति जनानां मानसिकता अस्ति। इत्थं स्वीक्रियते यत् एतानि कार्याणि तु महिलानां स्वाभाविकानि कार्याणि सन्ति अतः तासां कृते धनदानस्य कापि आवश्यकता नास्ति। समाजः एतेषां कार्याणां कृते अधिकं महत्त्वं न ददाति।

गृहकार्यकर्तृणां जीवनम्

उपर्युक्तकथायां केवलं हरमीतायाः माता एव गृह्यकार्याणि न करोति स्म। आधिक्येन कार्याणि मङ्गला करोति स्म या तेषां गृह्यकार्येषु साहाय्यार्थं नियोजिता आसीत्। बहुषु गृहेषु विशेषतया नगरेषु लघुनगरेषु च जनाः गृह्यकार्यार्थं नियोज्यन्ते। ते अधिकानि कार्याणि कुर्वन्ति सम्मार्जनम्,स्वच्छता, वस्त्रप्रक्षालनं, पात्रप्रक्षालनं, पाककार्यं, शिशूनां वृद्धानां च सम्भालनम् इत्यादिः। गृह्यकार्यार्थं प्रायः महिलाः भवन्ति। कदाचित् एतानि कार्याणि कर्तुं लघुबालकाः बालिकाः च अपि नियोज्यन्ते। गृह्यकार्यस्य अधिकं महत्त्वं नास्ति अतः एतेभ्यः पारिश्रमिकम् अपि न्यूनमात्रया एव दीयते। गृह्य-कार्यकर्तृणां दिनं प्रातः पञ्चवादनतः प्रारभ्य चिरं रात्रिं यावत् अपि चलति। कठिनपरिश्रम-करणानन्तरं प्रायः ये तान् वृत्तौ नियोजयन्ति ते तैः सह सम्मानजनकं व्यवहारं न कुर्वन्ति। देहल्यां सेविकारूपेण कार्यकर्त्री काचित् स्त्री मेलानी स्वानुभवस्य विषये अनेन प्रकारेण उक्तवती -

मिलानी स्वपुत्र्या सह वर्तते

किं हरमीतायाः सोनाल्याः च एतत् कथनं सम्यक् आसीत् यत् हरमीतायाः माता कार्यं न करोति ?

किं भवन्तः चिन्तयन्ति यदि भवतां माता अथवा ते जनाः ये गृह्यकार्यं कुर्वन्ति कस्मिंश्चिद् दिने कार्यतः विरताः भवेयुः तर्हि किं भविष्यति?

भवन्तः एतादृशं किमर्थं चिन्तयन्ति यत् सामान्यतया पुरुषाः बालकाः च गृह्यकार्यं न कुर्वन्ति ? भवतां चिन्तनानुसारं तैः गृह्यकार्यं करणीयम् उत् न करणीयम्?

"मम प्रथमं सेवाकार्यं एकस्मिन् धनाढ्ये परिवारे आसीत् यः त्रितलयुक्ते भवने निवसति स्म। महोदया विचित्रा महिला आसीत् या प्रत्येकं कार्यं कारयितुं क्रोशति स्म । मम कार्यं पाकशालायाः आसीत्। अपरे द्वे बालिके स्वच्छतायाः कार्यं कुरुतः स्म। अस्माकं कार्यदिवसः प्रातः पञ्चवादनतः प्रारभते स्म । प्रातराशे अस्मभ्यं चायं तेन सह च शुष्के द्वे रोटिके लभ्येते स्म। अस्माभिः तृतीया रोटिका कदापि न प्राप्ता। सायङ्काले यदा अहं भोजनं पचामि स्म तदा ते द्वे बालिके मत्तः इतोऽपि एकां रोटिकां याचेते स्म । अहं गुप्तरूपेण ताभ्याम् एकाम् एकां रोटिकां ददामि स्म तथा च स्वयम् अपि एकां रोटिकां स्वीकरोमि स्म । वयम् आदिनं कार्यं कृत्वा बुभुक्षया पीडिताः भवामः स्म। वयं गृहस्य आभ्यन्तरे पादरक्षायाः प्रयोगं न कर्तुं शक्नुमः स्म। शैत्यकाले अस्माकं पादेषु शोथः भवति स्म। अहं महोदयातः बिभेमि स्म परन्तु तस्यै अहं मनसि कुप्यामि स्म, अपि च आत्मानम् 'अहम् अपमानिता' इति अपि अनुभवामि स्म। किं वयम् आदिनं कार्यं न कुर्मः स्म ? किं वयं कस्यचित् सम्मानजनकस्य व्यवहारस्य योग्याः न आस्म ?"

हरियाणाराज्ये तमिलनाडुराज्ये च स्त्रियः प्रतिसप्ताहं सम्पूर्णरूपेण कति होराः कार्यं कुर्वन्ति?

एतस्मिन् सम्बन्धे स्त्रिपुरुषयोः कियान् भेदः दृश्यते?

वास्तविकतायां यत् वयं गृह्यकार्यं वदामः तस्मिन् अनेकानि कार्याणि सम्मिलितानि भवन्ति। एतेषु केषाञ्चित् कार्याणां कृते अधिकस्य शारीरिकश्रमस्य आवश्यकता भवति । ग्रामीणेषु नगरीयक्षेत्रेषु बालिकाभिः महिलाभिः च दूरात् जलम् आनेतव्यं भवति। ग्रामीणेषु क्षेत्रेषु स्त्रिभिः बालिकाभिः च शिरसा इन्धनकाष्ठस्य भारिपोटलिकाः वहनीयाः भवन्ति। वस्त्रप्रक्षालनस्य स्वच्छतायाः सम्मार्जनस्य भार-उत्थापनस्य च कार्येषु, नमनस्य, उत्थापनस्य, वस्तूनि स्वीकृत्य च चलनस्य, आवश्यकता भवति। बहूनि एतादृशानि कार्याणि येषु यथा पाककार्यस्य कृते चिरकालं यावत् उष्णचुल्लिकायाः पुरतः स्थातव्यं भवति। स्त्रियः यत् कार्यं कुर्वन्ति तत् कार्यं भारि श्रमसाध्यं तथा च शारीरिकं कार्यं भवति अपरञ्च वयं सामान्यतया चिन्तयामः यत् पुरुषाः एव एतादृशानि कार्याणि कर्तुं शक्नुवन्ति।

गृह्यकार्याणां तथा च निभालनस्य कार्याणां कश्चित् अन्यः पक्षः यस्य कृते वयं महत्त्वं न प्रयच्छामः, तत् अस्ति एतेषु कार्येषु व्यापृतः दीर्घः कालः। यथार्थरूपेण यदि वयं स्त्रिभिः क्रियामाणानि गृह्याभ्यान्तराणि तथा च बाह्यकार्याणि योजयामः गणयामः वा तर्हि वयं ज्ञास्यामः यत् आहत्य स्त्रियः पुरुषाणाम् अपेक्षया अधिकं कार्यं कुर्वन्ति।

निम्नतालिकायां भारतस्य केन्द्रियसाङ्ख्यिकीय-सङ्घटनेन कृतस्य विशिष्टस्य अध्ययनस्य केचन अङ्काः सन्ति(**1998-99**)| पश्यन्तु किं भवन्तः रिक्तस्थानानि पूरयितुं शक्नुवन्ति ?

राज्यम्	स्त्रीणां वेतनसहितस्य कार्यस्य होराः(प्रति-सप्ताहम्)	स्त्रीणाम् अवैतनिक-गृह्य-कार्यस्य होराः (प्रति-सप्ताहम्)	स्त्रीणां सम्पूर्णाः कार्यहोराः	पुरुषाणां वेतनसहिताः कार्यहोराः (प्रतिसप्ताहम्)	पुरुषाणाम् वैतनिकाः गृह्यकार्यस्य होराः (प्रतिसप्ताहम्)	पुरुषाणां सम्पूर्णाः कार्यहोराः
हरियाणा	**23**	**30**	**?**	**38**	**2**	**?**
तमिलनाडुः	**19**	**35**	**?**	**40**	**4**	**?**

महिलानां कार्यं समानता च

यथा अस्माभिः दृष्टं महिलानां गृह्यकार्याणां निभालनस्य च कार्याणां कृते अल्पमहत्त्वप्रदानं कस्यचित् एकस्य जनस्य अथवा परिवारस्य विषयः नास्ति। एषः स्त्रीणां पुरुषाणां च मध्ये असमानतायाः काचित् महत्याः सामाजिक-व्यवस्थायाः एव भागः अस्ति । अतः एतस्य समाधानार्थं यानि कार्याणि करणीयानि सन्ति तानि केवलं व्यक्तिगतस्तरे पारिवारिकस्तरे च न अपितु शासकीयस्तरे अपि भवितव्यानि । वयं जानीमः यत् यत् समानता अस्माकं संविधानस्य महत्त्वपूर्णः सिद्धान्तः अस्ति । संविधानं कथयति यत् स्त्रीपुरुषयोः आधारेण भेदभावः न कर्तुं शक्यते । परन्तु वास्तविकतायां लिङ्गभेदः कर्तुं शक्यते । सर्वकारः एतस्य कारणानि ज्ञातुं तथा च एतस्याः स्थितेः सकारात्मकं निवारणम् अन्वेष्टुं वचनबद्धः अस्ति । उदाहरणार्थं सर्वकारः जानाति यत् बालकानां निभालनं तथा च गृह्यकार्यस्य भारः महिलासु बालिकासु च आपतति । स्वाभाविकरूपेण एतस्य प्रभावः बालिकानां विद्यालय-गमन-कार्यक्रमे अपि आपतति । एतस्माद् एव निश्चयः जायते यत् किं महिलाः गृहात् बहिः कार्यं कर्तुं शक्ष्यन्ति अन्यच्च यदि करिष्यन्ति तर्हि कीदृशं कार्यम् अथवा कार्यक्षेत्रं चेष्यन्ति । सम्पूर्णस्य देशस्य बहुषु ग्रामेषु प्रशासनेन आङ्गणवाटिकाः बालवाटिकाः च उद्घाटिताः सन्ति । प्रशासनेन कश्चित् अधिनियमः निर्मितः अस्ति यस्य अनुसारं यदि कस्याञ्चित् संस्थायां महिलाकर्मचारिणां सङ्ख्या त्रिंशत्तः अधिका वर्तते तर्हि तत्र बालवाटिकायाः सुविधा दातव्या

मध्यप्रदेशस्य एकस्मिन् ग्रामे आङ्गण-वाटिका-केन्द्रे शिशवः

बह्वयः स्त्रियः यथा कथायां सोनाल्याः माता तथा च हरियाणायाः तमिलनाडोः च महिलाः यासां सर्वेक्षणं कृतं ताः गृह्यकार्यं गृहाद् बहिः च अपि कार्यं कुर्वन्ति । एतत् प्रायः महिलानां कार्यस्य द्विगुणितभाररूपेण ज्ञायते ।

भविष्यति। बालवाटिकायाः व्यवस्थातः अनेकाः महिलाः गृहाद् बहिः गत्वा कार्यकरणे सुविधाम् अनुभविष्यन्ति। एतेन बह्वीनां बालिकानां विद्यालयं प्रति गमनम् अपि सम्भवं भविष्यति।

किं भवन्तः चिन्तयन्ति एतत् चित्रं किं वक्तुं प्रयतते ?



एतत् भित्तिचित्रं बङ्गप्रान्तस्य केनचित् महिलासमूहेन रचितम् अस्ति। किम् एतत् आधारीकृत्य भवन्तः किमपि शोभनम् उद्घोष-वाक्यं रचयितुं शक्नुवन्ति ?



अभ्यासः

1 सह एव प्रदत्तेषु कानिचित् कथनानि विचारयन्तु तथा च ज्ञापयन्तु यत् तानि सत्यानि सन्ति अथवा असत्यानि ? स्वस्य उत्तरस्य समर्थने एकम् उदाहरणम् अपि लिखन्तु ।

2 गृह्यकार्यम् अदृश्यं भवति अपि च तस्य किमपि मूल्यं न दातुं शक्यते । गृह्यकार्याणि शारीरिकरूपेण श्रमसाध्यानि भवन्ति तानि श्रान्तिं जनयन्ति । गृह्यकार्येषु अधिकः कालः नश्यति ।

स्वशब्देषु लिखन्तु यत् अदर्शनयोग्यानि शारीरिकरूपेण श्रान्तिजनकानि अपि च समयसाध्यानि इत्यादिभ्यः वाक्यांशेभ्यः भवन्तः किम् अवगच्छन्ति ? स्वगृहस्य महिलानां कार्यस्य आधारेण प्रत्येकं विषयं केनचित् उदाहरणेन ज्ञापयन्तु ।

3 एतादृशानां विशिष्ट-क्रीडनकानां सूचीं निर्मान्तु यैः बालकाः क्रीडन्ति अपि च तादृशानां विशिष्टानां क्रीडनकानाम् अपि सूचीं निर्मान्तु यैः केवलं बालिकाः एव क्रीडन्ति । यदि द्वयोः सूच्योः किञ्चित् अन्तरम् अस्ति तर्हि चिन्तयन्तु ज्ञापयन्तु च यत् एवं किमर्थम् अस्ति ? चिन्तयन्तु यत् किम् एतस्य सम्बन्धः एतेन तथ्येन अस्ति यत् कालक्रमेण वयस्कस्य रूपेण बालैः कस्याः भूमिकायाः निर्वहणं करणीयं भविष्यति ?

4 यदि भवतां गृहे अथवा प्रतिवेशे गृह्यकार्येषु साहाय्यकर्त्री काचित् महिला अस्ति तर्हि तया सह वार्तां कुर्वन्तु अपि च तस्याः विषये किञ्चित् इतोऽपि आधिक्येन अवगमनस्य प्रयासं कुर्वन्तु यत् तस्याः गृहे अन्ये के के जनाः सन्ति ? ते किं कुर्वन्ति ? तेषां गृहं कुत्र अस्ति ? ताः प्रतिदिनं कति होराः यावत् कार्यं कुर्वन्ति ? ताः कियत् अर्जनं कुर्वन्ति ? एतानि सर्वाणि विवरणानि सम्मेल्य एकां लघुकथां लिखन्तु ।

(क) सर्वेषु समुदायेषु समाजेषु च बालकानां बालिकानां च भूमिकानां विषये समानविचारधारा न भवति ।

(ख) अस्माकं समाजः जायमानेषु बालकेषु जायामानासु च बालिकासु स्वल्पमपि भेदभावं न करोति ।

(ग) ताः महिलाः याः गृहे एव तिष्ठन्ति बाह्यं कार्यं च न कुर्वन्ति ।

(घ) महिलाभिः कृतकार्याणि पुरुषैः कृतकार्याणाम् अपेक्षया हीनानि सन्ति इति अवगम्यते ।

शब्दसङ्कलनम्

अस्मिता (परिचयः) - अयम् कश्चित् आत्मसत्तायाः अर्थात् स्व-अस्तित्वस्य अथवा स्व-अस्तित्वं प्रति जागरूकतायाः भावः अस्ति। एकस्य मनुष्यस्य अनेकाः अस्मिताः (परिचयाः) भवितुं शक्नुवन्ति। उदाहरणार्थम् - एका एव व्यक्तिः काचित् बालिका भगिनी तथा च सङ्गीतज्ञा इव अस्मिता (परिचिता) भवितुं शक्नोति।

द्विगुणितभारः – ***एतस्य शाब्दिकः अर्थः अस्ति – द्विगुणितं भारः। सामान्यतः एतस्य शब्दस्य प्रयोगः महिलाभिः यानि कार्याणि क्रियन्ते तेषां कार्याणाम् अवगमनार्थं क्रियते। अयं शब्दः एतत् तथ्यं स्वीकरोति यत् महिलाः सामान्यरूपेण गृहस्य अन्तः तथा च गृहस्य बहिः द्विगुणितं कार्यभारं निर्वहन्ति।***

पर्यवेक्षणम् – ***पर्यवेक्षणस्य अन्तर्गतम् अनेकानि कार्याणि गण्यन्ते यथा पर्यवेक्षणं, दर्शनं, लालनं, पालनम् इत्यादीनि । शारीरिककार्याणि अतिरिच्य एतस्मिन् गहन-भावनात्मक-पक्षाः अपि सम्मिलिताः सन्ति।***

अवमूल्यितः – ***यदा कश्चित् स्वकार्यस्य कृते अपेक्षितां मान्यताम् अथवा स्वीकृतिं न प्राप्नोति तदा सः आत्मानम् अन्यैः अहम् अवमूल्यितः अस्मि इति अनुभवति । उदाहरणार्थं पश्यामः यदि कश्चन बालकः स्वमित्रस्य कृते चिरकालं यावत् चिन्तयित्वा अन्विष्य किञ्चित् उपहारं क्रीणाति तथा च तस्य मित्रं तत् दृष्ट्वा काम् अपि प्रतिक्रियां न कुर्यात् तस्मिन् समये तस्य मित्रम् आत्मानम् अहम् अवमूल्यितः इति अनुभवति।***

पञ्चमः अध्यायः

महिलाभिः परिवर्तितः संसारः

गताध्यायेषु वयं दृष्टवन्तः यत् केन प्रकारेण महिलाभिः करणीयं गृह्यकार्यं, कार्यम् एव न मन्यते। अस्माभिः एतत् अपि पठितं यत् गृह्यकार्यस्य सम्पादनं तथा च परिवारस्य सदस्यानां पर्यवेक्षणं सम्पूर्णस्य समयस्य कार्यम् अस्ति अपि च एतत् कार्यं प्रारब्धुं समापयितुं च कश्चन निश्चितः कालः अपि नास्ति। अस्मिन् अध्याये वयं गृहात् बहिः क्रियामाणानां कार्याणां विषये अवगमिष्यामः द्रक्ष्यामः च यत् कथं केचन व्यवसायाः महिलानाम् अपेक्षया पुरुषाणां कृते आधिक्येन उपयुक्ताः स्वीक्रियन्ते। वयम् एतत् अपि ज्ञास्यामः यत् समानतायाः प्राप्त्यर्थं स्त्रीभिः कीदृशाः सङ्घर्षाः कृताः। प्राक्तने काले अपि च अस्मिन् काले अपि शिक्षाप्राप्तिः कश्चित् एतादृशः उपायः अस्ति यस्य माध्यमेन स्त्रीणां कृते नूतनाः अवसराः कल्पयितुं शक्यन्ते। सह एव अस्मिन् अध्याये वयं साम्प्रतं विगतेषु वर्षेषु महिलान्दोलनैः भेदभावं आह्वयितुं कृतानां विभिन्नानां प्रयत्नानां विषये अपि संक्षेपेण ज्ञास्यामः।

कः किं कार्यं करोति ?

निम्नलिखितजनानां चित्राणि निर्मान्तु-



कश्चन कृषकः

कश्चन वस्त्रोद्योगस्य श्रमिकः

काचित् परिचारिका

कश्चन वैज्ञानिकः

कश्चन वायुयानचालकः

कश्चन कृषकः

चलामः, अधुना भवतां कक्ष्यायाः निर्मितचित्राणि द्रष्टुम्, अधोलिखितां तालिकां पूरयन्तु । अधुना प्रत्येकं व्यवसायस्य कृते पुरुषाणां महिलानां च चित्राणि पृथक्-पृथक् योजयन्तु।

वर्गः	पुरुष-चित्रम्	महिला-चित्रम्
शिक्षकः		
कृषकः		
वस्त्रोद्योग-श्रमिकः		
परिचारिका		
वैज्ञानिकः		
वायुयानचालकः		

किं महिलानाम् अपेक्षया पुरुषाणाम् अधिकानि चित्राणि सन्ति?

कीदृशेषु व्यवसायेषु स्त्रीणाम् अपेक्षया महिलानां चित्राणि न्यूनानि सन्ति ?

किं सर्वैः परिचारिकायाः कृते महिलायाः एव चित्रं निर्मितम् अस्ति? किमर्थम्?

किं महिलाकृषकाणां चित्राणि तुलनात्मकरूपेण अल्पतराणि सन्ति? यदि सन्ति तर्हि एतस्य किं कारणम् अस्ति?

भारते 83.6 प्रतिशतं महिलाः क्षेत्रेषु कार्यं कुर्वन्ति। तासां कार्येषु पादपानां रोपणम् अनिष्टतृणस्य निष्कासनं सस्यकर्तनं तथा च कुट्टनम् इत्यादीनि कार्याणि सम्मिलितानि सन्ति। पुनरपि यदा वयं कृषकस्य विषये चिन्तयामः तदा वयं कस्यचित् पुरुषस्य विषये एव चिन्तयामः।

(स्रोतः – एकषष्टितमः (61) नेशनल- सैंपल-सर्वे, 2004-05)

निजकक्ष्यायां कृतस्य अभ्यासस्य तुलनां रोजीमान्यायाः कक्ष्यायां कृताभ्यासेन सह कुर्वन्तु।

रोजीमान्यायाः कक्षायां त्रिंशत् बालकाः सन्ति। सा स्वकक्ष्यायाम् एतादृशमेव अभ्यासं कारितवती। परिणामः अनेन प्रकारेण आसीत्-

वर्गः	पुरुष-चित्राणि	महिला-चित्राणि
शिक्षकाः	05	25
कृषकाः	30	0
वस्त्रोद्योगस्य श्रमिकाः	25	05
परिचारिकाः (नर्स)	0	30
वैज्ञानिकाः	25	05
वायुयानचालकाः	27	03

न्यूनाः अवसराः कठोराः अपेक्षाः

रोजी-मान्यायाः कक्ष्यायाः अधिकतरैः बालकैः परिचारिकायाः कृते महिलायाः तथा च वायुयानचालस्य कृते पुरुषाणां चित्राणि रचितानि। एतादृशं ते एतस्मात् कारणात् कृतवन्तः यतोहि ते अनुभूतवन्तः यत् गृहाद् बहिः अपि महिलाः कानिचन विशिष्टानि कार्याणि एव सम्यक्प्रकारेण कर्तुं शक्नुवन्ति। उदाहरणार्थं बहवः जनाः मन्यन्ते यत् महिलाः उत्तमाः परिचारिकाः भवितुं शक्नुवन्ति यतोहि ताः आधिक्येन सहनशीलाः विनम्राः च भवन्ति । तासाम् एतत् कार्यं परिवारे स्त्रीणां दायित्वेन सह योजयित्वा दृश्यते। अनेन एव प्रकारेण मन्यते यत् विज्ञानार्थम् अभियान्त्रिक-मस्तिष्कस्य आवश्यकता भवति तथा च बालिकाः महिलाः च अभियान्त्रिकं कार्यं कर्तुं सक्षमाः नैव भवन्ति।

अनेके जनाः एतादृशीषु रूढिवादिषु धारणासु विश्वसन्ति । अतः नैकाभिः बालिकाभिः चिकित्सक-शिक्षायै आभियान्त्रिक-शिक्षायै तत्प्रशिक्षणाय च, सः सहयोगः न प्राप्यते यः बालकैः प्राप्यते अधिकांशपरिवारेषु विद्यालयीयायाः शिक्षायाः अनन्तरं बालिकाः एतं विषयं प्रति प्रेर्यन्ते यत् ताः विवाहम् एव स्वजीवनस्य मुख्यलक्ष्यं चिन्वन्तु।

एतस्य अवगमनम् आवश्यकम् अस्ति यत् वयम् एतादृशे समाजे निवसामः यत्र सर्वे बालकाः परितः स्थितेन संसारेण प्रदत्तेन अवसादेन ग्रस्ताः भवन्ति।
कदाचिद् अयम् अवसादः ज्येष्ठैः, मातृपितृभ्यां च कृतानाम् अपेक्षाणां कारणेन भवति, कदाचित् च मित्रैः कृतेन उपहासेन अपि बालकः अवसाद-ग्रस्तः भवति।
बालकेषु तथा सेवाकार्यं प्राप्तुम् अधिकं बलं दीयते यस्मिन् सेवाकार्ये ते अधिकं धनं प्राप्नुयुः। यदि ते अन्येषां बालकानाम् इव व्यवहारं न कुर्वन्ति तर्हि तैः सह विद्वेषः क्रियते अपि च तेषां भर्त्सना क्रियते। भवद्भिः स्मृतं स्यात् यत् षष्ठकक्ष्यायाः पुस्तके भवद्भिः पठितम् आसीत् यत् बालकाः बाल्यकालात् एव अपरेषां पुरतः बालकेषु रोदितेषु सत्सु ते जुगुप्सा-दृष्ट्या दृश्यन्ते।

गतानुगतिकतां त्रोटितवती अस्ति

रेलयानस्य इंजन इत्यस्य सञ्चालनं पुरुषाः कुर्वन्ति। परन्तु झारखण्डस्य कस्यचित् निर्धनस्य आदिवासि-परिवारस्य सप्तविंशतिवर्षीया महिला लक्ष्मीलाकरा एतां परम्परां परिवर्तितवती। उत्तरी-रेलमार्ग-विभागस्य सा प्रथमा महिला-इंजन-चालिका अस्ति।

लक्ष्म्याः पितरौ साक्षरौ न स्तः परन्तु ते स्वपुत्रान् पाठयितुम् अतीव सङ्घर्षं कृतवन्तौ। लक्ष्म्याः शिक्षा एकस्मिन् सर्वकारीये विद्यालये जाता। विद्यालये पठनेन सह एव लक्ष्मीः गृह्यकार्येषु अन्येषु दायित्वेषु च अपि पितॄणां सहयोगं करोति स्म। सा दत्तचेतसा परिश्रमेण च अध्ययनं कृतवती अपि च विद्यालयीयम् अध्ययनं सम्पाद्य इलेक्ट्रानिक्स अर्थात् वैद्युतीये विषये उपाधिम् अर्जितवती। पुनः सा रेलवे-बोर्ड इत्यस्य परीक्षायाम् भागं गृहीतवती तथा च प्रथमेन प्रयासेन एव उत्तीर्णतां प्राप्तवती।

लक्ष्मीः कथयति "आह्वानैः सह क्रीडनं मह्यं रोचते अपि च यस्मिन् काले कश्चित् कथयति यत् एतन्नामकं कार्यं बालिकानां कृते नास्ति तदा अहं तत् कार्यं कृत्वा एव विश्रान्तिं गच्छामि"। लक्ष्म्याः जीवने एतादृशाः अनेके अवसराः समागताः। यथा- यदा सा विद्युत्-शिक्षां प्राप्तुम् इच्छति स्म यदा सा पालीटेक्नीक इत्यस्मिन् द्विचक्रिकायानं चालितवती तथा च यदा सा निश्चितवती यत् सा इंजन-चालिका भविष्यति।

तस्याः दृष्टिकोणः सरलः अस्ति यावत् पर्यन्तम् अहम् आनन्दम् अनुभवामि अपि च अहं कस्यापि हानिं न कुर्वती अस्मि अपि च सम्यक्प्रकारेण व्यवहरामि निवसामि च तथा च स्वमातापित्रोः साहाय्यं कुर्वती अस्मि तर्हि अहं स्व-शैल्या जीवनस्य यापनं किमर्थं न कुर्याम्?"

(ड्राइविंग हर ट्रेन, नीता लाल,वीमेन्स.फीचर सर्विस इत्यस्मात् रूपान्तरितम्)

परिवर्तनाय शिक्षणम्

अधोलिखितां कथां पठन्तु तथा च तदनन्तरं प्रदत्तप्रश्नानाम् उत्तराणि यच्छन्तु -

यदि भवन्तः जेवियर इत्यस्य स्थाने अभविष्यन् तर्हि कान् विषयान् अचेष्यन् ?

स्वानुभवस्य आधारेण ज्ञापयन्तु यत् बालकैः एतादृशाः के के अनुभवाः सोढव्याः भवन्ति?

विद्यालयस्य गमनं भवतां जीवनस्य नितरां महत्त्वपूर्णः भागः अस्ति। यथा यथा विद्यालयेषु प्रतिवर्षम् अधिकाधिक-सङ्ख्यायां बालकाः प्रवेशं स्वीकुर्वन्ति वयं चिन्तयामः यत् सर्वेषां बालकानां कृते ***विद्यालय-गमनं कश्चन सामान्यः विषयः अस्ति। अद्यत्वे अस्माकं कृते इदं कल्पनम् अपि कठिनम् अस्ति यत् - केषाञ्चित् बालकानां कृते विद्यालय-गमनं पठनं च, 'तेषां प्राप्तेः विषयः नास्ति' अथवा 'इयं वार्ता अनुचितवार्ता' इति अपि मन्तुं शक्यते।***

जेवियरः स्वस्य दशमकक्षायाः परीक्षाफलं दृष्ट्वा प्रसन्नः आसीत्। यद्यपि विज्ञाने गणिते च सः अधिकान् अङ्कान् न प्राप्तवान् आसीत् परन्तु स्वस्य रुचिकरे विषये इतिहासे भाषासु च सः सम्यक् प्रदर्शनं कृतवान् आसीत्। यदा तस्य माता-पितरौ परिणामं दृष्टवन्तौ तदा ते प्रसन्नौ न आस्ताम्...





परन्तु अतीतकाले लेखनं पठनं च केचन जनाः एव जानन्ति स्म । अधिकांशतः बालकाः तदेव कार्यं शिक्षन्ते स्म यत् कार्यं तेषां परिवारे भवति स्म अथवा तेषां पूर्वजाः वरिष्ठाः च कुर्वन्ति स्म । बालिकानां स्थितिः इतोऽपि दयनीया आसीत् । तेषु समाजेषु यत्र बालकाः लेखितुं पठितुं च शिक्ष्यन्ते स्म बालिकानां कृते कस्यचित् अक्षरस्य

अपि शिक्षणस्य अनुमतिः नासीत् । येषु परिवारेषु कुम्भकारशिल्पः वस्त्रवयनं हस्तकलाः च इत्यादयः शिक्ष्यन्ते स्म तत्र अपि इयम् अवधारणा आसीत यत् महिलानां बालिकानां च कार्यं केवलं साहाय्यं यावत् एव सीमितम् अस्ति । उदाहरणार्थं कुम्भकारस्य व्यवसाये बालिकाः मृत्तिकायाः एकत्रीकरणं कुर्वन्ति स्म तथा च निर्माणार्थं सज्जीकुर्वन्ति स्म । यतोहि ताः चक्रं न चालयन्ति स्म, अतः ताः कुम्भकाराः इति न मन्यन्ते स्म ।

एकोनविंशत्यां शताब्द्यां प्रायः 200 वर्षेभ्यः पूर्वं शिक्षायाः विषये वहुविधाः विचाराः प्रादुर्भूताः । विद्यालयानां प्रचलनम् आधिक्येन जातं तथा च ते समाजाः ये स्वयं कदाचित् साक्षराः न आसन् ते अपि स्वबालकान् विद्यालयं प्रति प्रेषयितुम् आरब्धवन्तः । तदा अपि बालिकानां शिक्षायाः महान् विरोधः जातः । एतद् अतिरिच्य बहुभिः पुरुषैः महिलाभिः च बालिकानां कृते विद्यालयस्य उद्घाटनस्य प्रयत्नाः कृताः । स्त्रीभिः साक्षरता-प्राप्त्यै सङ्घर्षः कृतः।

रमाबाईमहोदया(1858-1922) स्वपुत्र्या सह ।

महिलाशिक्षायाः एषा योद्धी स्वयं कदाचिदपि विद्यालयं न गतवती परन्तु स्वमाता-पितृभ्यां सा पठनं लेखनं च शिक्षितवती । तस्यै पण्डिता इति उपाधिः प्रदत्ता यतोहि सा संस्कृतं पठितुं लेखितुं च जानाति स्म एतत्कार्यं तदानीन्तनीनां महिलानां कृते महती उपलब्धिः आसीत् । महिलानां कृते तदा संस्कृतस्य ज्ञानार्जनस्य अनुमतिः न आसीत् । सा 1898 तमे वर्षे पुणे-नगरस्य समीपे खेडग्रामे एकां संस्थां स्थापितवती यत्र विधवा-स्त्रीभ्यः निर्धनमहिलानां च कृते पठनस्य लेखनस्य तथा च स्वतन्त्रजीवनस्य शिक्षा दीयते स्म । तेषां कृते काष्ठवस्तुनिर्माणस्य मुद्रणालय-सञ्चालन-सदृशानां च कौशलानाम् अपि प्रशिक्षणं दीयते स्म यत् प्रशिक्षणं वर्तमाने काले अपि न्यूनतया एव बालिकानां कृते दीयते । उपरि वामतः प्रदत्ते चित्रे तस्य मुद्रणालयः दृश्यते । रमाबाईमहोदयायाः संस्था अद्यापि सक्रिया अस्ति ।

आगच्छन्तु वयं राससुन्दरीदेव्याः अनुभवान् पठामः या द्विशतं वर्षेभ्यः पूर्वं पश्चिमबङ्गप्रान्ते जन्म लब्धवती आसीत् । वयसः षष्टिवर्षे सा बाङ्ग्लाभाषायाम् आत्मकथां लिखितवती । तस्याः पुस्तकम् आमार-जीबोन इति कयाचित् भारतीयमहिलया लिखिता प्रथमा आत्मकथा अस्ति । राससुन्दरीदेवी कस्यचित् धनाढ्यपरिवारस्य गृहिणी आसीत् । तस्मिन् काले जनानां विश्वासः आसीत् यत् काचित् बालिका साक्षरा भवति तर्हि सा स्व-पत्युः कृते दुर्भाग्यं लाति तथा च सा विधवा भवति । एतद् अतिरिच्य सा स्वविवाहस्य बहुकालानन्तरं स्वयमेव निलीय निलीय पठितवती । "अहम् अत्यन्तं प्रातःकाले एव कार्यस्य आरम्भं करोमि स्म तथा च अर्धां रात्रिं यावत् कार्ये संलग्ना भवामि स्म । मध्ये अपि विश्रान्तिं न स्वीकरोमि स्म । तस्मिन् काले अहं केवलं वयसा चतुर्दशवर्षीया आसम् । मम मनसि कश्चित् अभिलाषः उदीयमानः जातः - अहं पठनं ज्ञास्यामि शिक्ष्ये तथा च काञ्चित् धार्मिकीं पाण्डुलिपिं पठिष्यामः। अहम् अभागिनी आसम् । तेषु दिवसेषु स्त्रियः न पाठ्यन्ते स्म । पश्चात् अहं स्वयमेव स्वविचाराणां विरोधं कर्तुम् आरब्धवती । अहं किं चिन्तयामि किं जातं च ? स्त्रियः नैव पठन्ति पुनरपि अहं कथं पठिष्यामि ? पुनरपि अहं स्वप्नं दृष्टवती अहं चैतन्यभागवतस्य (कस्यचित् सतः) जीवनचरितं पठामि स्म । पश्चात् दिवसे यदा अहं

शिक्षां प्राप्य काश्चन महिलाः समाजे स्त्रीणां स्थितेः विषये प्रश्नान् कृतवत्यः। ताः असमानतायाः विषये स्वस्य अनुभवानां वर्णनं कुर्वत्यः कथाः पत्राणि आत्मकथाः च लिखितवत्यः। स्वलेखेषु ताः स्त्रीणां पुरुषाणां च कृते चिन्तनस्य जीवनस्य नूतनानाम उपायानां च कल्पनां कृतवत्यः।

पाकशालायाम् उपविष्टा आसं भोजनं पचामि स्म अहं श्रुतवती मम पतिः ज्येष्ठतमं पुत्रं कथयति- "विपिन! अहं स्वस्य चैतन्यभागवत-पुस्तकम् अत्र त्यक्तवान्। यदा अहम् एतत् अन्तः आनेतुं वदिष्यामि तदा भवान् एतत् अन्तः आनयतु।"

रुकैयासखावत-हुसैन-मान्या तथा च लेडीलैंड इत्यस्य तस्याः स्वप्नः

रुकैया-सखावत-हुसैन-मान्या कस्मिंश्चित् धनिके परिवारे अजायत यस्य पार्श्वे बहुभूमिः आसीत्। यद्यपि सा उर्दू पठितुं लेखितुं च जानाति स्म परन्तु सा बाङ्ग्लाशिक्षातः आङ्ग्लशिक्षातः च निवारिता। तस्मिन् काले आङ्ग्लभाषा एतादृशी भाषारूपेण मन्यते स्म या बालिकानां पुरतः नूतनान् विचारान् स्थापयति स्म। रुकैया स्वस्य ज्येष्ठभ्रातुः भगिन्याः च सहयोगेन बाङ्ग्लाभाषाम् आङ्ग्लभाषां च लेखितुं पठितुं च ज्ञातवती। कालक्रमेण सा लेखिका जाता। 1905 तमे वर्षे यदा सा केवलं पञ्चविंशतिवर्षीया आसीत् तदा सा आङ्ग्लभाषायाः कौशलं प्रातुम् अभ्यासार्थं च काञ्चित् प्रसिद्धां कथां लिखितवती यस्याः शीर्षकम् आसीत् सुल्तानायाः स्वप्नः। कथायां सुल्तानानाम्न्याः कस्याश्चित् स्त्रियः कल्पना कृता आसीत् या लेडीलैंडनामके एकस्मिन् स्थाने प्राप्नोति। लेडीलैंड इति किञ्चित् एतादृशं स्थानम् आसीत् यत्र स्त्रीणां कृते पठितुं कार्यं कर्तुम् आविष्कारं च कर्तुं स्वतन्त्रता आसीत्। एतस्यां कथायां महिलाः मेघेभ्यः जायमानां वृष्टिं रोद्धुम् उपायान् अन्वेषयन्ति तथा च वायुकारयानानि चालयन्ति। लेडीलैण्ड इति स्थाने पुरुषाणाम् आक्रामक-भुशुण्डयः तथा च अन्यानि अस्त्राणि शस्त्राणि च स्त्रीणां बौद्धिकशक्तेः पराभवं प्राप्नुवन्ति स्म अपि च पुरुषाः एकस्मिन् पृथक्स्थाने प्रेष्यन्ते। सुल्ताना लेडीलैण्ड-मध्ये स्वभगिन्या साराहया सह यात्रार्थं गच्छति तदा तस्य नेत्रे उद्घटेते तथा च सा जानाति यत् सा केवलं स्वप्नं पश्यति स्म।

यथा भवद्भिः दृष्टं रुकैया-सखावत-हुसैन-मान्या तस्मिन् समये स्त्रीणां वायुयानचालनस्य कारयानानां चालनस्य च स्वप्नानि पश्यन्ति स्म तदा बालिकानां कृते विद्यालयं प्रति गन्तुम् अपि अनुमतिः न आसीत्। अनेन प्रकारेण शिक्षया रुकैयायाः जीवनं परिवर्तितम्। रुकैया केवलं स्वयं शिक्षिता भूत्वा सन्तुष्टा न जाता। तस्याः शिक्षया तस्याः कृते स्वप्नदर्शनस्य लेखनस्य च एव शक्तिः न प्रदत्ता परन्तु ततोऽपि आधिक्येन कर्तुं शक्तिः प्रदत्ता। 1910 तमे वर्षे सा कोलकातानगरे बालिकानां कृते विद्यालयम् उद्घाटितवती यः अद्यापि कार्यं करोति।

सः पुस्तकं तत्रैव परित्यज्य गतवान्। यदा पुस्तकम् अन्तः स्थापितम् अहं गुप्तरूपेण तस्य एकं पृष्ठं निष्कासितवती अपि च सावधानतया तत् गोपितवती। तस्य गोपनम् अपि किञ्चित् महत्कार्यम् आसीत् यतोहि तत् कोऽपि मम हस्ते न पश्येत् तथा मया आचरणीयम् आसीत्। लघुतमः पुत्रः तस्मिन् समये ताडपत्रेषु लेखनाभ्यासं कुर्वन् आसीत्। तेषु पत्रेषु अपि अहम् एकं गोपितवती। यदा अवसरम् अहं प्राप्नोमि स्म तदा अहं गत्वा तस्मिन् पत्रे तस्य पृष्ठस्य अक्षराणां मेलनस्य प्रयासं करोमि स्म। अहं तेषां शब्दानाम् अपि मेलनस्य प्रयासं कृतवती ये शब्दाः मया आदिनं श्रूयन्ते स्म। आधिक्येन प्रयत्नं कृत्वा अहं चिरकालानन्तरं पठनं लेखनं च ज्ञातवती।"

राससुन्दरीदेव्याः अक्षरज्ञानं तस्यै चैतन्यभागवतस्य अध्ययनस्य अवसरं दत्तवान्। स्वलेखनेन सा संसारस्य कृते स्त्रीणां तात्कालिकस्य जीवनस्य विषये ज्ञातुं कञ्चित् अवसरं दत्तवती। राससुन्दरीदेवी स्वदैनन्दिनजीवनस्य अनुभवान् विस्तरेण लिखितवती। एतादृशानि अपि दिनानि भवन्ति स्म यदा सा आदिनं क्षणं यावत् अपि विश्रान्त्याः अवसरं न प्राप्नोति स्म एतावान् कालः अपि न लभ्यते स्म यत् सा क्षणं यावत् उपविश्य किञ्चित् भक्षयितुं शक्नुयात्।

वर्तमान-काले शिक्षा विद्यालयाः च

वर्तमानयुगे बालकाः बालिकाः च विशालायां सङ्ख्यायां विद्यालयं प्रति गच्छन्ति परन्तु तथापि वयं पश्यामः यत् बालिकाबालकयोः शिक्षायां भेदः अस्ति। भारते प्रतिदशवर्षं जनगणना भवति यस्यां सम्पूर्णस्य देशस्य जनसङ्ख्यायाः गणना क्रियते। एतस्यां भारतवासिनां जीवनस्य विषये अपि विस्तृता सूचना एकत्रीक्रियते यथा तेषाम् आयुषः अध्ययनस्य तैः कृतानां कार्याणां च विषये ज्ञायते। एतस्य सूचनायाः प्रयोगं वयम् अनेकेषां तथ्यानाम् आकलनार्थं कुर्मः यथा शिक्षितजनानां सङ्ख्या तथा च स्त्रीपुरुषयोः अनुपातः। 1961 इत्यस्य जनगणनायाः अनुसारं सर्वेषां बालकानां पुरुषाणां (सप्तवर्षीयाः अपि च ततोऽधिकाः आयुषः) 40 प्रतिशतं शिक्षितवर्गः आसीत्। एतस्य तुलनायां बालिकानां स्त्रीणां च केवलं 15 प्रतिशतं भागः शिक्षितः आसीत्। 2001 तम-वर्षस्य जनगणनायाः अनुसारं बालकानां पुरुषाणां च इयं सङ्ख्या वर्धित्वा

राससुन्दरीदेवी रुकैयाहुसैनमान्याः च ये साक्षरे भवितुम् अनुमतिं न प्राप्तवत्यौ आस्तां तयोः स्थितेः विपरीतं वर्तमानकाले भारते व्यापकसङ्ख्यायाम् अपि बालिकाः विद्यालयं गच्छन्ति। एतदतिरिच्य अपि बहव्यः बालिकाः निर्धनतायाः कारणात् शिक्षण-सौविध्यानाम् अभावकारणात् तथा च भेदभावस्य कारणतः विद्यालस्यस्य गमनं त्यजन्ति। सर्वेषां समाजानां वर्गाणां च बालकानां कृते शिक्षणस्य समानरूपेण सौविध्यानां वितरणं विशेषतया बालिकानां कृते अद्यापि भारते किञ्चित् आह्वानम् अस्ति।

76 प्रतिशतम् अभवत् तथा च शिक्षित-बालिकानां स्त्रीणां च सङ्ख्या 54 प्रतिशतम् अभवत्। एतस्य अभिप्रायः अयम् अभवत् यत् स्त्रीपुरुषयोः मध्ये एतादृशानां जनानाम् अनुपातः वर्धितः अस्ति ये साक्षरं भवितुं शक्नुवन्ति तथा च ये स्वल्पेन शिक्षां प्राप्तवन्तः सन्ति। परन्तु यथा भवन्तः द्रष्टुं शक्नुवन्ति अधुना अपि स्त्रीणां तुलनायां पुरुषाणां प्रतिशतता अधिका वर्तते। एतयोः मध्ये यत् अन्तरं वर्तते तत् अधुना समाप्तिं न गतम् अस्ति।

अधोलिखित-तालिकायां विभिन्न-वर्गाणां तेषां बालकानां बालिकानां प्रतिशतं दर्शितम् अस्ति ये मध्ये एव विद्यालयं त्यजन्ति। शासकीय-शब्दावल्यां दलितानां कृते अनुसूचित-जातीनाम् अनुसूचित-जनजातीनां च कृते अनुसूचित-जनजाति-शब्दावल्याः उपयोगः क्रियते।

विद्यालयस्य स्तरः	सम्पूर्णाः बालकाः %	अनु.जात्याः बालकाः %	अनु.जन.जात्याः बालकाः%	सम्पूर्णाः बालिकाः%	अनु.जात्याः बालिकाः%	अनु.जन.जात्याः बालिकाः%	योगः%
प्राथमिकस्तरे(कक्षा 1तः5)	34	37	49	29	36	49	31
माध्यमिकः इति(कक्षा 6तः8)	52	57	69	53	62	71	52
उच्चमाध्यमिक इति(कक्षा9तः 10)	61	71	78	65	76	81	63

स्रोतः – चयनित-शिक्षण-सर्वेक्षणं,भारतसर्वकारः 2003-04

माध्यमिकस्तरेण कति बालकाः विद्यालयं त्यजन्ति ?

शिक्षायाः कस्मिन् स्तरे भवद्भिः सर्वाधिकाः बालकाः विद्यालयं त्यजन्तः दृश्यन्ते ?

भवतां विचारानुसारम् अन्येषां वर्गाणां तुलनायाम् आदिवासिबालकानां बालिकानां विद्यालयस्य त्यागस्य मात्रा अधिका किमर्थम् अस्ति?

सम्भवतः भवद्भिः उपरि-प्रदत्त-तालिकायाम् एतस्मिन् विषये अवधानं कृतं स्यात् यत् सर्वासां बालिकानां श्रेण्याः तुलनायाम् अनुसूचित-जातीनां तथा च अनुसूचित-जनजातीनां च बालिकानां विद्यालयस्य त्यागस्य प्रतिशतता अधिका अस्ति। एतस्य अर्थः अयं जातः यत् दलितपृष्ठभूमेः आदिवासिपृष्ठभूमेः च बालिकानां विद्यालये पठनस्य सम्भावना अत्यल्पा भवति। २००१ तम-वर्षस्य जनगणनया इदम् अपि ज्ञायते यत् दलित-आदिवासिनीनां बालिकानाम् अपेक्षया मुस्लिमबालिकानां प्राथमिकशिक्षायाः सम्पूर्णतया ग्रहणस्य सम्भावना इतोऽपि न्यूनतरा भवति। मुस्लिमबालिकाः विद्यालये प्रायः त्रीणि वर्षाणि यावत् तिष्ठन्ति अपरञ्च अन्यसमुदायानां बालिकाः विद्यालये चत्वारिवर्षाणि यावत् तिष्ठन्ति।

दलितबालकानाम् आदिवासि-बालकानां मुस्लिमवर्गस्य बालकानां च विद्यालयस्य त्यागस्य बहूनि कारणानि सन्ति। देशस्य अनेकेषु भागेषु विशेषतया ग्रामीणेषु तथा च निर्धनक्षेत्रेषु नियमितरूपेण पाठनस्य कृते उचितरूपेण विद्यालयाः न सन्ति न च शिक्षकाः सन्ति। यदि विद्यालयः गृहस्य समीपे न स्यात्,

तथा च नयनस्य आनयनस्य च कृते कस्यचित् साधनस्य व्यवस्था, यथा बसयानस्य अथवा वैन इत्यादिकस्य वा न स्यात् तर्हि अभिभावकाः बालिकाः विद्यालयं न प्रेषयितुम् इच्छन्ति।

केचन परिवाराः अत्यन्तनिर्धनाः भवन्ति तथा च स्वस्य सर्वान् बालकान् पाठयितुं व्ययं न कर्तुं शक्नुवन्ति। एतादृश्याम् अवस्थायां बालकाः प्राथमिकतां भजन्ते। बहवः जनाः एतस्मात् कारणाद् अपि विद्यालयं त्यजन्ति यतोहि तैः सह तेषां शिक्षकाः सहपाठिनः च भेदभावं कुर्वन्ति यथा ओमप्रकाश-वाल्मीकिना सह अभवत्।



बालकाः बालिकाः च

प्राथमिककक्ष्यासु विद्यालय-त्यक्तॄणां बालकानाम् अङ्कान् उपरि-प्रदत्त-तालिकासु स्वीकृत्य दण्डरेखायाः रूपेण दर्शयन्तु। आदितः प्रथमौ द्वौ अङ्कौ भवतां कृते दण्डरेखायाः रूपेण दर्शितौ स्तः।

महिलान्दोलनम्

अधुना महिलाः बालिकाः च विद्यालयं गन्तुं प्राप्ताधिकाराः सन्ति। अन्यानि क्षेत्राणि अपि सन्ति यथा अधिनियमेषु परिष्कारः हिंसा स्वास्थ्यं च यत्र बालिकानां महिलानां च स्थितिः परिष्कृता जाता। एतानि परिवर्तनानि स्वयमेव न जातानि। महिलाभिः व्यक्तिगतस्तरेण तथा च सम्भूय एतेषां परिवर्तनानां कृते सङ्घर्षाः कृताः। एते सङ्घर्षाः एव महिलान्दोलनम् इति उच्यन्ते। देशस्य विभिन्नेभ्यः भागेभ्यः बह्व्यः महिलाः अनेकानि महिला-सङ्घटनानि च एतस्य आन्दोलनस्य भागरूपाणि सन्ति। बहवः पुरुषाः अपि महिला-आन्दोलनस्य समर्थनं कुर्वन्ति। एतस्मिन् आन्दोलने युक्तानां जनानां परिश्रमः निष्ठा तथा च तेषां विशेषताः एतत् आन्दोलनं किञ्चित् जागरूक-आन्दोलनरूपेण प्रस्तुवन्ति। एतस्मिन् चेतनायाः जागरणार्थं भेदभाव-मानसिकतया सह योद्धुं तथा च न्यायस्य प्राप्त्यर्थं विभिन्नानां रणनीतीनाम् उपयोगः कृतः अस्ति। एतेषां कानिचन दृश्यानि अत्र भवन्तः द्रष्टुं शक्नुवन्ति।



अभियानम्

भेदभावनायाः हिंसायाः च विरोधे अभियानस्य आयोजनं महिला-आन्दोलनस्य कश्चित् महत्त्वपूर्णः भागः अस्ति। अभियानानां परिणामरूपेण नूतनाः अधिनियमाः अपि निर्मिताः सन्ति। २००६तमे वर्षे कश्चित् अधिनियमः जातः अस्ति यस्मिन् गृह्यशारीरिक-हिंसया मानसिकहिंसया च पीडितानां महिलानां कृते अधिनियमसुरक्षा प्रदत्ता स्यात्।

अनेन एव प्रकारेण महिला-आन्दोलनस्य अभियानानां कारणतः १९९७ तमे वर्षे सर्वोच्चन्यायालयेन कार्यस्य स्थाने शैक्षणिकसंस्थानेषु च महिलानां यौनप्रताडनाभ्यः तासां रक्षणार्थं दिशानिर्देशाः प्रदत्ताः सन्ति।

एकम् उदाहरणं पश्यामः चेत् 1980 तमे दशके सम्पूर्णस्य देशस्य महिला-सङ्घटनानि यौतुकधनस्य कारणेन जातानां हत्यानां विरोधं कृतवन्ति । नवविवाहित-युवतयः यौतुकधन-प्राप्तेः लोभात् पतिपक्षीयैः जनैः हन्यन्ते स्म । महिलासङ्घटनैः एतादृशीनां घटनानां महती आलोचना कृता यत् अधिनियम-शासनम् अपराधिनां कृते कठोरां दण्डव्यवस्थां न करोति । एतस्य विरोधे महिलाः राजमार्गेषु आगतवत्यः। ताः न्यायालयस्य शरणं गतवत्यः तथा च परस्परम् अनुभवानां सूचनानां च आदान-प्रदानं कृतवत्यः। अन्ते, अयं समाजस्य कश्चित् महान् सार्वजनिक-चर्चायाः विषयः जातः तथा च समाचारपत्रेषु अपि नैरन्तर्येण प्रकाशितः। यौतुकधनसम्बन्धितः अधिनियमः परिवर्तितः, येन यौतुकधनस्य याचना-कर्तारः परिवाराः दण्डिताः भवेयुः।

सत्यारानीमहोदया महिलान्दोलनानां काचित् सक्रिया सदस्या यौतुकधनस्य कृते हता स्वस्य पुत्र्याः विषये न्यायार्थं कृतस्य लम्बतरस्य अभियोगस्य न्यायसम्बन्धीकर्गदैः आवृत्ताः सर्वोच्चन्यायालयस्य सोपानेषु उपविष्टा अस्ति।

जागरूकतायाः वर्धनम्

महिलानाम् अधिकाराणां सम्बन्धेषु समाजे जागरूकतायाः वर्धनम् अपि महिला-आन्दोलनानां किञ्चित् प्रमुखं कार्यम् अस्ति। गीतानां वीथिनाटकानां जनसभानां च माध्यमेन तत् स्व-सन्देशं जनानां मध्ये प्रापयति।

विरोधप्रदर्शनम्

यदा महिला-हितानाम् उल्लङ्घनं भवति यथा केनचित् अधिनियमेन अथवा नीत्या तदा आन्दोलनम् एतादृशानाम् उल्लङ्घनानां विरोधे स्वध्वनिं मुखरां करोति। जनानाम् अवधान-आकर्षणाय प्रदर्शनानि पदयात्राः इत्यादयः अनेके उपायाः सन्ति।

बन्धुत्वस्य व्यक्तीकरणम्

न्यायस्य अन्यैः विषयैः सह तथा च महिलाभिः सह बन्धुत्वभावनायाः प्रकटनम् अपि महिला-आन्दोलनस्य एव भागः अस्ति।

मार्चमासस्य अष्टमे दिनाङ्के अन्ताराष्ट्रीय-महिलादिवसं सम्पूर्णे विश्वे महिलाः स्वसङ्घर्षान् नवीनीकर्तुं तथा च प्रसन्नतायाः व्यक्तीकरणार्थं एकत्रिताः भवन्ति।

प्रतिवर्षम् अगस्तमासस्य चतुर्दशदिनाङ्के भारत-पाकिस्तानयोः सीम्नि सहस्राधिकाः जनाः एकत्रिताः भवन्ति तथा च कस्यचित् सांस्कृतिक-कार्यक्रमस्य आयोजनं कुर्वन्ति । उपरि प्रदत्ते चित्रे भारतस्य पाकिस्तानस्य च जनानां मध्ये बन्धुत्वं प्रदर्शयितुं महिलाः ज्वलन्तीः सिक्थवर्तिकाः उत्थापयन्ति।

अभ्यासः

१ भवतां चिन्तनेन महिलानां विषये प्रचलिताः रूढिवादिन्यः धारणाः याः सन्ति यत् ते किं कर्तुं शक्नुवन्ति किं वा न कर्तुं शक्नुवन्ति ताः महिलानां समानतायाः अधिकारं कथं प्रभावयन्ति ?

२ किमपि एकं कारणं ज्ञापयन्तु यस्य कारणेन राससुन्दरीदेव्याः रमाबाईमान्यायाः तथा च रुकैया-हुसैन-महोदयायाः च कृते अक्षरज्ञानम् एतावत् महत्त्वपूर्णम् आसीत् ।

३ निर्धनबालिकाः अध्ययनम् अपूर्णम् एव त्यजन्ति यतोहि शिक्षायां तासां रुचिः नास्ति । सप्तदशे पृष्ठे प्रदत्तम् अनुच्छेदं पठित्वा स्पष्टं कुर्वन्तु यत् एतत् कथनं सत्यं किमर्थं नास्ति ?

४ किं भवन्तः महिला-आन्दोलनेन व्यवहारे आनीतानां सङ्घर्षाणां द्वयोः प्रकारयोः विषये ज्ञापयितुं शक्नुवन्ति ? 'महिलाः किं कर्तुं शक्नुवन्ति तथा च किं न' एतस्मिन् विषये भवद्भिः रूढीनां विरोधे सङ्घर्षः करणीयः स्यात् तर्हि भवन्तः पठितेषु विधिषु केषां विधीनां प्रयोगं करिष्यन्ति ? भवन्तः एतस्य विशिष्टस्य विधेः उपयोगं किमर्थं करिष्यन्ति ?

शब्द-सङ्कलनम्

रूढिवादिधारणा – *यदा वयं विश्वासं कर्तुम् आरभामहे यत् कस्यचित् विशिष्टस्य धार्मिकस्य आर्थिकस्य क्षेत्रीयसमूहस्य च जनानां काश्चन विशिष्टताः भवन्ति एव अथवा ते केवलं विशिष्ट-प्रकारकम् एव कार्यं कर्तुं शक्नुवन्ति तदा रूढिवादि-धारणानां जन्म भवति। यथा अस्मिन् पाठे वयं दृष्टवन्तः यत् बालिकाः बालकाः च विभिन्नान् विभिन्नान् विषयान् स्वीकुर्युः इति ते आदिष्टाः। कारणं रुच्यानुसारं ते तथा कुर्युः इति न आसीत् परन्तु बालिकाबालकयोः आधारेण तैः तथा करणीयम् आसीत् । रूढिवादिधारणाः जनानां तेषां वैयक्तिक-विशिष्टताभिः सह दर्शनात् अस्मान् रुन्धन्ति ।*

भेदभावः (भावना) - *भेदभावः तदा भवति यदा वयं जनैः सह समानतायाः आदरस्य च व्यवहारं न कुर्मः। एतादृशं तदा भवति यदा जनः अथवा संस्थाः पूर्वाग्रहेण ग्रसिताः भवन्ति । भेदभावः तदा भवति यदा वयं केनापि सह पृथक् व्यवहारं कुर्मः अथवा भेदमानसिकतया व्यवहरामः।*

उल्लङ्घनम् - *यदा कश्चित् बलात् अधिनियमस्य उल्लङ्घनं करोति अथवा मुक्तरूपेण कस्यचित् अपमानं करोति तदा वयं वक्तुं शक्नुमः यत् सः उल्लङ्घनं कृतवान् अस्ति ।*

यौनप्रताडना – *एतस्य अभिप्रायः अयं वर्तते यत् यदा कश्चित् महिलायाः इच्छां विरुध्य तया सह यौनसम्बद्धां शारीरिकीं मौखिकीं च काञ्चित् क्रियां करोति तदा सा यौनप्रताडना इति उच्यते ।*

चतुर्थः घट्टः

सञ्चारमाध्यमानि विज्ञापनानि च

शिक्षकाणां कृते

अद्यत्वे सञ्चार-माध्यमानां विज्ञापनानां च प्रतिबिम्बः युवकानां जीवने सम्पूर्णतया व्याप्तः अस्ति, ते एतां सत्यतां गभीरतया अवगमनस्य प्रयासं कृतवन्तः स्युः अथवा न कृतवन्तः स्युः। अयं घट्टः अस्यां सत्यतायां ध्यानाकर्षणस्य केषाञ्चित् मार्गाणाम् आविष्करणं करिष्यति।

"सञ्चार-माध्यमानां विषये अवगमनम्" नामके अध्याये मुख्यरूपेण सञ्चार-माध्यमानां प्रौद्योगिक्या सह तथा च महद्भिः व्यवसायिक-प्रतिष्ठानैः सह सम्बन्धान् बोधयितुं बलाघातः कृतः। अयम् अध्यायः दर्शयति यत् कथं कस्यचित् विषयस्य महत्त्वस्य विषये अथवा तस्य महत्त्वहीनतां स्वीकृत्य वयं यासाम् अवधारणानां निर्माणं कुर्मः ताः सञ्चारमाध्यमैः प्रभाविताः भवन्ति एतद् एव वास्तविकतायां तेषां मुख्यध्येयं भवति। विज्ञापनानाम् अवगमनं नामके अध्याये वयम् एतस्य तथ्यस्य विश्लेषणं कुर्मः यत् विज्ञापनस्य रणनीतयः ग्राहकान् कथं प्रभावयन्ति तथा च सह एव इदम् अपि दर्शयन्ति यत् विज्ञापनानि केन प्रकारेण निर्मीयन्ते। कस्यापि विज्ञापनस्य आधारः भवति कस्यचित् उत्पादस्य विशिष्टतायाः विकसनम् तथा च तस्य ब्राण्ड इत्यस्य महत्त्वस्य स्थापनम्। अयम् अध्यायः तेषाम् उपायानाम् अन्वेषणे परिचयने च अपि साहाय्यं करोति ये ग्राहकाणां मनसि लोभस्य उत्पादने सफलतां लभन्ते तथा च बोधयति यत् अयं पाठः कथम् एते उपायाः ग्राहकाणाम् आत्मव्यक्तित्वेन सम्बद्धाः क्रियन्ते।

षष्ठाध्यायः सप्तमाध्यायः च सञ्चारमाध्यमानां विज्ञापनानां च व्यापकप्रभावेभ्यः अस्माकं परिचयं कारयतः तथा च अस्माकं जीवनेन सह एतान् विषयान् योजनस्य प्रयासं कुर्वन्ति। सञ्चार-माध्यम इति अध्यायस्य अन्ते अस्माकम् इयम् अपेक्षा भविष्यति यत् विद्यार्थिनः इदं ज्ञातुम् आरभन्तां यत् विशालानां व्यवसायिक-प्रतिष्ठानानां सञ्चारमाध्यमेषु प्रकाशित-समाचारान् निश्चेतुं का भूमिका योगदानं वा भवति के समाचाराः चीयन्ते तथा च प्रत्यक्षरूपेण अथव अप्रत्यक्षरूपेण तेषां माध्यमेन के सन्देशाः दीयन्ते। वयं द्वयोः काल्पनिक-समाचारयोः माध्यमेन दर्शयिष्यामः यत् कस्यापि घटनायाः अथवा विषयस्य समाचारस्य बहुधा केवलं एकं स्वरूपं न भवति। वयम् अपेक्षामहे यत् विद्यार्थिनः एतत् तथ्यम् अवगच्छन्तःते तादृशीनां क्षमतानां विकासं करिष्यन्ति याभिः ते समाचारस्य दूरदर्शनस्य च कस्यापि सूचनायाः विश्लेषणं कर्तुं योग्याः भविष्यन्ति तथा च ते इदं ज्ञातुं शक्ष्यन्ति यत् समाचारे प्रदत्तसूचना कीदृशी अस्ति दीयते अपि वा न दीयते तथा च तस्य समाचारस्य विषये कीदृशः दृष्टिकोणः अथवा तर्कः भवितुं शक्नोति।

यस्मिन् अध्याये विज्ञापनस्य विषये चर्चा कृता अस्ति तस्मिन् अध्याये विज्ञापनद्वयं निर्माय प्रस्तुतं ये क्रमेण तेषां प्रकृष्टप्रविधीनां परिचयं यच्छन्ति यैः ग्राहकाः लोभयुक्ताः क्रियन्ते। एतेषु उदाहरणेषु ब्राण्ड तथा च ब्राण्ड-मूल्यम् इति इति द्वे केन्द्रियशब्दावल्यौ अवगमने बलाघातः प्रदत्तः अस्ति या विज्ञापनस्य मुख्याधारभूता भवति। एतेषां विषयाणां अवगमनं दृढीकर्तुं वास्तविक-विज्ञापनानाम् उदाहरणानि नेतव्यानि तथा च तेभ्यः तादृशानाम् एव प्रश्नेभ्यः साहाय्यं स्वीकृत्य अन्वेषणं करणीयं यथा अध्याये प्रदत्तानि सन्ति।

अन्ते द्वौ एव अध्यायौ स्वस्य विषयवस्तुनः लोकतन्त्रस्य विचारेण सह सम्बन्धं स्थापयन्ति। एतौ अध्यायौ स्थानीय-सञ्चार-माध्यमानां तथा च सामाजिक-विज्ञापनानां विकल्पानां सन्दर्भे एतौ वर्णयतः यत् मुख्यधारायां तेषां जनानाम् एव तथ्यानि स्थानं लभन्ते ये सामाजिक-संसाधनानां वित्तीय-संसाधनानां च धनिनः सन्ति। एतस्मिन् पक्षे बलाघातं कर्तुं कक्षायां स्थानीय-सञ्चार-माध्यमानां समाचाराणाम् उदाहरणेषु चर्चा कर्तुं शक्यते तथा च बालैः सह एतस्मिन् प्रश्ने अपि चर्चा कृता अस्ति यत् विज्ञापनानां प्रभावात् स्थानीये स्तरे निर्मितानि विक्रयणशीलानि रुचिकराणि च वस्तूनि अधिकृत्य कानि कानि परिवर्तनानि आगच्छन्ति।

अध्यायः - 6

सञ्चार-माध्यमानां विषये अवगमनम्

दूरदर्शने भवतां रुचिकरः कार्यक्रमः कः वर्तते ? आकाशवाण्यां भवद्भ्यः किं रोचते ? प्रायः भवन्तः कीदृशानि समाचारपत्राणि अथवा कीदृशाः पत्रिकाः पठन्ति ? किं भवन्तः अन्तर्जाले अन्वेषणं (सर्फिंग इति) कुर्वन्ति ? भवन्तः तस्मिन् नितराम् उपयोगिनं किम् अनुभवन्ति ? किं भवन्तः तं कञ्चित् शब्दं जानन्ति यः प्रायः सामूहिकरूपेण आकाशवाण्याः कृते दूरदर्शनस्य कृते अन्तर्जालस्य तथा च सञ्चारस्य अन्येषां साधनानां च कृते प्रयुज्यते ? अयं शब्दः वर्तते मीडिया इति । अस्मिन् पाठे भवन्तः मीडिया अर्थात् सञ्चारमाध्यमानां विषये विस्तरेण पठिष्यन्ति । भवन्तः ज्ञास्यन्ति यत् अयं कथं कार्यं करोति तथा च कथम् अस्माकं दैनन्दिनं जीवनं प्रभावयति । किं भवन्तः किञ्चित् एतादृशं वस्तु स्मर्तुं शक्नुवन्ति यत् भवद्भिः अस्मिन् सप्ताहे सञ्चारमाध्यमैः शिक्षितं स्यात् ?

स्थानीय-मेलापकस्य आपणाद् आरभ्य दूरदर्शनस्य कार्यक्रमं यावत् यत्किमपि भवन्तः पश्यन्ति एते सर्वे सञ्चारमाध्यमम् अर्थात् मीडिया इति वक्तुं शक्यते । मीडिया इति शब्दः आङ्ग्लभाषायाः मीडियम् इति शब्दस्य बहुवचनम् अस्ति तथा च एतस्य तात्पर्यं तेभ्यः विभिन्नेभ्यः विधिभ्यः वर्तते येषां माध्यमेन वयं समाजे परस्परं विचाराणाम् आदानं प्रदानं च कुर्मः । मीडियम् इत्यस्य अर्थः अस्ति माध्यमम् इति । यतोहि मीडिया इत्यस्य सन्दर्भः सञ्चारमाध्यमेभ्यः

सप्ततिः पृष्ठे प्रदत्ते चित्र-समूहे सञ्चार-माध्यमानां षट् पृथक् पृथक् प्रकारान् चिन्वन्तु ।

अस्ति अतः प्रत्येकं वस्तु यथा दूरवाण्यां सम्भाषणाद् आरभ्य सायङ्कालीनानां समाचाराणां श्रवणं यावत् यत्किमपि अस्ति तद् मीडिया इति वक्तुं शक्यते । दूरदर्शनम् आकाशवाणी तथा च समाचारपत्रं सञ्चारमाध्यमानाम् एतादृशानि रूपाणि सन्ति येषां प्राप्तिः लक्षाधिकान् जनान् यावत् अस्ति देशस्य विदेशस्य च जनसमूहं यावत् अस्ति अतः ते जन-सञ्चार-माध्यमम् अथवा मास-मीडिया इति उच्यते ।

सञ्चारमाध्यमं प्रविधिः च

भवतां कृते सम्भवतः सञ्चारसाधनानि विना स्वजीवनस्य कल्पनम् अपि कठिनं स्यात् । परन्तु केवलं दूरदर्शनस्य अन्तर्जालस्य च व्यापकप्रयोगः अद्यतने काले एव प्रारब्धः। एतेषां व्यवहारपथे आगमनस्य विंशतिवर्षाणि अपि न जातानि सन्ति । जनसञ्चारसाधनानां कृते प्रयुक्तप्रौद्योगिकी नैरन्तर्येण परिवर्तते ।

कस्यचित् चित्रकारस्य दृष्टौ बाइबल इत्यस्य पूर्वतनस्य पृष्ठस्य मुद्रणं कुर्वन् गुटेनबर्गः ।

समाचारपत्रं दूरदर्शनम् आकाशवाणी च लक्षशः जनान् यावत् प्राप्तुं शक्नुवन्ति यतोहि एतेषु काचित् विशिष्टप्रकारकस्य कौशलस्य उपयोगः क्रियते । वयं समाचारपत्राणां पत्रिकाणां च मुद्रितसाधनस्य रूपेण तथा च दूरदर्शनस्य आकाशवाण्याः च विद्युत्-साधनस्य रूपेण चर्चां कुर्मः । भवतां विचारेण समाचारपत्राणि, मुद्रितसाधनानि किमर्थम् उच्यन्ते ? अग्रे पठित्वा भवन्तः ज्ञास्यन्ति यत् एतानि नामानि सञ्चारमाध्यमैः प्रयोगार्थम् आनीतकौशलेन सम्बन्धितानि सन्ति । अधः प्रदत्तचित्रैः भवन्तः ज्ञास्यन्ति यत् गतवर्षेषु जनसञ्चारमाध्यमस्य प्रयोगे आनीतकौशलं केन प्रकारेण परिवर्तितम् अस्ति तथा च अद्यापि परिवर्तते ।

स्वपरिवारस्य ज्येष्ठान् जनान् पृच्छन्तु यत् यदा दूरदर्शनं नासीत् तदा ते आकाशवाण्यां किं शृण्वन्ति स्म ? तान् पृच्छन्तु यत् भवतां क्षेत्रे प्राथम्येन दूरदर्शनं कदा आगतम् आसीत् ? केबल-दूरदर्शनं कदा आरब्धम् ?

प्रौद्योगिक्यः यन्त्राणां च परिवर्तनं कृत्वा एतेषाम् अत्याधुनिकी-करणेन सञ्चारमाध्यमानि अधिकजनैः प्राप्यन्ते । एतेन ध्वनौ चित्राणां च गुणवत्तायां परिष्कारः भवति परन्तु प्रौद्योगिकी इतोऽपि अधिकं किञ्चित् करोति । इदम् अस्माकं जीवनस्य विषये चिन्तनस्य शैलीं परिवर्तयति । उदाहरणार्थम् अद्य अस्माकं कृते दूरदर्शनं विना जीवनस्य कल्पनम् अपि कठिनम् अस्ति । दूरदर्शनस्य कारणात् वयम् आत्मानं विश्वसमाजस्य सदस्यरूपेण अनुभवामः । दूरदर्शने प्रदर्शितानि चित्राणि सेटेलाइट इत्यस्य तथा च केबल इत्यस्य विस्तृतस्य जालस्य माध्यमेन अत्यन्तं सुदूरक्षेत्राणि यावत् प्राप्यन्ते । एतेषां कारणात् वयं संसारस्य अन्यभागानां समाचारान् मनोरञ्जक-कार्यक्रमान् च द्रष्टुं पारयामः । भवन्तः दूरदर्शने यानि कार्टून् इत्येतानि पश्यन्ति ते अधिकांशतः जापानदेशस्य अथवा सङ्युक्त-राज्यामेरिकायाः भवन्ति ।

भवतां प्रतिवेशे कति जनाः अन्तर्जालस्य प्रयोगं कुर्वन्ति ?

एतादृशानां त्रयाणां वस्तूनां सूचीं कुर्वन्तु या संसारस्य कैश्चित् अन्यैः जनैः सम्बद्धा अस्ति तथा च येषां विषये भवन्तः दूरदर्शनं दृष्ट्वा ज्ञातवन्तः?

1940 तमे दशके विद्युत्-मुद्रणयन्त्रे आगते सति पत्रकारितायाः क्षेत्रे किञ्चित् महत् परिवर्तनं आगतम्।



(इदं यन्त्रं टेलीवाइजर इति दूरदर्शनस्य प्रारम्भिकं रूपम् आसीत् । स्वस्य एतस्य आविष्कारस्य पुरतः उपविष्टः अस्ति –जॉन-एल-बैर्डमहोदयः। एतेन यन्त्रेण सः रायल-प्रशिक्षणकेन्द्रस्य समक्षं स्वस्य आविष्कारस्य प्रदर्शनं कृतवान्।

स्वस्य प्रियस्य दूरदर्शन-कार्यक्रमस्य काले विज्ञापितानां त्रयाणां वस्तूनां सूचीं निर्मान्तु।

किञ्चित् समाचारपत्रं गृह्णन्तु तस्मिन् प्रदत्तानां विज्ञापनानां सङ्ख्यां गणयन्तु।केचन जनाः कथयन्ति यत् समाचारपत्रेषु प्रभूतानि विज्ञापनानि भवन्ति? किं भवन्तः चिन्तयन्ति यत् इदं तथ्यं समीचीनम् अस्ति? यदि आम् तर्हि किमर्थम्?

अधुना वयं चेन्नईनगरे अथवा जम्मूप्रान्ते उपविश्य अमेरिकायां फ्लोरिडायाः समुद्रस्य झञ्झावातस्य चित्राणि द्रष्टुं शक्नुवन्ति । दूरदर्शनेन संसारः बहुसमीपम् आनीतः अस्ति।

सञ्चारसाधनं धनम् च

जनसञ्चारसाधने प्रयुक्तानि विभिन्नानि कौशलानि अत्यन्तं व्ययपूर्णानि सन्ति। किञ्चित् दूरदर्शन-स्टूडियो इति विषये चिन्तयन्तु यत्र समाचारवाचकः उपविशति। एतस्मिन् प्रकाशयन्त्राणि छाया-चित्रयन्त्राणि ध्वनि-सङ्ग्राहकानि यन्त्राणि सम्प्रेषणार्थं सेटेलाइट इत्यादीनि सन्ति । एतेषां सर्वेषां मूल्यम् अत्यधिकम् अस्ति ।

समाचरकक्षे केवलं समाचारवाचकाय एव वेतनं न दीयते अपरञ्च बहवः जनाः सन्ति ये प्रसारणे सहायकाः भवन्ति । एतस्मिन् ते जनाः सम्मिलिताः भवन्ति ये छाया-चित्रयन्त्रस्य प्रकाशस्य च व्यवस्थां कुर्वन्ति । यथा भवद्भिः पठितम् अस्ति जनसंचारमाध्यमानि नैरन्तर्येण परिवर्तनशीलानि भवन्ति । अतः नवीनतम-प्रौद्योगिकीः उपलब्धुम् अपि बहुधनस्य व्ययः भवति । एतेषां व्ययानां कारणतः जनसंचारमाध्यमानां कृते स्वकार्यं कर्तुं प्रभूतस्य धनस्य आवश्यकता भवति । परिणामतः अधिकांश-दूरदर्शन-प्रणालिकाः समाचारपत्राणि च कस्यचित् महतः व्यापारिक-प्रतिष्ठानस्य भागभूताः भवन्ति ।

जनसञ्चार-माध्यमानि नैरन्तर्येण धनार्जनार्थं विभिन्नानाम् उपायानां विषये चिन्तयन्ति । एकः उपायः यस्य माध्यमेन जनसञ्चारमाध्यमानि धनार्जनं कुर्वन्ति तदस्ति विभिन्नानां वस्तूनां विज्ञापनम् । यथा - कारयानानां वस्त्राणां चलदूर-भाष-यन्त्रादीनां च । भवद्भिः अवधानं दत्तं स्यात् यत् स्वप्रियतमं दूरदर्शन-कार्यक्रमं पश्यन्तः भवन्तः एतादृशानां अनेकेषां वस्तूनां विज्ञापनानि पठितुं बाध्याः भवन्ति । दूरदर्शने क्रिकेटक्रीडां पश्यन्तः अपि प्रत्येकम् ओवर इति पश्चात् पुनः पुनः तानि एव विज्ञापनानि दर्शयन्ते । अनेन प्रकारेण प्रायः पुनः पुनः भवन्तः तानि विज्ञापनानि तानि चित्राणि एव पश्यन्ति । यथा भवन्तः अग्रिमेषु अध्यायेषु पठिष्यन्ति विज्ञापनानां पौनःपुन्येन आवृत्तिः अनया आशया क्रियते यत् भवन्तः बहिः गत्वा विज्ञापितं वस्तु क्रेष्यन्ति ।

एकस्यां समाचार-प्रणालिकायां दशनिमेषार्थं विज्ञापनस्य मूल्यं तस्य लोकप्रियतायाः आधारेण ५०० रूप्यकेभ्यः 8000 रूप्यकाणि इति यावत् भवति ।

सञ्चारमाध्यमं लोकतन्त्रं च

लोकतन्त्रे देशस्य संसारस्य च विषये समाचारदानस्य तथा च तत्र जायमानासु घटनासु चर्चायाः कृते सञ्चारमाध्यमानां भूमिका अतीव महत्त्वपूर्णा अस्ति । उदाहरणार्थं सञ्चारमाध्यमैः नागरिकाः ज्ञातुं शक्नुवन्ति यत् सर्वकारः केन प्रकारेण कार्यं करोति । यदि जनाः इच्छेयुः तर्हि एतेषां समाचारपत्राणाम् आधारेण विरुद्धं क्रियान्वयनम् अपि कर्तुं शक्नुवन्ति । एतत् कार्यं ते सम्बन्धिताय मन्त्रिणे पत्रं लिखित्वा सार्वजनिकं विरोध-प्रदर्शनम् आयोज्य हस्ताक्षर-अभियानादिकं चालयित्वा च सर्वकारं पुनः तस्य कार्यक्रमस्य विषये विचारं कर्तुम् आग्रहं कुर्वन्ति स्म ।

सूचनादानस्य सम्बन्धे सञ्चारमाध्यमस्य महत्त्वपूर्णं दायित्वं दृष्ट्वा इदम् आवश्यकम् अस्ति यत् ज्ञानं सन्तुलितं स्यात् । आगच्छन्तु अग्रिमे पृष्ठे प्रदत्तस्य कस्यचित् समाचारस्य द्वयोः विभिन्नरूपयोः विषये पठित्वा जानीमः यत् संतुलित-सञ्चार-माध्यमस्य कः अभिप्रायः अस्ति ?

प्रदूषणकारकेषु उद्योगेषु वज्रपातः। विरोधिभिः राजमार्गनिरोधः, यातायातः निरुद्धः

राधिका-मलिकः । आई.एन.एन

उद्योग-स्वामिनां श्रमिकाणां च विरोधेन अद्य नगरस्य गतिविधयः निरुद्धाः । राजमार्गेषु वाहनानां विशाल-सम्मर्दः वर्तते तस्मात् कारणात् जनाः यथाकालं स्व-कार्यालयं न प्राप्तवन्तः । उद्योगस्वामिनः तथा च श्रमिकाः सर्वकारस्य प्रदूषण-कारकाणां घट्टानां पिधानं स्यात् इति निर्णयस्य विरोधं कुर्वन्ति । यद्यपि सर्वकारेण एषः निर्णयः शीघ्रतायां स्वीकृतः परन्तु विरोधिनः चिरकालाद् जानन्ति स्म यत् तेषां घट्टाः अधिनियमानुसारं न सन्ति । एतेषां घट्टानां पिधानात् नगरे प्रदूषणस्य स्तरः बहुन्यूनः भविष्यति । नगरस्य गण्यमान्यः नागरिकः श्रीजैनः उक्तवान् अस्माकं नगरं भारतस्य नूतनस्य व्यवसायिक-केन्द्रस्य रूपेण स्थापितः भवति । एतेन सह इदम् अपि आवश्यकम् अस्ति यत् नगरं स्वच्छं हरितिमायुक्तं च तिष्ठेत् । प्रदूषणकारकाः उद्योगाः अपसारिताः भवेयुः। विरोधप्रदर्शनस्य स्थाने उद्योगस्वामिनः श्रमिकाः च यदि पुनस्स्थापनस्य प्रस्तावं स्वीकुर्युः तदा एतत् सम्यक् स्यात् ।

इण्डियाडेली इत्यस्य अनुसारं समाख्या उद्योगेषु पिहितेषु सत्सु महा-अशान्तिः

डेली-न्यूज-सर्विस

नगरस्य आवासीय-क्षेत्रेषु लक्षम् उद्योगाः पिहिताः भवन्ति तर्हि काचित् गभीरायाः समस्यायाः रूपं धर्तुं शक्नुवन्ति । सोमवासरे सहस्रम् उद्योगस्वामिनः श्रमिकाः च उद्योग-पिधानानां कठोरं विरोधं प्रदर्शयितुं राजमार्गान् आगतवन्तः । ते उक्तवन्तः यत् एतस्मात् तेषां वृत्तिः नष्टा भविष्यति जीवननिर्वहणं न भविष्यति । तेषां कथनम् आसीत् यत् दोषः नगरनिगमस्य अस्ति यतोहि सः आवासीयक्षेत्रेषु नैरन्तर्येण नूतनान् उद्योगान् संस्थापयितुं प्रमाणपत्रम् अददात् । ते एतद् अपि उक्तवन्तः यत् तेषां पुनस्स्थापनाय पर्याप्ताः प्रयत्नाः न कृताः। उद्योगस्वामिनः श्रमिकाः च उद्योगपिधान-सम्बन्धे कृते विरोधे नगरे एकस्य दिनस्य 'पिधानं' प्रस्तावितवन्तः । कस्यचित् उद्योगस्य स्वामिना श्रीशर्मणा उक्तम् यत् सर्वकारः कथयति यत् सः अस्माकं पुनस्स्थापनाय बहूनि कार्याणि कृतवान् परन्तु यादृशानि क्षेत्राणि सः अस्माकं कृते यच्छति तत्र कस्य अपि प्रकारस्य सुविधाः न सन्ति तथा च विगतेषु पञ्च-वर्षेषु तत्र कश्चित् अपि विकासकार्यं न जातम् अस्ति ।

किं द्वयोः समाचारपत्रयोः प्रदत्तम् उपर्युक्तं विवरणं समानम् अस्ति ? भवतां विचारेण एतस्मिन् काः काः समानताः सन्ति तथा च के के भेदाः सन्ति ।

यदि भवन्तः न्यूज-आफ-इण्डिया इत्यस्मिन् प्रदत्तं विवरणं पठिष्यन्ति तर्हि एतस्याः समस्यायाः विषये किं चिन्तयिष्यन्ति ?

वास्तविकतायां तु इदम् अस्ति यत् यदि भवन्तः एतेषु केवलं एकं समाचारपत्रं पठिष्यन्ति तर्हि तु विषयस्य एकम् एव पक्षं ज्ञास्यन्ति । यदि भवन्तः न्यून-आफ-इण्डिया इति अपठिष्यन् तर्हि विरोधिनां वार्ताः वृथाप्रलापः इति भवन्तः अन्वभविष्यन् । तेषां यातायात-व्यवस्थायां बाधाजननं तथा च स्व-उद्योगेभ्यः नगरे प्रदूषणस्य विस्तारकरणम् इत्यनेन भवतां मनसि तेषां विषये विपरीत-अवधारणायाः अङ्कनं कृतं स्यात् । अपरस्मिन् पक्षे यदि भवद्भिः इण्डिया-डेली इति समाचारपत्रं पठितं स्यात् तदा भवन्तः अज्ञास्यन् यत् उद्योगेषु पिहितेषु सत्सु बहवः जनाः स्ववृत्तेः साधनतः वञ्चिताः भविष्यन्ति यतोहि पुनर्वासस्य प्रयासाः अपर्याप्ताः सन्ति । एतयोः द्वयोः विवरणयोः किञ्चिद् अपि सन्तुलितं नास्ति । सन्तुलिता समाख्या सा भवति यस्यां कस्मिन् अपि विषये प्रत्येकं दृष्टिकोणेन

चर्चा क्रियते पुनरपि पाठकाः स्वयं तस्मिन् विषये विचाराः कर्तुं स्वतन्त्राः भवन्ति।

सन्तुलितायाः समाख्यायाः लेखनं सञ्चारमाध्यमानां स्वतन्त्रतायाः आश्रितं भवति । स्वतन्त्र-सञ्चार-माध्यमैः तात्पर्यम् इदम् अस्ति यत् तैः प्रदत्तसमाचारान् कश्चन अपि न नियन्त्रयेत न च प्रभावयेत् । समाचारस्य विवरणदाने कश्चित् अपि तान् न निर्दिशेत् यत् तेषु किं सम्मिलितं स्यात् अपि च किं न भवेत्। लोकतन्त्रे स्वतन्त्र-सञ्चारमाध्यमानां भवनम् अत्यन्तं महत्त्वपूर्णम् अस्ति। यथा भवद्भिः उपरि पठितम्।

सञ्चारमाध्यमैः प्रदत्तायाः सूचनायाः आधारेण एव वयं नागरिकाणां रूपेण क्रियान्वयनं कुर्वन्ति अतः इदम् आवश्यकम् अस्ति यत् सूचना विश्वसनीया तटस्था च स्यात्।

किं भवन्तः इत्थं चिन्तयन्ति यत् कस्यचित् विषयस्य उभयोः पक्षयोः ज्ञानं महत्त्वपूर्णम् अस्ति ? किमर्थम् ?

चिन्तयन्तु, यत् भवन्तः कस्यचित् समाचारपत्रस्य पत्रकाराः सन्ति अधुना भवन्तः उपर्युक्तयोः द्वयोः विवरणयोः एकां सन्तुलितां समाख्यां सज्जीकुर्वन्तु।

दूरदर्शनम् अस्माभिः सह किं करोति तथा च वयं दूरदर्शनेन सह किं कर्तुं शक्नुमः?

बहुषु गृहेषु अधिकांशसमये दूरदर्शनम् एव चलति । अस्माकं परितः स्थितस्य संसारस्य विषये अस्माकं बहवः विचाराः यत् किमपि वयं दूरदर्शने पश्यामः तेन एव निर्मीयन्ते । एतत् संसारं द्रष्टुं किञ्चित् वातायनम् इव वर्तते। भवतां विचारेण एतत् अस्मान् कथं प्रभावयति ? दूरदर्शने अनेकविधाः कार्यक्रमाः सन्ति, यथा- 'श्वश्रू अपि क्वचित् वधू आसीत्' सदृशाः पारिवारिकधारावाहिकाः, क्रीडाकार्यक्रमाः यथा - कोटिपतिः कः भविष्यति, वास्तविकजीवनं दर्शयितुं यथा यथा बिग-बॉस इति, समाचारः, क्रीडाः, कार्टून इत्यादयः। प्रत्येकं कार्यक्रमस्य

आदौ मध्ये अन्ते च विज्ञापनानि भवन्ति यतोहि दूरदर्शनस्य कालः महार्घः भवति । अतः केवलं ते एव कार्यक्रमाः प्रस्तूयन्ते ये अधिकाधिकान् दर्शकान् आकर्षेयुः। भवतां विचारेण एतादृशाः के के कार्यक्रमाः भवितुं शक्नुवन्ति ? तेषां तथ्यानां विषये चिन्तयन्तु ये दर्श्यन्ते अथवा ये न दर्श्यन्ते । अस्मभ्यं धनाढ्यानां विषये अधिकं दर्श्यते अथवा निर्धनानां विषये?

तथ्यं तु इदम् अस्ति यत् सञ्चारमाध्यमानि स्वतन्त्राणि न सन्ति। एतस्य मुख्यतः कारणद्वयम् अस्ति । प्रथमं कारणम् अस्ति सर्वकारस्य तेषु नियन्त्रणम् । यदा सर्वकारः समाचारपत्रस्य कञ्चित् अंशं, चलचित्रस्य किञ्चित् दृश्यम् अथवा गीतस्य काञ्चित् अभिव्यक्तिं जनसमुदायं यावत् प्राप्तेः पूर्वं प्रतिबन्धितं करोति तदा एतत् सेंसरशिप इति उच्यते । भारतस्य इतिहासे एतादृशः कालः अपि आगतः अस्ति यदा सर्वकारः सञ्चार-माध्यमानाम् उपरि सेंसर इति स्थापितवान् । एतस्मिन् विपरीतः कालः -१९७५-७७ इति यावत् अर्थात् इति अवधेः आपातकालः आसीत्।

सर्वकारः यद्यपि चलचित्राणाम् उपरि तु नैरन्तर्येण निरीक्षणदलं स्थापयति परन्तु सः सञ्चारमाध्यमैः दर्शितेषु समाचारेषु सर्वथा एतादृशं न करोति । सर्वकारेण निरीक्षणसमितौ असत्याम् अपि अद्यत्वे अधिकांश समाचारपत्राणि सन्तुलितं विवरणं दातुम् असफलाः भवन्ति । एतस्य कारणानि बहुजटिलानि सन्ति । सञ्चारमाध्यमानां विषये शोधकर्तृणां जनानां कथनम् अस्ति यत् इत्थम् एतदर्थम् अस्ति यतोहि सञ्चारमाध्यमेषु व्यापारिक-प्रतिष्ठानानां नियन्त्रणम् अस्ति। कदाचित् कस्यचित् विवरणस्य एकस्मिन् पक्षे एव ध्यानाकर्षणम् एतेषां हिताय भवति । सञ्चार-माध्यमानां कृते निरन्तरं धनस्य आवश्यकता भवति तस्य कृते विज्ञापनेषु आश्रयणं भवति एतस्मात् कारणात् तेषां जनानां विरोधे प्रकाशनं कठिनं भवति ये विज्ञापनानि यच्छन्ति । अतः व्यापारेण गहनसम्बद्धतायाः कारणात् अधुना सञ्चार-माध्यमानि स्वतन्त्राणि इति न वक्तुं शक्यते।



एतदतिरिच्य सञ्चारमाध्यमानि कस्यचित् विषयस्य विशिष्टे पक्षे एतदर्थम् अपि अवधानं केन्द्रितं कुर्वन्ति यतोहि ते विश्वसन्ति यत् एतस्मात् विवरणं रुचिकरं भविष्यति । अनेन एव प्रकारेण यदि ते कस्मिंश्चित् विषये जनसमर्थनं वर्धितुम् इच्छन्ति तदा अपि विषयस्य एकस्मिन् पक्षे एव ध्यानं केन्द्रितं कुर्वन्ति।

स्वरूपस्य निर्धारणम्

कासु घटनासु ध्यानं केन्द्रितं स्यात् एतेषु अपि सञ्चार-माध्यमानां महत्त्वपूर्णं स्थानम् अस्ति तथा च एतस्य एव आधारेण ते निश्चितं कुर्वन्ति यत् किं समाचारे देयानि सन्ति । उदाहरणार्थं भवतां विद्यालयस्य वार्षिकोत्सवस्य समाचारः प्रायः समाचारे देयं न भविष्यति परन्तु यदि कश्चित् सुप्रसिद्धः अभिनेता तस्मिन् कार्यक्रमे मुख्य-अतिथिरूपेण आमन्त्रितः भवेत् तर्हि सञ्चारमाध्यमानि एतां सूचनां समाचारे सम्मिलितं कर्तुं शक्नुवन्ति केषुचित् विशिष्टेषु विषयेषु अवधानं केन्द्रितं कृत्वा

सञ्चारमाध्यमम् अस्माकं विचारान् भावनाः कार्याणि च प्रभावयति तथा च अस्माकम् अवधानं, तान् विषयान् प्रति आकर्षयति । अस्माकं जीवने महत्त्वपूर्ण-प्रभाव-करणात् अपि च अस्माकं विचाराणां निर्माणे मुख्यस्थानस्य निर्वहण-कारणात् एव प्रायः इदम् उच्यते यत् सञ्चार-माध्यमानि एव अस्माकं जीवनस्वरूपं निर्धारयन्ति ।

अद्यतने काले एव सञ्चारमाध्यमानि कोला-पेयेषु कीटनाशकानां स्तरः हानेः स्तरं यावत् वर्धितम् अस्ति इति विषये अस्माकम् अवधानम् आकर्षितम् । ते कीटनाशकाः अत्यधिक-मात्रायाम् एतेषु पेयेषु सन्ति इति समाख्यां प्रकाशितवन्तः तथा च

एवम् अस्मान् कोला-पेयानाम् अन्ताराष्ट्रिय-गुणवत्तायाः सुरक्षा-मापदण्डानाम् अनुसारं नियमितरूपेण नियन्त्रित-करणस्य आवश्यकता अनुभाविता । ते सर्वकारस्य अभिभवस्य अनन्तरम् निर्भयतया घोषणां कृतवन्तः यत् कोलापानं सुरक्षितं न अस्ति । एतादृशं वृन्तान्तं प्रस्तूय सञ्चारमाध्यमानि निश्चितरूपेण अस्माकं ध्यानम् एतादृशे विषये केन्द्रितम् कृतं तथाविधः प्रयासः च कृतः यस्मिन् यदि तेषां समाख्या न स्यात् तर्हि अस्माकं ध्यानम् अपि तत्र न गच्छेत् ।

बहुधा एतादृश्यः घटनाः भवन्ति यदा सञ्चार-माध्यमानि तेषु विषयेषु अस्माकम् अवधानम् आकर्षयितुम् विफलानि भवन्ति ये अस्माकं जीवनस्य कृते महत्त्वपूर्णाः भवन्ति । उदाहरणार्थं पेयजलम् अस्माकं देशस्य काचित् महती समस्या अस्ति । प्रतिवर्षं सहस्राधिकाः जनाः कष्टानि सहन्ते अपि च म्रियन्ते यतोहि ते पातुं सुरक्षितं जलं न लभन्ते, तथापि वयम् एतस्मिन् विषये सञ्चारमाध्यमानि अल्पतया एव चर्चां कुर्वन्ति, पश्यामः। केनचित् सुविख्यातेन भारतीयपत्रकारेण लिखितं यत् कथं वस्त्र-सज्जाकाराः फैशन-सप्ताहे धनिकानां समक्षे नूतनानि वस्त्राणि प्रदर्श्य सर्वेषां समाचारपत्राणां मुखपृष्ठेषु स्थानं प्राप्तवन्तः परन्तु तस्मिन् एव सप्ताहे मुम्बई-नगरे अनेकाः कुटीराः निपातिताः परन्तु केनापि समाचारपत्रेण एतस्मिन् विषये अवधानं न कृतम् ।

सञ्चारमाध्यमैः विषयस्य निर्धारणकाले कुटीराणां स्थाने फैशनसप्ताहस्य समाचार-प्रकाशनस्य कः परिणामः जायते?

किं भवन्तः कञ्चित् तादृशं विषयं जानन्ति यः भवतां दृष्ट्या एतस्मात् कारणात् महत्त्वपूर्णः न आसीत् यतोहि सञ्चारमाध्यमैः सः न दर्शितः असीत् ?

स्थानीय-सञ्चार-माध्यमम्

यत् सञ्चार-माध्यमानि तेषु लघुषु लघुषु विषयेषु रुचिं विधास्यन्ति येषां साधारणजनैः तथा च तेषां जीवनेन सह सम्बन्धः अस्ति, इदं ज्ञात्वा अनेके स्थानीयसमूहाः स्वयं स्वस्य सञ्चारमाध्यमस्य प्रारम्भं कुर्वन्ति अथवा प्रारब्धवन्तः। बहवः जनाः सामूहिक-आकाशवाण्या कृषकेभ्यः विभिन्नानां सस्यानां मूल्यानां विषये ज्ञापयन्ति तथा च तेभ्यः बीजस्य उर्वरकाणां च विषये परामर्शं यच्छन्ति। केचन अन्ये जनाः अतिन्यूनमूल्येन अपि च सरलतया उपलभ्यमानानि छायाचित्र-यन्त्राणि स्वीकृत्य तेषां प्रयोगं च कृत्वा विभिन्नानां निर्धनसमाजानां वास्तविकजीवनस्य स्थितीः आधृत्य डाक्यूमेंट्री-चलचित्रं निर्मान्ति तथा च कदाचित् तु एतेषां निर्धनजनानां कृते चलचित्र-निर्माणस्य प्रशिक्षणं यच्छन्ति तथा च छायाचित्र-यन्त्रस्य कौशलस्य च प्रशिक्षणम् अपि यच्छन्ति।

अपरम् उदाहरणं खबर-लहरिया-नामकस्य कस्यचित् समाचारपत्रस्य अस्ति यत् उत्तरप्रदेशस्य चित्रकूट-जनपदस्य अष्टाभिः दलितमहिलाभिः प्रत्येकं पञ्चदश दिनेषु एकदा प्रकाश्यते। स्थानीय-बुन्देली-भाषायां लिखिते अष्टपृष्ठात्मके अस्मिन् समाचारपत्रे दलितसम्बद्धाः विषयाः, स्त्रीः प्रति हिंसा तथा च राजनैतिकभ्रष्टाचारसम्बद्धा समाख्या भवति। एतस्य समाचारपत्रस्य पाठकाः सन्ति - कृषकाः आपणिकाः पञ्चायतस्य सदस्याः विद्यालयस्य शिक्षकाः तथा च ताः महिलाः याः अधुना सद्यैव अक्षरज्ञानं कृतवत्यः सन्ति।

पृथक् पृथक् पाठकानां रुचिं दृष्ट्वा मुद्रणस्य माध्यमानि अनेकप्रकारकाणां सूचनानाम् उपलब्धिं कारयन्ति ।

प्रजातन्त्रस्य नागरिकस्य रूपेण अस्माकं जीवने सञ्चार-माध्यमानि अतीव महत्त्वपूर्णं स्थानं निर्वहन्ति यतोहि सञ्चार-माध्यमैः एव वयं सर्वकारस्य कार्यैः सम्बन्धितानां तथ्यानां विषये शृणुमः सञ्चारमाध्यमानि निश्चितं कुर्वन्ति यत् केषु विषयेषु ध्यानं केन्द्रितं स्यात् तथा च अनेन प्रकारेण तानि मुख्यविषयस्य निश्चयं कुर्वन्ति । यदि कदाचित् सर्वकारः इच्छेत् तर्हि सञ्चारमाध्यमं कस्याश्चित् घटनायाः समाचारं प्रकाशनाद् वारयितुं शक्नोति । तदेव सेंसरशिप इति उच्यते । अद्यत्वे सञ्चारमाध्यमस्य व्यापारस्य च परस्परं घनिष्ठसम्बन्धस्य कारणात् प्रायः सन्तुलितायाः समाख्यायाः प्रकाशपथे आगमनं कठिनं स्यात् । एतत् दृष्टिपथे निधाय अस्माकं कृते जागरूकता महत्त्वपूर्णा अस्ति यत् समाचारेभ्यः प्राप्ता तथ्यात्मकसूचना अपि प्रायः पूर्णा न भवति तथा च एकपक्षीया भवितुं शक्नोति । अतः अस्माभिः समाचारस्य विश्लेषणस्य कृते निम्नलिखिताः प्रश्नाः प्रष्टव्याः - एतया समाख्यया अहं कीदृशीं सूचनां प्राप्तुं शक्नोमि ? कीदृशी आवश्यकसूचना न दीयते ? अयं लेखः कस्य दृष्टिकोणेन लिखितः अस्ति ? कस्य दृष्टिकोणः त्यक्तः अस्ति तथा च किमर्थम् ?

अभ्यासः

१. *प्रजातन्त्रे सञ्चारमाध्यमानि केन प्रकारेण महत्त्वपूर्णं स्थानं निर्वहन्ति?*

२. *किं भवन्तः एतस्य रेखाचित्रस्य कृते किञ्चित् शीर्षकं दातुं शक्नुवन्ति ? एतेन रेखाचित्रेण भवन्तः सञ्चारमाध्यमस्य तथा च महाव्यापारस्य मध्ये परस्परं सम्बन्धस्य विषये किम् अवगच्छन्ति ?*

३. *भवन्तः पठितवन्तः सन्ति यत् सञ्चारमाध्यमानि केन प्रकारेण चर्चाविषयं कल्पयन्ति । एतेषां प्रजातन्त्रे कीदृशः प्रभावः आपतति ? स्वविचाराणां पक्षे उदाहरणद्वयं यच्छन्तु ।*

४ *कक्षा-परियोजनायाः रूपेण समाचारेषु किञ्चित् एकं शीर्षकं चित्वा तस्मिन् ध्यानं केन्द्रितं कुर्वन्तु तथा च अन्य-समाचारपत्रेषु तत्सम्बद्धविवरणं चिन्वन्तु । दूरदर्शन-समाचारेषु अपि एतस्मिन् विषये प्रसारितां सामग्रीं पश्यन्तु । द्वयोः समाचारपत्रयोः विवरणस्य तुलनां कृत्वा तेषु समानतायाः तथा च भिन्नतायाः समाख्यां लिखन्तु । निम्नलिखितस्य प्रश्नस्य पृच्छा अपि सहायिका भवितुं शक्नोति -*

क) अस्मिन् लेखे का सूचना दीयते ?

ख) कीदृशी सूचना एतस्मिन् परित्यक्ता अस्ति ?

ग) अयं लेखः कस्य दृष्टिकोणेन लिखितः अस्ति ?

घ) कस्य दृष्टिकोणः अत्र त्यक्तः अस्ति तथा च किमर्थम् ?

शब्द-सङ्कलनम्

प्रकाशितः – *एतस्य तात्पर्यं समाचार-समाख्याभिः लेखैः साक्षात्कारैः विवरणादिभिः च अस्ति यानि समाचारपत्रेषु पत्रिकासु पुस्तकेषु च प्रकाश्यन्ते यस्मात् बहवः जनाः तत् पठितुं शक्नुयुः।*

सेंसरशिप इति(नियन्त्रणम्) - *एतस्य तात्पर्यं सर्वकारस्य तया शक्त्या अथवा अधिकारेण अस्ति यस्य अन्तर्गतं सर्वकारः केषाञ्चित् विवरणानां प्रकाशने अथवा प्रदर्शने प्रतिबन्धं कर्तुं शक्नोति ।*

प्रसारणम्- *एतस्मिन् पाठे एतस्य शब्दस्य प्रयोगः दूरदर्शनस्य अथवा आकाशवाण्याः कार्यक्रमाणां सम्बन्धे अभवत् ये व्यापकक्षेत्रेषु प्रेष्यन्ते ।*

सार्वजनिकविरोधः – *अत्र विशालायां सङ्ख्यायां जनाः एकत्रीभूय कस्मिंश्चित् विषये मुक्ततया स्वकीयं विरोधं प्रकटयन्ति । अयं प्रायः प्रदर्शनं कृत्वा हस्ताक्षर-अभियान-द्वारा तथा च राजमार्गान् अवरुद्ध्य क्रियते ।*

सप्तमः अध्यायः

विज्ञापनानाम् अवगमनम्

अद्य वयं सर्वतः विज्ञापनैः आवृत्ताः स्मः । वयम् एतानि दूरदर्शने पश्यामः आकाशवाण्यां शृणुमः, राजमार्गेषु पश्यामः, समाचारपत्रेषु पत्रिकासु च पठामः। अपि च कारयानेषु त्रिचक्रिका-यानेषु अपि एतानि दृश्यन्ते । यदा वयं चलचित्रगृहं चलचित्र-दर्शनार्थं गच्छामः, चलचित्रस्य आरम्भात् पूर्वं विज्ञापनानि पश्यामः अपि च यदा वयम् अन्तर्जाले विभिन्न-वेबसाइट्स इति पश्यामः तदा मध्ये मध्ये विज्ञापनानि आगच्छन्ति । वस्तुतः विज्ञापनानि किं कुर्वन्ति ? एतानि अस्माकं चित्तस्य आकर्षणं कथं कुर्वन्ति ? अधिकं ज्ञातुम् अग्रे पठामः....

एते

विज्ञापनानि अस्माकं चित्तं विभिन्न-उत्पादान् प्रति आकर्षयन्ति तथा च तेषाम् उत्पादानां विषये सकारात्मकं वर्णनं कुर्वन्ति, येन वयं तानि वस्तूनि क्रेतुम् इच्छामः तेषां क्रयणे च वयं रुचिं नयामः। एतस्मिन् अध्याये वयं द्वयोः विज्ञापनयोः अवधानं केन्द्रितं कृत्वा ज्ञास्यामः यत् विज्ञापनेन किं भवति अपि च एतत् कथं कार्यं करोति ?

एतत् विज्ञापनद्वयं दृष्ट्वा तालिकां पूरयतु ।

	सर्वश्रेष्ठ-निरीक्षित-सूपः	सुरक्षा-फेनकम्
विज्ञापने किं विक्रीयते ?		
तानि उत्पादस्य वर्णनं कथं कुर्वन्ति ?		
वर्णने किं बोधनस्य प्रयासः अस्ति ?	अतिथिभ्यः एतत् देयम् ।	
चित्राणि किं संप्रेषयन्ति ?		मातुः स्नेहः
विज्ञापनस्य दर्शनान्तरं किं भवन्तः एतम् उत्पादं क्रेतुम् एषिष्यामः ?		

त्वक्-सुरक्षक-फेनकस्य विज्ञापने एवं प्रतीयते यत् बालकस्य निरीक्षणं केवलं माता एव करोति । किम् एतस्मिन् चित्रे भवन्तः काञ्चित् समस्यां पश्यन्ति ?

ब्राण्ड इत्यस्य नामानि तथा च ब्राण्ड इत्यस्य मूल्यानां निर्माणम्

किं भवन्तः कदाचित् ब्राण्ड इति शब्दं श्रुतवन्तः? विज्ञापनं ब्राण्ड-निर्माणस्य विषये एव अस्ति । यथार्थरूपेण प्रारम्भिकस्तरेण ब्राण्डिग इत्यस्य अर्थः अस्ति कस्मिंश्चित् उत्पादे कस्यचित् विशिष्टस्य नाम्नः अथवा चिह्नस्य मुद्रणम् । एषः उत्पादः आपणे उपलब्धेभ्यः उत्पादेभ्यः विशिष्टः अस्ति पृथक् च अस्ति तन्निमित्तम् इत्थं क्रियते ।



"ब्रांडिग' अथवा "दागना" इति वस्तुतः पशुपालनस्य आवश्यकतातः प्रादुर्भूतशब्दः अस्ति । पृथक् पृथक् स्वामिनां पशवः गोचार-भूमौ सम्भूय चरन्ति स्म तथा च तेषां परिचये समस्या भवति स्म । स्वामिभिः एतस्याः समस्यायाः समाधानं कृतम् । ते उष्णलौहस्य साहाय्येन स्वपशौ स्वकीयं किञ्चित् विशिष्टं चिह्नं मुद्रयितुम् आरब्धवन्तः। तदेव ब्रांडिगः इति उक्तः।

आगच्छन्तु एतानि विज्ञापनानि अधुना पुनः पश्यामः । भवतां विचारेण द्विदल-विक्रेतृभिः तथा च फेनक-विक्रेतृभिः स्वस्य उत्पादानां विशिष्टानि नामानि किमर्थं दत्तानि ?

द्विदलानि दलहन इत्येतानि च प्रायः विपण्यां मुक्तरूपेण विक्रीयन्ते । वयं द्विदलानि तेषां विभिन्न-प्रकारकैः नामभिः जानीमः यथा- मसूरस्य द्विदलम्, माषस्य द्विदलम् इत्यादयः । एतानि नामानि ब्राण्ड इत्यस्य नामानि न सन्ति । यदा कश्चित् व्यापारिक-समूहः मसूरस्य द्विदलं स्वीकृत्य तत् एकस्मिन् पुटके स्थापयति तर्हि तस्मिन् काले तस्य द्विदलस्य कृते कस्यचित् विशिष्टस्य नाम्नः आवश्यकता भवति । एतादृशी आवश्यकता एतस्मात् कारणात् अस्ति यतः वयं विशिष्टे पुटके विद्यमाने द्विदले तथा च विपण्यां विद्यमान-द्विदल-विषये भ्रमिताः न भवेम । अतः समूहः एकं नाम निश्चितं कुर्वन्ति यथा- टाप-टेस्ट-द्विदलम् इति । अनेन एव प्रकारेण उत्पादानां नामकरणम् एव ब्रांडिंग इति उच्यते ।

एतादृशी एव कथा फेनकस्य अपि अस्ति । अद्यत्वे विपण्यां बहूनि फेनकानि विक्रीयन्ते । महानगरेषु नगरेषु च अधुना वयं केवलं फेनकम् एव न कथयामः अपितु तेषां निर्मातृणां समूहानां नामानि स्वीकुर्मः। विपण्याम् अनेकप्रकारकाणि फेनकानि उपलब्धानि सन्ति एतस्मात् कारणात् समूहेन स्वस्य फेनकस्य कृते किञ्चित् विशिष्टं नाम दातव्यं भविष्यति । एवं कृत्वा ते इतोऽपि एकस्य ब्राण्ड इत्यस्य फेनकम् उपलब्धं कारयन्ति ।

केवलम् उत्पादस्य नाम, अस्मान् तं क्रेतुं न प्रेरयितुं शक्नोति । फेनक-निर्मातृभिः द्विदल-निर्मातृभिः च वयम् आश्वासनीयाः यत् तेषां फेनकं द्विदलं च विपण्याम् उपलब्धेभ्यः अन्येभ्यः फेनकेभ्यः द्विदलेभ्यः च विशिष्टाः सन्ति । अत्र एव विज्ञापनस्य कार्यम् आपतति । विज्ञापनस्य भूमिका विज्ञापितम् उत्पादं प्रति सन्तुष्टिकरणे तथा च तं क्रेतुं प्रेरणे निर्णायकरूपेण भवति ।

कस्यचित् ब्राण्ड इत्येतस्य विकासस्य कार्यम् उत्पादस्य नामकरणेन एव समाप्तिं न याति । उदाहरणार्थं यथैव "टाप-टेस्ट-द्विदलम्" इत्यस्य विक्रयणं प्रारब्धम् । तदा एकः अन्यसमूहः विपण्यां पुटकबद्धं द्विदलविक्रयणस्य निर्णयं स्वीकरोति तथा तस्य नाम अपि बेस्ट-टेस्ट-द्विदलम् एव स्थापयति । अनेन प्रकारेण अधुना विपण्यां द्विप्रकारकस्य ब्राण्ड इत्यस्य द्विदलानि जातानि ।

द्वयोः समूहयोः तीव्रा इच्छा भवति यत् भवन्तः तेषाम् एव द्विदलं क्रीणीयुः।

एतस्याम् अवस्थायाम् उपभोक्तारः भ्रमिताः जायन्ते यतोहि ते "टॉप-टेस्ट-द्विदलं तथा च बेस्ट-टेस्ट-द्विदलम् इति द्वयोः मध्ये अन्तरं न जानन्ति। निर्मात्रा ग्राहकः तस्य वस्तु स्वीकुर्यात् इति विशिष्टस्य ब्राण्ड इत्यस्य द्विदलं क्रेतुं प्रेरयितुं कारणं ज्ञापनीयं भवति। केवलं द्विदलस्य नामकरणम् एव क्रयणे सहायकं न भवति। अतः विज्ञापन-दाता स्वस्य ब्राण्ड इत्यस्य वस्तूनां विशेषताः जनानां पुरतः स्थापयति। अनेन प्रकारेण ते स्वस्य उत्पादान् इतरेभ्यः एते भिन्नाः विशिष्टाः वा इति ज्ञापनस्य चेष्टां कुर्वन्ति। निम्नलिखिते अंशे पश्यन्तु यत् एतत् द्वयोः द्विदलयोः केन प्रकारेण भवति।

उपर्युक्तेषु विज्ञापनेषु भवन्तः द्रष्टुं शक्नुवन्ति यत् उभौ द्विदल-विक्रेतारौ पृथक् पृथक् तथ्यानि अस्माकं पुरतः प्रस्तुतः।"टाप-टेस्ट-द्विदलम्" अतिथि-सत्कार-रूपायाः अस्माकं समाजिक-परम्परायाः आश्रयणं स्वीकुर्वन्ति अपरस्मिन् पक्षे बेस्ट-टेस्ट-द्विदलं शिशूनां स्वास्थ्यस्य विषये अवधानस्य तान् सुपौष्टिकानि खाद्यानि भोजनस्य चिन्तां प्रकटीकुर्वन्ति। अतिथीनां सत्कार-करणं तथा च बालकानां कृते

उत्पादानां निर्मातारः इदं सुनिश्चेतुं कोट्या अधिकानि रुप्यकाणि व्ययीकुर्वन्ति यत् वयं कुत्रापि गच्छामः तत्र तेषां विज्ञापनानि एव सर्वत्र दृष्टिगोचराः भवेयुः।

इदं विज्ञापनम् एतस्य ब्राण्ड इत्यस्य वस्तूनां प्रयोगेण अस्मान् किं ज्ञापयितुम् इच्छति?

एतत् विज्ञापनं कैः जनैः सह वार्तालापं करोति तथा च केषु जनेषु ध्यानं न ददाति?

यदि भवतां पार्श्वे एतान् उत्पादान् क्रेतुं धनं स्यात् तर्हि भवन्तः एतान् दृष्ट्वा कथम् अनुभविष्यन्ति ? यदि भवतां पार्श्वे धनं न स्यात् तर्हि कथं भवन्तः अनुभविष्यन्ति ?

पौष्टिकस्य आहारस्य प्रदानं इत्यादि-प्रभृतीनां मूल्यानाम् उपयोगः ब्राण्ड इत्यस्य मूल्यं वर्धयितुं कृतः अस्ति । ब्राण्ड-मूल्यानि अस्माकं पार्श्वे प्रापयितुं दृश्यानां शब्दानां च माध्यमेन अस्मभ्यं प्रियाणि दृश्यानि निर्मीयन्ते ।

ब्राण्ड इत्यस्य मूल्यं सामाजिक-मूल्यं च

अद्य विज्ञापनानि अस्माकं सामाजिकजीवनस्य सांस्कृतिकजीवनस्य च मुख्यभागभूतानि जातानि । वयं विज्ञापनानि पश्यामः तेषां विषये च चर्चां कुर्मः तथा च प्रायः जनानाम् आकलनं तैः प्रयुक्तानां ब्राण्ड-उत्पादानाम् आधारेण कुर्मः। विज्ञापनानि अस्माकं जीवनं प्रभावयितुं महत्त्वपूर्णानि साधनानि सन्ति इति एतस्य अवगमनस्य अनन्तरं इदम् आवश्यकम् अस्ति यत् वयम् अवगच्छामः यत् एतानि कीदृशं कार्यं कुर्वन्ति इति ।

आगच्छन्तु पुनः ध्यानपूर्वकं ते द्वे विज्ञापने पश्यामः याभ्यां पाठस्य आरम्भः जातः आसीत् । यदि वयम् अत्र प्रदत्तान् प्रश्नान् करिष्यामः तर्हि वयम् अवगमिष्यामः यत् एते द्वे विज्ञापने कथं कार्यं कुरुतः।

ब्राण्ड-युक्त-द्विदलानां मूल्यं मुक्ततया यानि द्विदलानि लभ्यन्ते तेषाम् अपेक्षया अधिकं भवति । यतो हि ब्राण्ड-युक्त-द्विदलानां मूल्येषु तत्र पुटकस्य विज्ञापनस्य च यः व्ययः भवति सः अपि सम्मिलितः भवति । एतस्मात् कारणात् बहवः जनाः तानि क्रेतुम् एव न शक्नुवन्ति ये जनाः "टाप-टेस्ट-द्विदलं क्रेतुं न शक्नुवन्ति विज्ञापनस्य कारणात् ते चिन्तयिष्यन्ति यत् ते कदाचित् स्वस्य अतिथीनां सत्कारं सम्यक् प्रकारेण न कर्तुं शक्नुयुः । शनैः शनैः जनाः इत्थं चिन्तयिष्यन्ति यत् ब्राण्ड-युक्त-द्विदलानि उत्तमानि भवन्ति तथा च मुक्तरूपेण यानि भवन्ति तानि सम्यक् न भवन्ति अतः जनाः पुटकबद्धं द्विदलं क्रेतुम् एव चिन्तयिष्यन्ति । वास्तविकतायां यत् द्विदलं मुक्तरूपेण लभ्यते तथा च यत् पुटके लभ्यते द्वयोः मध्ये महद् अन्तरं नास्ति, अत्यल्पम् एव तत्र अन्तरम् अस्ति । विज्ञापनं दृष्ट्वा वयं भेदस्य कल्पनां कुर्मः।

केयर-फेनकस्य विज्ञापने पुनः व्यक्तिगतभावनानां प्रयोगः क्रियते । मातृरूपेण यदि भवती दर्शयितुम् इच्छति यत् भवती एव स्वस्य शिशोः पालनं सम्यक् प्रकारेण कुर्वती अस्ति, तर्हि भवत्याः एतत् महार्घं फेनकं क्रेतव्यं भविष्यति । विज्ञापने शिशुं प्रति मातुः चिन्तायाः प्रदर्शनं कृतमस्ति । विज्ञापनं मातरं बोधयति यत् एतस्य विशिष्ट-ब्राण्ड-सम्पन्नस्य फेनकस्य प्रयोगं कृत्वा तस्याः शिशुं प्रति सर्वाधिकचिन्तायाः स्नेहस्य च अपि दर्शनं भवति । अनेन प्रकारेण

मातरः इत्थं चिन्तयन्ति यत् एतस्य उत्पादस्य प्रयोगः कश्चित् सङ्केतः अस्ति यत् ताः स्वशिशुं प्रति कियन्तं स्नेहं कुर्वन्ति। अनेन प्रकारेण विज्ञापनं स्वस्य अधिकमूल्यसम्पन्नस्य फेनकं विक्रेतुं मातुः शिशुं प्रति यः स्नेहः भवति तस्य स्नेहस्य प्रयोगं करोति। याः मातरः एतत् फेनकं क्रेतुं सक्षमाः न भवन्ति, ताः अनुभवन्ति यत् ताः स्वस्य शिशोः सम्यक् पालनं न कुर्वत्यः सन्ति। यथा भवन्तः उपर्युक्तेषु विज्ञापनेषु द्रष्टुं शक्नुवन्ति यत् अधिकतराणि विज्ञापनानि अस्माकं व्यक्तिगतभावनाः एव केन्द्रिताः कर्तुं प्रयासं कुर्वन्ति। अस्माकं व्यक्तिगतभावनाः उत्पादैः सह योजयित्वा ते एतत् तथ्यं प्रभावयितुम् अपि प्रयत्नं कुर्वन्ति यत् वयं स्वस्य मूल्यस्य निर्धारणं कथं कुर्मः।

विद्यालयस्य बालकैः रचिते अस्मिन् चित्रे प्रसिद्धजनाः विभिन्न-उत्पादानां प्रचारं कुर्वन्तः दर्शिताः सन्ति।

अधुना एव सञ्चारमाध्यमे काचित् समाख्या आसीत् यत् केनचित् शीर्षस्थेन क्रिक्रेट-क्रीडकेन १८० कोटिरूप्यकाणि गृहीत्वा, त्रयाणां वर्षाणां कृते बहूनि विज्ञापनानि कर्तुम् अनुबन्धः कृतः। केनचित् लोकप्रिय-मॉडल इत्यनेन एकस्य विज्ञापनस्य पञ्चलक्ष-रूप्यकाणि अथवा ततोऽपि अधिकानि स्वीकृतानि सन्ति।

अद्य कस्याञ्चित् प्रमुखदूरदर्शनप्रणालिकायां 30 निमेषात्मकविज्ञापनप्रचारणस्य शुल्कं पञ्चषष्ठीसहस्रम् एकलक्षरूप्यकाणि च अस्ति। कस्मिंश्चित् प्रमुखे वार्तापत्रे चतुर्थांशात्मकाकारस्य चित्रितविज्ञापनस्य मूल्यं 8.36 लक्षं रूप्यकाणि सन्ति।

प्रायः अस्माकं प्रिय-क्रिकेट्-क्रीडकाः तथा च लोकप्रियाः अभिनेतारः अपि विज्ञापन-माध्यमेन उत्पादानां विक्रयणस्य प्रयत्नं कुर्वन्ति। वयं तानि वस्तूनि क्रेतुम् उत्सुकाः भवामः यतोहि ते जनाः यान् वयं स्वस्य नायकम् इति चिन्तयामः, ते वदन्ति यत् एते उत्पादाः क्रेतव्याः सन्ति सह एव विज्ञापनानि अस्मभ्यं धनाढ्य-जनानां जीवनशैलीं दर्शयन्ति एतेषु तेषां जनानां वास्तविक-जीवनशैली तु बहुन्यूना भवति यान् वयं स्वस्य परितः पश्यामः। विज्ञापनानि अस्माकं जीवने महत्त्वपूर्णं स्थानं विदधति। वयम् एतेषां विज्ञापनानाम् आधारेण न केवलम्, उत्पादान् क्रीणीमः अपरञ्च ब्राण्ड इत्यस्य उत्पादानाम् उपयोगं कृत्वा वयं स्वस्य विषये स्वस्य मित्राणां परिवारजनानां च विषये भिन्नेन प्रकारेण चिन्तयितुं प्रारभामहे। अतः विज्ञापनानि दृष्ट्वा यान् उत्पादान् वयं क्रेतुम् इच्छामः तान् क्रयणात् पूर्वम् अस्माभिः ज्ञातव्यम् अवगन्तव्यं च यत् वयं तार्किकरूपेण जानीमः यत् विज्ञापनानि कानिचन्

विशिष्टानि दृश्यानि किमर्थं दर्शयन्ति । तानि काः व्यक्तिगतभावनाः प्रकटयन्ति तथा च एतेषाम् अस्माकं जीवने कीदृशः प्रभावः आपतति यदा वयं तेषाम् उत्पादानां प्रयोगं कुर्मः अथवा पुनः अप्रयोगे सति तस्याम् अवस्थायां स्वस्य विषये अस्माकं विचाराः कीदृशाः भवन्ति ।

विज्ञापनं कथं निर्मीयते?

जनाः विज्ञापनं दृष्ट्वा वस्तु क्रीणन्ति इति दृशा विज्ञापनस्य महत्वपूर्णं योगदानम् अस्ति यतोहि विज्ञापनम् एव तत् वस्तु क्रापयति । एतत् कार्यं सरलं नास्ति अपि च एतस्मिन् विषये शताधिकानि पुस्तकानि लिखितानि सन्ति । विज्ञापनस्य उद्देश्यं भवति जनैः ब्राण्ड-युक्त-वस्तूनां क्रापणम् । एतस्य स्पष्टः अर्थः अस्ति यत् विज्ञापनस्य दर्शनाद् अनन्तरम् अस्मासु तत् वस्तु दृष्ट्वा तस्य क्रयणस्य इच्छा स्यात् । आगच्छन्तु पश्यामः विज्ञापननिर्मातारः कथं निर्णयं स्वीकुर्वन्ति यत् उत्पादस्य विक्रयणार्थं केषां चित्राणां विवरणानां व्यक्तिगतभावनानां च प्रयोगः स्यात् ।

सप्ताह-द्वयानन्तरम्

विज्ञापन-समूहस्य रचनात्मक-समूहः विचारं कर्तुम् आरब्धवान्...

विज्ञापन-समूहः स्वकार्यं फेनक-निर्मातुः समक्षे स्थापयति...

विज्ञापनानां तेषां चित्राणां च परीक्षणं लक्षितानां दर्शकानां मध्ये क्रियते।

फेनक-विक्रयणस्य रणनीतिः यदा प्रभावकारिणी इति अनुभूयते तदा विज्ञापनस्य अभियानम् अन्तिमरूपे परिणम्यते तथा च विपण्यां फेनके आगते सति तेन सह एव तस्य विज्ञापनानि विभिन्नैः सञ्चारमाध्यमैः प्रकाश्यन्ते।



भवतां विचारेण अधः प्रदत्ते सामाजिके विज्ञापने कीदृशः श्रोता सम्बोध्यते अथवा लक्ष्यते ?

एतेषु प्रत्येकं सामाजिकं विज्ञापनं कं सन्देशं प्रापयितुम् इच्छति?

राज्यशासनस्य अध्याये भवन्तः विसूचिकायाः महारोगस्य विस्तारस्य विषये पठितवन्तः। एतस्य पठनाद् अनन्तरं किं भवन्तः किञ्चित् सामाजिकं विज्ञापनं रचयितुं शक्नुवन्ति यस्मिन् विसूचिकायाः रोगस्य निवारणस्य उपायानां विषये चर्चितं स्यात्।

विज्ञापनं लोकतन्त्रं च

एकस्मिन् लोकतन्त्रीये समाजे विज्ञापनानि अनेक-प्रकारेण समानतायाः सम्बन्धितैः विषयैः युक्ताः भवन्ति।

कस्यचित् उत्पादस्य विज्ञापने बहुधनव्ययः भवति। प्रायः एकस्य ब्राण्ड इत्यस्य विज्ञापने कोट्यधिक-रूप्यकाणि व्ययीभवन्ति। विज्ञापनस्य निर्माणं तेषां मीडियायां प्रदर्शनं च महार्घं भवति यतोहि अद्यत्वे विपणिषु बहूनि विज्ञापनानि सन्ति। अतः समूहैः पुनः पुनः स्व-विज्ञापनानि दर्शनीयानि भवन्ति यतः ते जनानां मनस्सु स्वकीयं विशिष्टं स्थानं कल्पयेयुः।

एतस्य सामान्यः अर्थः अयम् अस्ति यत् केवलं महान्तः व्यवसायिकसमूहाः एव विज्ञापनानि दातुं शक्नुवन्ति। यदि भवतां व्यापारः लघुः अस्ति तर्हि भवतां पार्श्वे एतावत् धनम् एव न भविष्यति यत् भवन्तः स्वस्य उत्पादस्य विज्ञापनं दूरदर्शने अथवा राष्ट्रियस्तरस्य समाचारपत्रेषु पत्रिकासु च कर्तुं शक्नुयुः अतः जनैः गृहेषु निर्मीयमाणाः उत्पादाः यथा पर्पटाः अवलेहाः मिष्ठान्नानि जैम (फलानाम् अवलेहः) इत्यादयः च तथा फैशनेबल इति न गण्यन्ते यथा ब्राण्ड-युक्त-उत्पादाः गण्यन्ते।



तैः स्ववस्तूनि साप्ताहिक-विपण्याम् अथवा पार्श्वस्थेषु आपणेषु विक्रेतव्यानि भवन्ति येषां विषये भवन्तः अग्रिमे घट्टे पठिष्यन्ति।

विज्ञापनम् अस्मान् विश्वासयति यत् पुटक-बद्ध-ब्राण्ड-युक्तानि वस्तूनि पुटकेन विना यानि वस्तूनि सन्ति तेभ्यः उत्कृष्टतराणि भवन्ति। वयम् एतत् विस्मरामः यत् उत्पादस्य गुणवत्तायाः तस्य पैकिंग इत्यस्मात् कोऽपि सम्बन्धः नास्ति। जनाः पुटक-बद्ध-वस्तूनि प्रति आकृष्टाः भवन्ति एतस्मात् कारणात् लघु-व्यवसायिनः ये तथा न कर्तुं शक्नुवन्ति ते प्रभाविताः भवन्ति तथा च स्व-जीविकां त्यक्तुं बाध्याः जायन्ते।

लोकतन्त्रे यत्र सर्वे जनाः समानाः सन्ति अपि च यत्र सर्वे जनाः सम्मानपूर्वकं जीवनं जीवितुं योग्यान् अवसरान् प्राप्नुयुः तत्र विज्ञापनानि एकया दृष्ट्या निर्धनानां सम्माने न्यूनताम् आनयन्ति। तेषां जीवनं विज्ञापनेषु न दर्श्यते एतस्मात् कारणात् वयं तेषां यद् जीवनम् अस्ति तस्मै किमपि महत्त्वं न दद्मः।

विज्ञापनानि अस्मासु विश्वासं जनयन्ति यत् यानि वस्तूनि पुटकेषु विक्रीयन्ते तानि पुटक-रहितेभ्यः वस्तुभ्यः श्रेष्ठानि भवन्ति।

विज्ञापनं जनानां निजभावनाः आह्वयति। अतः बहुधा यदा जनाः विज्ञापितं वस्तु न क्रीणन्ति तदा जनाः नैराश्यम् प्राप्नुवन्ति। ते अनुभवन्ति यत् ते स्वस्य प्रियजनानां तादृशं सत्कारं कर्तुम् असमर्थाः सन्ति यथा विज्ञापने दर्श्यते।

विज्ञापनानि धनाढ्येषु प्रसिद्धजनेषु च अस्माकं ध्यानं केन्द्रितं कृत्वा अस्मान् निर्धनता-विषये भेदभावस्य विषये आत्म-सम्मान-आदिविषये च चिन्तनात् दूरीकुर्वन्ति येषां सम्मुखीकरणम् अकृत्वा लोकतन्त्रे समानतायाः स्थापना न भवितुं शक्नोति । उत्पादानां विक्रयणम् इति विषयम् अतिरिच्य अपि विज्ञापनानि अस्मान् इदम् अपि बोधयतन्ति यत् अस्माभिः स्वकीयं जीवनं कथं जीवितव्यम् अस्माकं महत्त्वकाङ्क्षाः स्वप्नाः च कीदृशाः भवेयुः वयं स्वस्य प्रेम्णः अभिव्यक्तिं कथं कुर्याम् अपि च इतोऽपि जागरूकेण सुन्दरेण सफलेन च कः तात्पर्यः अस्ति । लोकतन्त्रीयस्य समाजस्य नागरिके भूते सति अस्माभिः विज्ञापनानां प्रभावेभ्यः जागरूकैः भाव्यम् इति आवश्यकम् अस्ति । विज्ञापनानि किं कुर्वन्ति एतस्मिन् विषये तर्कैः सह चिन्तनान्तरं वयं सम्यक् निर्णयं स्वीकर्तुं शक्ष्यामः यत् अमुकवस्तु क्रेतव्यम् अस्ति उत क्रेतव्यं न अस्ति इति ।

अभ्यासः

1 ब्राण्ड् इति शब्देन भवन्तः किं अवगच्छन्ति? विज्ञापनस्य कृते ब्राण्ड-निर्माणस्य मुख्यं कारण-द्वयं ज्ञापयन्तु।

2 स्वस्य रुचेः अनुसारं प्रकाशितं विज्ञापनद्वयं चिन्वन्तु । एते दृष्ट्वा निम्नलिखित-प्रश्नानाम् उत्तराणि यच्छन्तु ।

- भवतां चित्तस्य आकर्षणाय एतेषु विज्ञापनेषु कीदृश्याः भाषायाः चित्राणां च प्रयोगः कृतः अस्ति ?
- एतैः विज्ञापनैः केषु तथ्येषु विशिष्टं बलं दीयते ?
- इदं विज्ञापनं कैः जनैः सह संवादं करोति अपि च कान् त्यजति ?
- यदि भवन्तः विज्ञापितं ब्राण्ड इत्येतं क्रेतुं समर्थाः न भविष्यन्ति तर्हि भवन्तः कथम् अनुभविष्यन्ति ?

3 किं भवन्तः एतादृशे द्वे उपाये ज्ञापयितुं शक्नुवन्ति यैः भवन्तः चिन्तयन्ति यत् विज्ञापनस्य प्रभावः लोकतन्त्रे समानतायाः विषये निपतति?

4 विज्ञापनस्य निर्माणे रचनात्मकतायाः बहु आवश्यकता भवति। आगच्छतु वयम् एतादृश्याः कस्याश्चित् स्थितेः कल्पनां कुर्याम यत्र कयाचित् निर्मात्र्या एका नूतना घटी रचिता अस्ति । निर्मात्री कथयति यत् सा एतां घटीं विद्यालयस्य बालकान् विक्रेतुम् इच्छति। सा भवतां कक्षाम् आगत्य भवद्भ्यः सर्वेभ्यः घट्याः कृते कस्यचित् ब्राण्ड इत्यस्य नाम तथा च विज्ञापनं कर्तुं कथयति । कक्षां लघुषु लघुषु समूहेषु विभज्यताम् । प्रत्येकं समूहः एतस्याः घट्याः कृते विज्ञापनं सज्जीकरिष्यति । अधुना परस्परं निर्मितानि पूर्णतया सज्जीकृतानि विज्ञापनानि तथा च अपूर्णानि विज्ञापनानि अपि च नामानि कक्षायाः पुरतः स्थापयन्तु ।

शब्द-सङ्कलनम्

उत्पादः – एतस्य तात्पर्यं कस्यचित् वस्तुनः अथवा सेवायाः अस्ति यत् विपण्यां विक्रयणार्थं रचितं स्यात् ।

उपभोक्ता - अनेन शब्देन अभिप्रायः सः जनः अस्ति यस्य कृते उत्पादः निर्मितः अस्ति तथा च यः उत्पादं क्रेतुं तस्य उपयोगं च कर्तुं धनं यच्छति।

ब्राण्ड - एतस्य अर्थः उत्पादस्य विशेषनाम अथवा परिचयः अस्ति। एतस्य परिचयस्य निर्माणं विज्ञापन-प्रक्रिया-द्वारा भवति ।

प्रभाव-जननम् - एतस्य अर्थः कस्यचित् विश्वासम् अथवा कार्यकरणस्य प्रकियां परिवर्तितुं या शक्तिः भवति तेन सम्बद्धम् अस्ति ।

जीवनशैली – एतस्मिन् अध्याये, एतस्य शब्दस्य तात्पर्यं जनानां जीवनं तेषां द्वारा प्रयुक्तानाम् उत्पादानां सम्बद्धतया सह दर्शनेन अस्ति । यथा तेषां पार्श्वे के के उत्पादाः सन्ति तैः धार्यमाणानि वस्त्राणि तानि स्थानानि यत्र ते भोजनं कर्तुं गच्छन्ति इत्यादिविषयाः जीवनशैली इत्यस्मिन् परिगण्यन्ते ।

॥ इति सप्तमोऽध्यायः ॥

पञ्चमः घट्टः



विपणिः

शिक्षकाणां कृते

एतौ द्वौ अध्यायौ विपण्याः सम्बद्धजीवनस्य व्यवसायस्य चक्रैः सम्बन्धितौ स्तः। एतेषु काश्चन प्रक्रियाः तु दृष्टिगोचराः जायन्ते अपि च तेषाम् अवलोकनम् अपि कर्तुं शक्यते किन्तु बहवः अन्ये गतिविधयः अस्माकं परिचये न भवन्ति।

अष्टमः अध्यायः अस्ति "अस्माकं पार्श्वस्थाः विपणयः"। एतस्मिन् वयम् एकया दृष्ट्या विपणीनां विभिन्नानां स्थानानाम् अध्ययनं कुर्मः कश्चन साप्ताहिक-विपणिः ग्रामस्य आपणाः कश्चन शापिंग-काम्प्लेक्स (क्रयकेन्द्रम्) इत्यादयः च । कयाचित् पृथक् दृष्ट्या वयं कस्यचित् जटिलस्य प्रश्नस्य अपि निरीक्षणं कुर्मः एताः विपणीः प्रति वस्तूनि कथम् आगच्छन्ति ? शाकस्य महाविपणेः केनचित् विशिष्टेन अध्ययनेन वयं ज्ञातुं प्रयत्नं कुर्मः तत् विपणि-सम्बद्धा काचित् शृङ्खला कथं कार्यं करोति अपि च तस्यां महाविपणेः किं स्थानं वर्तते। वस्तुतः वयं विपणि-शब्दस्य ये पर्यायाः सन्ति तेषां विषये जानीमः मन्यामहे वा परन्तु वास्तविकतायां क्रयणं विक्रयणं च विभिन्नैः उपायैः चलति। अस्मिन् अध्याये एतस्मिन् विषये विचारः कृतः अस्ति यत् कथम् इदं सर्वं विपणेः एकस्य व्यापकरूपस्य अवगमनाय महत्त्वपूर्णम् अस्ति।

नवमे अध्याये एतस्य विषयस्य अवगमनस्य प्रयासः अस्ति यत् कथं विपणिः विभिन्नानां जनानां कृते भिन्नान् भिन्नान् अवसरान् कल्पयति। "कस्यचित् युतकस्य कथा" तथा च तस्याः प्रकियायाम् आगम्यमानानां विपणीनाम् उदाहरणैः एषः विषयः प्रस्तुतः अस्ति । एकस्य युतकस्य उत्पादनस्य वितरणस्य च प्रत्येकं क्रियाम् अवगच्छन्तः वयम् अनुभवितुं पारयामः यत् एतेन सम्बन्धित-विनिमयस्य प्रक्रियाभ्यः केचन जनाः अधिकं लाभम् अर्जयन्ति केचन च न्यूनं लाभम् अर्जयन्ति। जनैः ये अवसराः प्राप्यन्ते ते सर्वतः असमानाः सन्ति। उत्पादनकर्ता अधिकम् अर्जनं कुर्यात् इति निश्चयार्थम् अपि उपायाः सन्ति यथा सर्वकारीयसंस्थाः निर्माय वस्तुविक्रयणम् । पुनरपि समतापूर्णस्य वितरणस्य कृते व्यावहारिकाणां प्रभावशालिनां च मार्गाणाम् अन्वेषणं स्यात् ।

भवतां स्थानीय-विपणि-सम्बद्धाः ये अनुभवाः सन्ति तान् अनुभवान् भवन्तः कक्षायाः चर्चासु सम्मिलितान् कुर्युः इति एतादृशः अवसरः अपि भवतां कृते एतेषु अध्यायेषु उपलभ्यते। समीपस्थाः ये चयविपणयः(थोक-बाजार) सन्ति तासां भ्रमणम् अपि सम्यक् भविष्यति अपि च विद्यार्थिनः एतेन सूक्ष्मम् अध्ययनं कर्तुं कञ्चित् अवसरं प्राप्स्यन्ति उदाहरणार्थं यथा क्रय-विक्रययोः लाभांशस्य कियती सम्भावना विद्यमाना भवति जनानां दैनन्दिनः आयः कियान् भवति इत्यादिविषये अपि ज्ञानं भविष्यति। एतेन अन्वेषणेन विद्यार्थिनः समाजस्य असमानतानां विषये प्रत्यक्षतः ज्ञास्यन्ति । जनानां विपणिसम्बद्धाः अनुभवाः विविधाः गहनाः च भवन्ति । अतः कक्षायाः चर्चासु एतादृशानां प्रश्नानां कृते समयः दातव्यः ये विषयाः अध्याये तु न सन्ति परन्तु विद्यार्थिनः एतेषु विषयेषु वार्तालापं कर्तुम् इच्छुकाः भवेयुः।

अध्यायः 8

अस्माकं पार्श्वस्थाः विपणयः

वयं विपणिं गच्छामः विपणिं गत्वा बहूनि वस्तूनि च क्रीणीमः यथा शाकानि, फेनकानि, दन्तफेनकम् उपस्कराः, पर्युषितरोटिकाः, सुपिष्टकानि, तण्डुलाः, द्विदलानि, वस्त्राणि, पुस्तकानि, टिप्पणी-पुस्तिकादीनि च । वयं यत्किमपि क्रीणीमः तेषां वस्तूनां यदि सूचीं कुर्मः तर्हि सा सूची दीर्घतरा भविष्यति । विपणयः अपि अनेकविधाः भवन्ति यत्र वयं स्व-दनन्दिन-आवश्यक-वस्तूनां पूर्त्यर्थं गच्छामः यथा अस्माकं प्रतिवेशस्य गुमटी इति सप्ताहिक-विपणिः दीर्घाणि क्रयस्थलानि शापिग-माल इति । अस्मिन् अध्याये वयं विपणेः एतान् प्रकारान् ज्ञातुम् एव प्रयत्नं करिष्यामः तथा च एतदवगमस्य प्रयासं करिष्यामः यत् अत्र विक्रीयमाणानि वस्तूनि क्रयण-प्रक्रियां यावत् कथं प्राप्नुवन्ति एते क्रेतारः के सन्ति एते विक्रेतारः च के सन्ति ? तथा च अस्माकं सर्वेषां पुरतः कीदृशीः काः काः च समस्याः आयान्ति ?

जनाः साप्ताहिक-विपणिषु किमर्थं गच्छन्ति? त्रीणि कारणानि ज्ञापयन्तु।

एतेषु साप्ताहिक-विपणिषु आपणिकाः के भवन्ति? महाव्यापारिणः एतेषु विपणिषु किमर्थं न दृश्यन्ते?

साप्ताहिकेषु विपणिषु वस्तूनि किमर्थं न्यूनमूल्येन लभ्यन्ते ?

किञ्चित् उदाहरणं दत्त्वा बोधयन्तु यत् जनाः विपणिषु कथं मूल्य-निर्धारणं कुर्वन्ति? किं भवन्तः एतादृश्याः स्थितेः विषये चिन्तयितुं शक्नुवन्ति यत्र मूल्य-निर्धारणम् अन्यायपूर्णं भविष्यति?

साप्ताहिक-विपणिः

साप्ताहिक-विपणेः अयम् नाम एव एतस्मात् कारणात् जातं यतोहि एतत् सप्ताहस्य कस्मिंश्चित् एकस्मिन् निश्चिते दिने भवति । एतस्यां साप्ताहिकविपण्यां प्रतिदिनम् उद्घटनशीलाः निर्धारिताः आपणाः न भवन्ति। व्यापारिणः दिने आपणम् उद्घाटयन्ति तथा च सायंङ्काले पिधानं कुर्वन्ति । अग्रिमे दिवसे ते स्वस्य आपणान् अन्यस्मिन् स्थाने उद्घाटयन्ति तथा च जनाः एतेषु आपणेषु स्वस्य दैनन्दिन-जीवनोपयोगिनी वस्तूनि क्रेतुम् आगच्छन्ति ।

साप्ताहिक-विपणिषु बहूनि वस्तूनि न्यूनमूल्येन लभ्यन्ते । इत्थम् एतस्मात् कारणात् अस्ति यतोहि ये निर्धारित-स्थानस्य आपणाः भवन्ति तैः स्वस्य आपणानां बहुविधाः व्ययाः वोढव्या भवन्ति । तैः आपणस्य भाटकं, विद्युतः व्ययः, सर्वकारीय-शुल्कादि च दातव्यं भवति । एतेषु आपणेषु ये श्रमिकाः कार्यं कुर्वन्ति तेषां कृते वेतनादिकस्य व्यवस्था अपि ततः एव करणीया भवति । साप्ताहिक-विपणिषु यानि वस्तूनि विक्रीयन्ते तानि वस्तूनि आपणिकाः स्वस्य गृहेषु एव सङ्गृह्य स्थापयन्ति । एतेषाम् आपणिकानां गृह्यजनाः प्रायः एतेषां साहाय्यं कुर्वन्ति यतः एतैः पृथक्तया श्रमिकाः न योजनीयाः भवन्ति । साप्ताहिकेषु विपणिषु समान-सामग्र्याः अनेके आपणाः भवन्ति यस्मात् तेषां परस्परं स्पर्धा अपि भवति यदि कश्चित् एकः आपणिकः कस्यचित् वस्तुनः कृते अधिकं धनं याचते तदा जनानां पार्श्वे विकल्पः भवति यत् ते अग्रिमेषु आपणेषु अपि तानि वस्तूनि द्रष्टुं शक्नुवन्ति । ततः च क्रेतुं शक्नुवन्ति । तत्र भवितुं शक्नोति यत् तद् एव वस्तुः न्यूनमूल्ये लभ्येत । एतादृशीषु स्थितिषु क्रेतॄणां पार्श्वे अयम् अवसरः अपि भवति यत् ते मूल्यस्य निर्धारणं कृत्वा न्यून-मूल्यम् अपि कारयेयुः ।

साप्ताहिक-विपणीनां कश्चन लाभः अयम् अपि भवति यत् आवश्यकतायाः सर्वाणि वस्तूनि एकस्मिन् स्थाने एव उपलभ्यन्ते । शाकानि, वस्त्राणि, नित्य-उपयोगिवस्तूनि, पात्राणि च इत्यादीनि सर्वाणि वस्तूनि तत्र उपलभ्यन्ते । पृथक्-पृथक् वस्तूनां कृते पृथक् पृथक् स्थानं प्रति न गन्तव्यं भवति । जनाः प्रायः ताः विपणीः प्रति गन्तुम् इच्छन्ति यत्र वस्तूनां विविधाः विकल्पाः विद्यमानाः भवेयुः।

समीरः पूर्व-निर्मित-वस्त्राणां कश्चित् व्यापारी

समीरः साप्ताहिक-विपणेः कश्चन व्यापारी अस्ति। सः नगरस्य कस्माच्चित् महाव्यापारिणः वस्त्राणि क्रीणाति तथा च आसप्ताहं षट्सु पृथक्-पृथक्-स्थानेषु साप्ताहिक-विपणिषु वस्त्राणि विक्रीणाति। समीरः अन्ये च व्यापारिणः सह एव आगच्छन्ति।एतदर्थं ते भाटकेन एकं वाहनम् आनयन्ति। तस्य ग्राहकाः प्रायः समीपस्थाः ग्रामीणजनाः भवन्ति। दीपावल्याः पोंगलस्य अथवा एतादृशेषु एव अवसरेषु सः सम्यक् व्यापारं करोति।

सुजाता कविता च एकस्मिन् दिने स्व-पार्श्वस्थ-आपणतः नित्य-उपयोगस्य कानिचन वस्तूनि क्रेतुं गतवत्यौ । ते अस्मिन् आपणे प्रायः क्रयणार्थम् आगच्छतः । अत्र जनसम्मर्दः आसीत् । आपण-स्वामिनी द्वयोः सहायकयोः साहाय्येन आपणस्य कार्यं निर्वहति स्म। यदा सुजाता कविता च आपणं प्रविष्टवत्यौ तदा सुजाता आपण-स्वामिनीम् आवश्यक-वस्तूनां सूचीम् उक्त्वा लेखितवती । सा सूच्याः अनुसारं स्व-कर्मचारिणः वस्तूनि तोलयितुं पुटीकृत्य दातुं च निर्दिष्टवती । एतस्मिन् अन्तरे कविता आपणं परितः दृष्टिपातं करोति स्म...

वामतः सर्वेभ्यः उपरि कपाटिकायां भिन्नं भिन्नं फेनकस्य ब्राण्ड इति स्थापितम् आसीत् । अपरस्यां कपाटिकायां विभिन्नानि दन्तफेनकानि टेल्कमचूर्णं केशम्पूः केशतैलादीनि स्थापितानि आसन्। विभिन्न-वर्ण-युक्तानि तथा च विभिन्न-ब्राण्ड-युक्तानि वस्तूनि मनोहराणि आसन्। कुट्टिमे काश्चन गोण्यः पतिताः आसन्।

सम्पूर्णानि वस्तूनि तोलयितुं बन्द्धुं च विंशतिनिमेषाः व्यतीताः। पुनः सुजाता स्व-टिप्पणी-पुस्तिकां पुरतः

स्थापितवती । आपणिकया 1550 रूप्यकाणां सङ्ख्या तत्र अङ्किता तथा च पुनः पुस्तिका प्रत्यावर्तिता । तया स्वस्य महापञ्जिकायाम् अपि सा सङ्ख्या लिखिता । अधुना सुजाता स्वस्य महास्यूतान् स्वीकृत्य बहिरागता। अग्रिमस्य मासस्य प्रथमे सप्ताहे तस्याः पक्षतः आपणस्य ऋणं विवरणं वा प्रत्यावर्तिष्यते

ग्राम्य-आपणाः

अस्माभिः दृष्टं यत् साप्ताहिक-विपणिः अस्मभ्यं बहुविधानि वस्तूनि उपलब्धं कारयति । एतदतिरिच्य वयम् अन्याभ्यः विपणिभ्यः अपि वस्तूनि क्रीणीमः। एतादृशाः बहवः आपणाः अस्माकं परिवेशे अपि भवन्ति याः अस्मभ्यं बहुविधाः सेवाः तथा च वस्तूनि उपलब्धानि कारयन्ति । वयं पार्श्वस्थस्य दुग्ध-आपणतः दुग्धं, नित्योपयोगि-वस्तु-विक्रेतुः तैलानि, उपस्कराणि, अन्यखाद्य-पदार्थान्, अपि च पुस्तिका-विक्रेतुः कर्गदानि लेखनीः च, पुनः औषध-आपणतः औषधं क्रेतुं शक्नुमः। एतादृशाः आपणाः प्रायः स्थायिरूपेण तत्र तत्र भवन्ति अपरञ्च राजमार्गस्य तीरे पदाति-मार्गे शाकस्य केचन आपणिकाः फलविक्रेतारः अपि च केचन वाहन-यान्त्रिकादयः अपि दृश्यन्ते ।

सुजाता टिप्पणीपुस्तिकां स्वीकृत्य आपणं किमर्थं गतवती? किम् एषः उपायः उपयोगी अस्ति? किं एतस्मिन् काचित् समस्या अपि भवितुं शक्नोति?

भवतां परिवेशे बिभिन्न-प्रकारकाः आपणाः के के सन्ति? भवन्तः तेभ्यः किं किं विक्रीणन्ति?

राजमार्गस्य तटे विद्यमानाः आपणाः साप्ताहिक-विपण्यां च उपलभ्यमानानां वस्तूनां तुलनायां स्थायिभ्यः आपणेभ्यः उपलभ्यमान-वस्तूनि अधिक-मूल्य-युक्तानि किमर्थं भवन्ति?

प्रतिवेशस्य आपणाः बहुषु अर्थेषु महोपयोगाः भवन्ति । अस्माकं गृहस्य समीपे तु ते भवन्ति एव अपि च वयं सप्ताहस्य कस्मिंश्चित् अपि दिने एवं च कस्मिन् अपि काले एतान् आपणान् प्रति गन्तुं शक्नुमः।

सामान्यतः क्रेतारः विक्रेतारः च परस्परं परिचिताः अपि भवन्ति तथा च आपणिकाः ग्राहकेभ्यः ऋणरूपेण अपि दातुं सज्जीभवन्ति। अर्थात् अद्य क्रीतानां वस्तूनां देयराशिं पश्चात् अपि दातुं सौविध्यं भवति यथा सुजातायाः उदाहरणे वयं द्रष्टवन्तः।

अंजल-मॉलः इति किञ्चित् पञ्चतलयुक्तं शॉपिंग-स्थलम् अस्ति। कविता सुजाता च तस्मिन् रज्जुमार्गेण उपरि अधः च गमनागमनस्य आनन्दं अनुभवतः स्म। एषः रज्जुमार्गः काचनिर्मितः इति प्रतिभाति स्म तथा च तस्मिन् ते तस्मिन् बाह्यदृश्यं पश्यन्त्यौ आवागमनं कुरुतः स्म। ते अत्र पयोहिमं सुपिष्टक-रोटिकादिकं भक्ष्यवस्तूनि तथा च गृह्योपयोगि-वस्तूनि चर्ममयौ उपानहौ पुस्तकानि च विविध-प्रकारकान् दृष्ट्वा आह्लादं प्राप्नुवत्यौ आस्ताम्।

वस्तु-विक्रय-केन्द्रस्य तृतीये तले भ्रमन्त्यौ तौ कस्यचित् ब्राण्डेड्-पूर्व-निर्मित-वस्त्राणां आपणं प्राप्तवत्यौ। सुरक्षाकर्मचारी ते निरोधनस्य इच्छया दृष्टवान् परन्तु सः किमपि न उक्तवान्। ते कानिचन वस्त्राणि तथा च तेषु संलग्नां मूल्यस्य चिटिकाः दृष्टवत्यौ। किञ्चित् अपि वस्त्रं 2000 रूप्येकेभ्यः न्यूनं न आसीत्। एतत् मूल्यं साप्ताहिक-विपणेः वस्त्राणां तुलनायां प्रायः पञ्च गुणितम् अधिकम् आसीत्। सुजाता कवितायाः कर्णयोः शनैः उक्तवती "अहं भवतीं कञ्चित् अपरम् आपणं प्रति नेष्यामि यत्र सुवस्त्रं न्यूनमल्येषु लप्स्यते"।

भवन्तः किं चिन्तयन्ति यत् सुरक्षा-कर्मचारी किमर्थं सुजातां कवितां च अन्तःप्रवेशात् किमर्थं रोद्धुम् इष्टवान् स्यात्? यदि कुत्रचित् कस्मिंश्चित् विपण्यां कश्चित् भवतः अन्तःप्रवेशात् वारयेत् तर्हि भवन्तः किं कथयिष्यन्ति?

भवद्भिः स्मृतं स्यात् यत् अस्माकं प्रतिवेशे अपि अनेकविधाः आपणिकाः भवन्ति । केचन स्थायिरूपेण स्व-आपणान् चालयन्ति केचन च राजमार्गस्य तटेषु आपणान् कृत्वा वस्तूनि विक्रीणन्ति ।

विक्रयणकेन्द्रं विक्रयणभवनं च

अनेन प्रकारेण अस्माभिः द्विविधा विपणी दृष्टा, प्रथमा साप्ताहिक-विपणिः अपरा च पार्श्वस्था विपणिः । नगरेषु काश्चन अन्यविधाः विपणयः अपि भवन्ति यत्र एकस्मिन् एव स्थाने बहुविधाः आपणाः भवन्ति । एतान् जनाः शापिंग-कम्पलेक्स इति नाम्ना जानन्ति । इदानीं तु केषुचित् नगरेषु भवन्तः अनेक-तल-युक्तान् वातानुकूलित-आपणान् अपि पश्यन्ति येषां पृथक् पृथक् तलेषु, पृथक् पृथक् वस्तूनि लभन्ते । एते मॉल इति उच्यन्ते । एतेषु नगरीयापणेषु भवन्तः महाव्यापार-समूहानां ब्राण्डेड्-वस्तूनि अपि प्राप्तुं शक्नुमः अपि च किञ्चित् ब्राण्ड इत्यस्माद् रहितानि वस्तूनि अपि लभ्यन्ते । एते समूहाः महान्ति विज्ञापनानि दत्त्वा तथा च स्तरीय-वस्तूनां घोषणां कृत्वा एतान् उत्पादान् विक्रीणन्ति एतानि वस्तूनि महार्घाणि भवन्ति । व्यापारिक-समूहाः स्वस्य ब्राण्डेड् –इति उत्पादान् महानगरेषु तथा च स्वस्य विशिष्टेषु दृश्यप्रकोष्ठेषु विक्रेतुं स्थापयन्ति । ब्राण्ड-रहितानां वस्तूनां तुलनायां एतेषां ब्राण्डेड्-वस्तूनां मूल्यस्य भारं केवलं केचन जनाः एव सोढुं शक्नुवन्ति ।

इत्थं किमर्थं भवति यत् जनाः मॉल इत्यस्मिन् आपणिकैः सह मूल्यनिर्धारणे विवादं न कुर्वन्ति, निर्धारितमूल्यम् एव यच्छन्ति अपरञ्च साप्ताहिक-विपणिषु एतादृशं बहुलतया क्रियते?

भवन्तः किम् अनुभवन्ति यत् भवतां ग्रामं प्रति आपणेषु वस्तूनि कथम् आयान्ति? जानन्तु अपि च उदाहरणैः बोधयन्तु।

राशिवणिजः भूमिका आवश्यकी किमर्थं भवति?

विपणीनां शृङ्खला

प्रथमे भागे भवद्भिः विभिन्नप्रकारकाणां विपणीनां विषये पठितं यत्र वयं वस्तूनि क्रेतुं गच्छामः। किं भवन्तः चिन्तयितुं शक्नुवन्ति यत् एते सर्वे आपणिकाः स्वस्य आपणानां कृते वस्तूनि कुतः स्वीकृत्य आनयन्ति? वस्तूनाम् उत्पादनम् उद्योगेषु क्षेत्रेषु गृहेषु च भवति परन्तु वयम् उद्योगेभ्यः क्षेत्रेभ्यः च साक्षात् वस्तूनि न क्रीणीमः। वस्तूनाम् उत्पादयितारः अपि अस्मभ्यं अल्पमात्रया, यथा एककिलो-परिमितं शाकं विक्रेतुं अथवा एकं प्लास्टिकशरावं विक्रेतुं रुचिवन्तः न भवन्ति।

ते जनाः ये वस्तूनाम् उत्पादकानाम् उपभोक्तृणां च मध्ये भवन्ति ते व्यापारिणः इति उच्यन्ते । पूर्वं राशिवणिक् अत्यधिकमात्रया सङ्ख्यायां वा वस्तूनि क्रीणाति । यथा शाकानां राशिवणिक् किञ्चिन्मात्रं शाकं न क्रीणाति अपरञ्च सः महामात्रया यथा पञ्चविंशति-किलो-परिमितात् शतं किलोपरिमितानि शाकानि क्रीणाति । तानि सः अपरान् व्यापारिणः विक्रीणाति । अत्र क्रेतारः विक्रेतारः च अन्ये व्यापारिणः भवन्ति । व्यापारिणां शृङ्खलायां, यः अन्तिमः व्यापारी, यः अन्ततः वस्तूनि साक्षात् उपभोक्तारं विक्रीणाति सः खुदराव्यापारी अथवा फुटकरव्यापारी इति उच्यते । असौ स एव वणिक् भवति यः भवतः पार्श्वस्थेषु आपणेषु साप्ताहिक-आपणेषु अथवा पुनः शापिंगकाम्पलेक्स इत्यादिषु वस्तूनि विक्रीणाति ।

देहल्याः दशसु राशिविपणीषु उपरि प्रदत्ते मानचित्रे चतस्रः विपण्यः प्रदर्शिताः।

वयम् एतं विषयम् अत्र प्रदत्तैः उदाहरणैः ज्ञास्यामः –

प्रत्येकस्मिन् नगरे राशिविपणेः किञ्चन क्षेत्रं भवति । यत्र वस्तूनि प्रथमतया प्राप्नुवन्ति अपि च इतः एव तानि अन्यान् व्यापारिणः यावत् प्राप्नुवन्ति । राजमार्गस्य तटस्थः व्यापारी यस्य विषये भवन्तः पूर्वं पठितवन्तः आसन् व्यापकमात्रया प्लास्टिक-वस्तूनि नगरस्य राशि-व्यापारिणः क्रीणाति । एतद् भवितुं शक्नोति यत् सः महावणिक् स्वस्मात् अपि दीर्घतरात्

आफताबः – नगरे शाकानां राशिव्यापारी

आफताबः तेषु राशि-व्यापारिषु कश्चन अस्ति ये अत्यधिक-मात्रया क्रयणं कुर्वन्ति। तेषां व्यवसायः प्रातःकाले प्रायः त्रिवादनतः आरभते। अस्मिन् काले एव शाकानि विपणिं प्राप्नुवन्ति। एषः एव समयः अस्ति यदा शाकानि विपण्याम् अथवा शाक-विक्रयण-स्थाने गतिविधयः बहुलतया जायन्ते। पार्श्वस्थेभ्यः स्थानेभ्यः अथवा दूरस्थेभ्यः स्थानेभ्यः क्षेत्रेभ्यः शाकानि ट्रकयानैः मेटाडोर इति यानेन ट्रैक्टरयानेन वा शाकानि अत्र आनीयन्ते । शीघ्रम् एव नीलामी इत्यस्य प्रक्रियायाः आरम्भः भवति । आफताब-महोदयः अपि नीलामी इत्यस्यां सम्मिलितो भवति । शाकानि दृष्ट्वा सः निर्धारणं करोति यत् अद्य सः किं क्रेष्यति । उदाहरणार्थम् असौ अद्य पञ्चक्विण्टल इति पुष्पशाकं दश-क्विण्टल इति पलाण्डुं क्रीणाति । नगरे तस्य कश्चित् आपणः तथा च किञ्चित् भण्डारगृहम् अस्ति यत्र सः तानि शाकानि स्थापयति विक्रीणाति च । अत्र सः लघु-व्यापारिणः शाकानि विक्रीणाति ये प्रातः षड्वादने प्रायः अत्र आगच्छन्ति। इतः सम्पूर्णस्य दिनस्य कृते क्रयणं कृत्वा ते लघुव्यापारिणः प्रायेण दशवादनसमये पार्श्वस्थेषु क्षेत्रेषु स्व-आपणानाम् उद्घाटनं कुर्वन्ति।

व्यापारिणः प्लास्टिकवस्तूनि क्रीणीयात् । नगरस्य राशिवणिक् प्लास्टिकवस्तूनि कस्माच्चित् उद्योगात् क्रीणीयात् अपि च तानि भण्डारे स्थापयेत् । अनेन प्रकारेण विपणेः काचित् शृङ्खला भवति । यदा वयं किञ्चित् वस्तुः क्रीणीमः तदा वयम् एतादृशम् अवधानं न दद्मः यत् तत् वस्तु कथं केन प्रकारेण च दीर्घयात्रां कृत्वा अस्माकं समक्षे उपस्थितम् अस्ति ।

नगरीयाः जनाः अन्तर्जालस्य माध्यमेन गृहात् बहिः अगत्वा एव विपणिं प्रविशन्ति । ते स्वस्य क्रेडिट्-पत्र-माध्यमेन एव क्रयणं कुर्वन्ति ।

प्रत्येकं स्थाने विपणिः

अस्माभिः दृष्टं यत् पृथक् पृथक् स्थानेषु विभिन्नाः विपणयः सन्ति यत्र विभिन्नानि वस्तूनि क्रीयन्ते विक्रीयन्ते च । एताः विपणयः स्वस्य स्वस्य स्थानेषु समये च स्वदृष्ट्या कार्यं कुर्वन्ति । कदाचित् तु इदम् अपि आवश्यकं न भवति यत् भवन्तः वस्तूनि क्रेतुम् विपणिं गच्छेयुः। अधुना तु विभिन्नानां वस्तूनां कृते दूरवाण्या अथवा अन्तर्जाल-माध्यमेन अपि वस्तूनि क्रीयन्ते अपि च वस्तूनि भवतां गृहं यावत् प्राप्यन्ते । भवद्भिः दृष्टं स्यात् यत् परिचारिकागृहे तथा च चिकित्सकस्य चिकित्साभवने अपि केषाञ्चित् व्यवसायिसमूहानां प्रतिनिधयः स्ववस्तूनि विक्रयणस्य कार्यं कुर्वन्ति । अनेन प्रकारेण वयं पश्यामः यत् क्रयणं विक्रयणं च विविधैः उपायैः भवति । इदम् आवश्यकं नास्ति यत् तत् केवलं विपणिं गत्वा अपि च आपणेभ्यः एव भवेत् ।

एतानि तु विपणेः एतादृशानि रूपाणि सन्ति यानि अस्माभिः प्रत्यक्षतः दृश्यन्ते । एतादृशाः अपि काश्चन विपणयः भवन्ति यासां विषये अस्माकं ज्ञानं न्यूनम् एव भवति यतोहि अत्र विक्रीय-माणानां क्रीयमाणानां च वस्तूनां च प्रयोगं वयं प्रत्यक्षतः न कुर्मः। यथा कश्चित् कृषकः स्वस्य कृषेः उत्पादनस्य वृद्ध्यर्थं केषाञ्चित् उर्वरकाणां खाद इत्येतेषां च प्रयोगं करोति । एतान् उर्वरकान् सः नगरस्य केभ्यश्चित् विशिष्टेभ्यः आपणेभ्यः क्रीणाति यत्र उर्वरक-उद्योगात् सामग्री आनीयते । केनचित् कार-उद्योगेन इंजन-गियर्स-पेट्रोल-गार-एक्सेल-चक्रादीनि च पृथक् पृथक् उद्योगेभ्यः क्रीयन्ते परन्तु वयम् एतस्मिन् विषये अज्ञात्वा कारयानस्य आपणतः एव अन्तिम-उत्पादम् अर्थात् कारयानं क्रीणीमः तत्रैव च सम्पूर्णं कारयानं पश्यामः । सर्वेषां वस्तूनां निर्माणस्य क्रयणस्य च एतादृशी एव कथा भवति ।

कस्मिंश्चित् उद्योगे कारयानस्य भागानां योजनं भवति।

विपणिः समानता च

अस्मिन् अध्याये अस्माभिः स्वस्य प्रतिवेशस्य कासाञ्चित् विपणीनां विषये परिशीलनं कृतम् अस्ति । अस्माभिः साप्ताहिकविपणेः आरभ्य शापिंग-काम्प्लेक्स इत्येतत् यावत् सर्वे आपणिकाः आपणाः च दृष्टाः । एतयोः द्वयोः आपणिकयोः मध्ये महत् अन्तरम् अस्ति । कश्चित् लघुराश्या स्वव्यापारं चालयति तादृशः आपणिकः अस्ति, अपरस्मिन् पक्षे अपरः आपणिकः स्वस्य आपणस्य कृते महाराशिं व्ययीकर्तुं शक्नोति । एतयोः आयः अपि पृथक् पृथक् भवति । साप्ताहिकविपणेः लघु-आपणिकः विक्रयणस्थानस्य व्यापरिणः तुलनायाम् अत्यल्पं लाभांशम् अर्जयति । अनेन एव प्रकारेण क्रेतॄणाम् अपि पृथक् पृथक् श्रेण्यः स्थितयः च सन्ति । एतादृशाः बहवः जनाः सन्ति ये अल्प-मूल्ययुक्तानि वस्तूनि अपि क्रेतुं समर्थाः न सन्ति, अपरस्मिन् पक्षे जनाः विक्रयण-स्थानकेषु महार्घं विक्रयणं कर्तुं व्यस्ताः दृश्यन्ते । अनेन प्रकारेण अन्यानि कारणानि अतिरिच्य अस्माकम् आर्थिक-स्थितिः एव निर्धारणं करोति यत् वयं कीदृशीसु विपणिषु आपणिकाः अथवा क्रेतारः भवितुं शक्नुमः।

अस्माभिः वस्तूनाम् उत्पादनाद् आरभ्य अस्माकं गृहं यावत् वस्तूनि कथं प्राप्नुवन्ति तथा च विपणीनां शृङ्खलायाः विषये अवगतवन्तः । अनया शृङ्खलया एव सम्भवति यत् एकस्मिन् स्थाने उत्पादितानि वस्तूनि जनानां कृते प्रत्येकं स्थाने उपलब्धानि भवेयुः। वस्तूनां विक्रयणेन वस्तूनाम् उत्पादनं साक्षात् सम्बद्धम् अस्ति। निर्मितानां वस्तूनां विक्रयणेन एव जनाः जीवन-निर्वाह-योग्याम् आजीविकां प्राप्नुवन्ति तथा च उत्पादनम् अपि वर्द्धयते परन्तु किम् एतेन शृङ्खलायाः प्रत्येकं स्तरेलाभस्य समानाः अवसराः प्राप्यन्ते? अग्रे "कस्यचित् युतकस्य कथा" इति अध्याये वयम् एतं प्रश्नम् अवगन्तुं प्रयासं करिष्यामः।

अभ्यासः

1. कश्चित् परिव्रजनशीलः आपणिकः कस्यचित् स्थायि-आपणिकस्य तुलनायां कथं भिन्नः अस्ति ?

2. निम्नतालिकायाः आधारेण कस्यचित् साप्ताहिकविपणेः विक्रयण-स्थानकस्य च तुलनां कुर्वन्तः तयोः मध्ये यद् अन्तरम् अस्ति तत् स्पष्टीकुर्वन्तु।

विपणयः	*विक्रीयमाणानां वस्तूनां प्रकाराः*	*वस्तूनां मूल्यानि*	*विक्रेतारः*	*ग्राहकाः*
साप्ताहिक-विपणिः				
विक्रयणस्थानकम्				

3. स्पष्टी-कुर्वन्तु यत् विपणीनां शृङ्खला कथं जायते? एताभिः केषाम् उद्देश्यानां पूर्तिः भवति?

4. सर्वेषां जनानां कृते विपण्यां कम् अपि आपणं गन्तुं समानरूपेण अधिकारः अस्ति। किं भवतां विचारेण महार्घाणाम् उत्पादानाम् आपणानां विषये इदं तथ्यं यथार्थम् अस्ति? उदाहरणं दत्त्वा स्पष्टीकुर्वन्तु।

5. विपणिम् अगत्वा अपि क्रयणं विक्रयणं च भवितुं शक्नोति। उदाहरणं दत्त्वा एतस्य कथनस्य व्याख्यां कुर्वन्तु।

शब्द-सङ्कलनम्

साप्ताहिक-विपणिः- *एताः विपणयः नियमिताः स्थायिरूपेण च न भवन्ति परन्तु एकस्मिन् नियते स्थाने सप्ताहे एकदा अथवा वारद्वयम् आयोज्यन्ते। एतासु विपणिषु गृह्य-उपयोगिनी सर्वाणि वस्तूनि प्रायः विक्रीयन्ते यथा शाकानि, वस्त्राणि, पात्रादीनि च।*

मॉल अर्थात् सर्ववस्तु-विक्रय-स्थानकम् - *एतत् आपणैः सर्वतः आवृत्तं स्थानं भवति। एतस्य भवनं विशालं भवति यस्मिन् बहूनि तलानि, आपणाः, उपाहार-मन्दिराणि कदाचित् च चल-चित्रगृहाणि अपि भवन्ति। एतेषु आपणेषु प्रायेण ब्राण्ड-युक्तानि वस्तूनि विक्रीयन्ते।*

थोक अर्थात् महाक्रयणम् - *एतस्य अर्थः व्यापक-मात्रया क्रयणं विक्रयणं च भवति। अधिकांशेषु उत्पादेषु येषु शाकानि फलानि पुष्पाणि अपि सम्मिलितानि सन्ति इति एतेषां स्वस्य विशिष्टाः राशि-विपणयः भवन्ति।*

विपणीनां शृङ्खलाः – *इयं विपणीनां काचित् शृङ्खला अस्ति या परस्परम् अन्योऽन्याभिः शृङ्खलाभिः इव युक्ता भवति यतोहि उत्पादाः एकस्मात् विपणेः अपरां विपणिं प्राप्नुवन्ति।*

अध्यायः – 9

विपण्याम् एकं युतकम्

अयम् अध्यायः अस्मान् एकस्य युतकस्य कथां बोधयति। इयं कथा कार्पासस्य उत्पादनात् आरभते तथा च युतके विक्रीते सति समाप्तिं गच्छति। आगच्छन्तु वयं पश्यामः यत् विपणीनां शृङ्खला कर्पासस्य उत्पादकान् विशिष्ट-विपण्यां युतक-ग्राहकेन सह कथं योजयति। एतस्यां शृङ्खलायां प्रत्येकं शृङ्खलया सह क्रयणं विक्रयणं च सम्बद्धम् अस्ति। किम् एतस्मात् सर्वेषां कृते समानरूपेण लाभः भवति ? अथवा अपरेषां कृते अन्येषाम् अपेक्षया आधिक्येन लाभः जायते ? वयम् एतद् ज्ञातुं प्रयत्नं करिष्यामः।

कुरनूले कार्पासोत्पादकस्य काचित् महिलाकृषिका

स्वप्ना-महोदया या कुरनूलस्य आन्ध्रप्रदेशस्य काचित् लघुकृषिका अस्ति सा स्वस्य लघुक्षेत्रे कार्पासं वपति । कार्पासस्य पादपेषु आगतबीजानि पक्वभावं गच्छन्ति तथा च तेषु केचन प्रस्फुटिताः अपि सन्ति अतः स्वप्ना कार्पासस्य चयने व्यस्ता अस्ति । कार्पासस्य बीजकोशे यस्मिन् कार्पासं पूर्णरूपेण पूरितम् अस्ति सह एव न प्रस्फुटन्ति । अतः कार्पासम् एकत्रीकर्तुं बहूनि दिनानि व्यतीतानि भवन्ति ।

कार्पासम् एकत्रीकृत्य स्वप्ना तत् स्वपतिना सह कुरनूलस्य कार्पास-विपणिम् अनीत्वा कस्यचित् स्थानीय-व्यापारिणः समीपं नयति । सस्यस्य वपनस्य समये प्रारम्भिके काले एव स्वप्ना व्यापारिणः कृष्यर्थं बीजानि उर्वरकान् कीटनाशकादीन् च क्रेतुम् उच्चकुसीदमात्रा इत्यनेन पञ्चविंशति-शतं रूप्यकाणि स्वीकृतवती आसीत् । तस्मिन् समये स्थानीय-व्यापारी स्वप्नां एकस्याः प्रतिभूत्याः कृते सहमतां कृतवान् आसीत् । सा स्वप्नया वचनबद्धताम् अथवा प्रतिज्ञां कारितवान् आसीत् यत् सा स्वस्य सम्पूर्णं कार्पासं तम् एव विक्रेष्यति ।

किं स्वप्ना कार्पासस्य उचितं मूल्यं प्राप्तवती?

व्यापारी स्वप्नायै न्यूनं मूल्यं किमर्थं दत्तवान्?

भवतां विचारेण महान्तः कृषकाः स्वकार्पासं कुत्र विक्रेष्यन्ति? तेषां स्थितिः स्वप्नायाः स्थितेः केन प्रकारेण भिन्ना अस्ति?

कार्पासस्य कृषौ अधिकतमस्य निवेशस्य आवश्यकता भवति यथा उर्वरकाणां कीटनाशकादीनां च । एतेषु कृषकैः महान् व्ययः करणीयः भवति । प्रायेण लघुकृषकैः एतेषां व्ययानां पूर्त्यर्थं रूप्यकाणि ऋणरूपेण स्वीकरणीयानि भवन्ति ।

व्यापारिणः परिसरे तस्य द्वौ कर्मकरौ कार्पासस्य गोणीः तोलयन्ति स्म । 1500 रूप्यकाणि प्रतिक्विंटल इत्यस्य अनुसारं कार्पासस्य सम्पूर्णं धनं 6000 रूप्यकाणि इति जातानि । व्यापारी प्रदत्तस्य ऋणस्य तथा कुसीदस्य रूपेण 3000 रूप्यकाणि स्वीकृतवान् अपि च स्वप्नायै अधुना केवलं 3000 रूप्यकाणि एव दत्तवान् ।

स्वप्ना – केवलं 3000 रूप्यकाणि।

व्यापारी – कार्पासम् अधुना अल्पमूल्येन विक्रीयते । विपण्यां व्यापकमात्रया कार्पासं प्राप्तम् अस्ति ।

स्वप्ना – एतस्य कार्पासस्य उत्पादनार्थं, मया मासचतुष्टयं यावत् कठिनः श्रमः कृतः अस्ति । भवान् पश्यतु इदानीं कार्पासं कियत् शुद्धं स्वच्छं च वर्तते । अस्मिन् प्रक्रमे अहम् आशावती आसम् यत् उत्तमं मूल्यम् अहं प्राप्स्यामि ।

व्यापारी - ***अम्ब! अहं भवत्यै उत्तमं मूल्यं यच्छामि । अन्ये व्यापारिणः एतावद् अपि न दास्यन्ति। भवत्याः मयि विश्वासः न स्यात् तर्हि कुरनूलस्य विपणिं गत्वा जानन्तु ।***

स्वप्ना - रुष्टः मा भव। अहं कथं भवति सन्देहं कर्तुं शक्नोमि ? अहं तु केवलम् आशां कृतवती आसम्, यत् अस्मिन् प्रक्रमे कार्पासस्य सस्ये एतावान् आयः भविष्यति येन केषाञ्चित् मासानां निर्वहणं सम्यक्तया भविष्यति इति ।

यद्यपि स्वप्ना जानाति यत् कार्पासः न्यूनातिन्यूनं 1800 रूप्यकाणि प्रतिक्विंटल इति विक्रेष्यते परन्तु सा अग्रे विवादं न करोति। व्यापारी ग्रामस्य कश्चित् शक्तिशाली जनः अस्ति तथा च कृषकैः ऋणार्थं तस्य आश्रितैः भाव्यं न केवलं कृषेः कृते अपितु अन्यासाम् आवश्यकतानां कृते अपि यथा रोगनिवारणार्थं बालानां विद्यालयस्य शुल्कादीनां च कृते। पुनः वर्षे एतादृशः समयः अपि आगच्छति यदा कृषकाणां पार्श्वे किञ्चित् अपि कार्यं न भवति कार्याभावे आयः अपि तेषां न भवति तस्मिन् काले ते केवलं ऋणं स्वीकृत्य एव जीवितुं शक्नुवन्ति ।

कार्पासस्य उत्पादनं कृत्वा अपि स्वप्नायाः आयः केवलं तस्मात् आयतः केवलं किञ्चित् एव अधिकम् अस्ति यः आयः श्रमं कृत्वा प्राप्तुं शक्यते ।

इरोडस्य वस्त्र-विपणिः

तमिलनाडु-राज्ये सप्ताहे वारद्वयं जायमाना इरोडस्य वस्त्र-विपणिः संसारस्य विशालतमेषु विपणिषु काचित् अस्ति । एतस्यां विपण्यां अनेकप्रकारं वस्त्रं विक्रीयते । पार्श्वस्थेषु ग्रामेषु तन्तुवायैः वयितं वस्त्रम् अपि एतस्यां विपण्यां विक्रयणार्थम् आनीयते । विपणेः पार्श्वे एव व्यापारिणां कार्यालयाः सन्ति ये एतत् वस्त्रं क्रीणन्ति। दक्षिणभारतस्य अन्ये व्यापारिणः अपि एतस्यां विपण्यां वस्त्राणि क्रेतुम् आगच्छन्ति ।

विपण्याः दिनेषु ते तन्तुवायाः अपि भवतः मेलिष्यन्ति ये तन्तुवायाः व्यापारिणाम् आदेशानुसारं वस्त्रं निर्माय अत्र आनयन्ति। एते व्यापारिणः देशस्य विदेशस्य वा वस्त्रनिर्मातृणां निर्यातकानां च कृते तेषाम् आदेशानुसारं वस्त्रस्य उपलब्धतां कारयन्ति । एते सूतं क्रीणन्ति तथा च तन्तुवायान् निर्दिशन्ति यत् कीदृशं वस्त्रं सज्जीकरणीयम् इति। निम्नलिखिते उदाहरणे वयं द्रक्ष्यामः यत् इदं कार्यं कथं भवति ।

इरोडनामके स्थाने कश्चन आपणः



१. विपण्यां कस्यचित् व्यापारिणः आपणः अस्ति । बहुभ्यः वर्षेभ्यः एते व्यापारिणः सम्पूर्णे देशे वस्त्रनिर्मातृभिः सह सम्पर्कं कृतवन्तः, तेभ्यः ते वस्त्र-सम्बन्धे आदेशान् प्राप्नुवन्ति । ते अन्येभ्यः जनेभ्यः सूतं क्रीणन्ति ।

२. तन्तुवायाः समीपस्थेषु ग्रामेषु निवसन्ति । ते एतेभ्यः व्यापारिभ्यः सूतम् आनयन्ति।वयन-चक्रस्य अपि व्यवस्था तैः स्वस्य गृहस्य समीपे एव कृता अस्ति । एतस्मिन् चित्रे भवन्तः कस्मिंश्चित् एतादृशे गृहे स्थापितं पावरलूम इति यन्त्रं द्रष्टुं शक्नुवन्ति। तन्तुवायाः स्वस्य परिवारस्य सदस्यैः सह एतेषु हस्त-वयन-चक्रेषु बहुहोराः यावत् कार्यं कुर्वन्ति। वयनस्य अधिकतरेषु एतादृशेषु घट्टेषु द्विसङ्ख्यायाः आरभ्य अष्टौ सङ्ख्यां यावत् हस्त-वयन-चक्रणि भवन्ति येषां माध्यमेन सूततः वस्त्र-वयनं कृत्वा वस्त्रं सज्जीक्रियते । विभिन्नाः शाटिकाः, प्रोञ्छवस्त्राणि, युतकानि, महिलानां वेशाः तथा च प्रच्छर्दनपट्टाः एतैः निर्मीयन्ते ।

३. तन्तुवायाः सज्जीकृतं वस्त्रं नगरस्य व्यापारिणः समीपे नयन्ति । एतस्मिन् चित्रे तन्तुवायाः नगरस्य व्यापारिणः पार्श्वे गन्तुं सज्जीभूय उपविष्टाः सन्ति । व्यापारी इदं विवरणं स्वस्य पार्श्वे स्थापयति यत् तेभ्यः तन्तुवायेभ्यः कियत् कार्पासं दत्तम् आसीत् तथा च वयितस्य वस्त्रस्य कृते तेषां पारिश्रमिकं तेभ्यः यच्छति।

दादन-व्यवस्था- तन्तुवायैः स्वगृहेषु वस्त्रस्य सज्जीकरणम्

वस्त्रोपलब्धेः ये आदेशाः प्राप्यन्ते तेषाम् आधारेण व्यापारिणः तन्तुवायानां मध्ये कार्यस्य विभाजनं कुर्वन्ति। तन्तुवायाः व्यापारिणः सूतं स्वीकुर्वन्ति तथा च सज्जीकृतं वस्त्रं तस्मै यच्छन्ति। एतया व्यवस्थया तन्तुवायाः लाभद्वयं प्राप्नुवन्ति । तन्तुवायैः सूतं क्रेतुं स्वधनस्य नियोजनं न करणीयं भवति। सह एव सज्जीकृतानि यानि वस्त्राणि भवन्ति तेषां विक्रयणस्य व्यवस्था अपि भवति । तन्तुवायाः आदौ एव जानन्ति यत् तैः कीदृशं वस्त्रं निर्मापयितव्यम् अस्ति तथा च कियत्या मात्रया निर्मापयितव्यम् अस्ति ।

इरोडस्य वस्त्रविपण्यां निम्नलिखिताः जनाः किं कार्यं कुर्वन्ति-व्यापारिणः तन्तुवायाः निर्यातकाः च?

तन्तुवायाः व्यापारिणां कथम् आश्रिताः सन्ति?

यदि तन्तुवायाः स्वयं कार्पासं क्रीत्वा निर्मितवस्त्राणि विक्रीणन्ति तर्हि ते त्रिगुणितम् अर्जनं कुर्वन्ति । किम् एतत् भवितुं शक्नोति? चर्चां कुर्वन्ति ।

किं एतादृशी एव दादन-व्यवस्था पर्पटनिर्माणे उपस्कर-कार्ये धूमदण्डिका-निर्माणे च अपि दृश्यते? स्वक्षेत्रतः एतस्मिन् विषये सूचनाः एकत्रीकुर्वन्तु तथा च कक्षायां तस्मिन् विषये चर्चां कुर्वन्तु।

भवद्भिः स्वक्षेत्रे सहकारिसंस्थानां विषये श्रुतं स्यात् यथा दुग्धस्य किराना इत्यस्य धान्यादिकस्य च व्यवसाये। जानन्तु यत् एताः संस्थाः केषां लाभार्थं स्थापिताः आसन्?

असज्जीकृतां सामग्रीं प्राप्तुं तथा च सज्जीकृतायाः सामग्र्याः विक्रयणार्थम् अपि व्यापारिणाम् आश्रयणस्य कारणतः व्यापारिणां वर्चस्वम् अधिकं जायते । ते आदेशं यच्छन्ति यत् किं वस्त्रं निर्मातव्यम् अस्ति तथा च एतस्य कृते ते अतिन्यून-मूल्यं यच्छन्ति। तन्तुवायानां समीपे इदं ज्ञातुं किमपि साधनं नास्ति यत् ते केषां कृते वस्त्रस्य निर्माणं कुर्वन्तः सन्ति तथा च तेषां विक्रयणं कियता मूल्येन भविष्यति। विपण्यां व्यापारिणः इदं वस्त्रं धारणीय-वस्त्रोद्योगाय विक्रीणन्ति । अनेन प्रकारेण विपण्याः लाभः व्यापारिभ्यः एव आधिक्येन भवति ।

तन्तुवायाः स्व-सम्पूर्णां सङ्गृहीतराशिं नियोज्य अथवा उच्चव्याजमात्रया ऋणं स्वीकृत्य वयनयन्त्रं क्रीणन्ति । एकस्य वयनयन्त्रस्य मूल्यं 20000 रूप्यकाणि सन्ति । अतः लघुतन्तुवायेन अपि द्वयोः वयनयन्त्रयोः कृते प्रायेण 40000 रूप्यकाणि व्ययीकरणीयानि भवन्ति । एतेषु वयन-यन्त्रेषु एकाकी कश्चित् कार्यं न कर्तुं शक्नोति । वस्त्रनिर्माणाय तन्तुवायेन सपरिवारं द्वादशहोराः यावत् कार्यं करणीयं भवति । एतेन सम्पूर्णेन उद्योगेन ते मासे प्रायः 3500 रूप्यकाणि एव अर्जयितुं पारयन्ति ।

व्यापारि-तन्तुवाययोः मध्ये इयं व्यवस्था दादनव्यवस्था इत्यस्य किञ्चित् उदाहरणम् अस्ति यत्र व्यापारी स्थूलसामग्रीं ददाति तथा च तन्तुवायः तेन सिद्धः उत्पादः प्राप्यते । भारतस्य अनेकेषु क्षेत्रेषु वस्त्र-वयन-उद्योगे इयं व्यवस्था प्रचलिता अस्ति।

तन्तुवाय-सहकारि-संस्था

अस्माभिः दृष्टं यत् दादन-व्यवस्थायां व्यापारिणः तन्तुवायेभ्यः अत्यल्पं धनं यच्छन्ति।व्यापारिषु तन्तुवायानां या आश्रयता वर्तते तां न्यूनीकर्तुं तथा च तेषां आयं वर्धितुं सहकारिव्यवस्था एकं साधनम् अस्ति। कस्याञ्चित् सहकारि-संस्थायां ते जनाः येषां हितानि समानरूपेण सन्ति एकत्रीभूय परस्परं लाभार्थं कार्यं कुर्वन्ति। तन्तुवायानां सहकारि-संस्थायां तन्तुवायाः समूहं निर्माय काञ्चन् गतिविधीन् सामूहिकरूपेण कुर्वन्ति। ते कार्पास-व्यापारितः कार्पासं प्राप्नुवन्ति तथा च तत् कार्पासं तन्तुवायेषु वण्टयन्ति। सहकारिसंस्था विक्रयणस्य अपि कार्यं करोति। अनेन प्रकारेण व्यापारिणः मध्यस्थता समाप्तिं गच्छति तथा च तन्तुवायाः वस्त्रस्य उचितं मूल्यं प्राप्नुवन्ति। कदाचित् सर्वकारः उचितमूल्येन सहकारि-संस्थाभ्यः वस्त्रं क्रीत्वा तेषां साहाय्यं करोति। यथा तमिलनाडुराज्ये सर्वकारः निःशुक्लरूपेण गणवेश-दानस्य योजनां चालयति। सर्वकारः एतस्य कृते पावरलूम इत्यस्य तन्तुवायानां संस्थातः वस्त्रं स्वीकरोति। अनेन एव प्रकारेण हस्त-वयन-यन्त्र–तन्तुवाय-सहकारि-समितेः अपि वस्त्रं क्रीत्वा "को-ओपटेक्स-नामधेयस्य आपणानां माध्यमेन विक्रीणाति । भवद्भिः स्वनगरे प्रायेण कुत्रचित् एतादृशाः आपणाः दृष्टाः स्युः ।

कस्मिंश्चित् वस्त्रोद्योगे महिला-श्रमिकाः कुड्मलं सीव्यन्ति।

देहल्याः समीपे वस्त्रनिर्यातस्य उद्योगः

इरोडस्य व्यापारी तन्तुवायैः निर्मितवस्त्रं देहल्याः समीपे निर्मितवस्त्र-निर्यात-कर्त्रे उद्योगाय प्रेषयति । वस्त्रनिर्यातक-उद्योगः एतस्य उपयोगः युतकनिर्माणाय करोति। एतानि युतकानि विदेशि-क्रेतृभ्यः निर्यातं क्रियन्ते । युतकानां वैदेशिकेषु ग्राहकेषु अमेरिकायाः यूरोपस्य च एतादृशाः व्यापारिणः अपि सन्ति ये भाण्डाराणां शृङ्खलां चालयन्ति । एते महान्तः भाण्डारस्वामिनः स्वप्रतिभूतेः आधारितं व्यापारम् एव कुर्वन्ति । ते सामग्री-दातृभ्यः न्यूनतम-मूल्ये सामग्रीक्रयणस्य याचनां कुर्वन्ति । सह एव ते वस्तूनाम् उच्चस्तरीयाः गुणवत्तायाः उपरि अपि च उचिते काले वस्तुदानस्य प्रतिभूतिम् अपि कुर्वन्ति । यदि वस्तूनि किञ्चिद् अपि दोषपूर्णानि सन्ति तर्हि एतस्याम् अवस्थायाम् अथवा वस्तुदाने स्वल्पे अपि विलम्बे सति दृढतया ते दण्डनिर्धारणं कुर्वन्ति। अतः निर्यातकाः एतैः शक्तिशालिभिः ग्राहकैः निर्धारितानां प्रतिभूतीनां पालनस्य सम्पूर्णतया प्रयासं कुर्वन्ति ।

ग्राहकाणां पक्षतः एतादृशानां वर्धितप्रभावानां कारणतः वस्त्रनिर्यातक-उद्योगाः व्यये न्यूनतां कर्तुं प्रयत्नं कुर्वन्ति । ते कार्यकर्तृणां कृते यथाशक्यं न्यूतमं पारिश्रमिकं दत्त्वा अधिकतमं कार्यं कारयन्ति। अनेन प्रकारेण ते स्वस्य लाभांशं तु वर्धयन्ति अपि च वैदेशिकेभ्यः ग्राहकेभ्यः अपि न्यूनमूल्येन वस्त्राणि यच्छन्ति।

वैदेशिकाः ग्राहकाः वस्त्रनिर्यातकेभ्यः किदृशीम् अपेक्षां कुर्वन्ति? वस्त्रनिर्यातकाः एताः प्रतिभूतीः किमर्थं स्वीकुर्वन्ति?

वस्त्रनिर्यातकाः वैदेशिकानां ग्राहकाणां प्रतिभूतिं कथं पूरयन्ति?

इम्पेक्ट-गार्मेंट-उद्योगे व्यापक-सङ्ख्यायां महिला-श्रमिकाः कार्ये किमर्थं स्थापिताः सन्ति? चर्चां कुर्वन्तु।

इम्पेक्टगारमेंट् इति वस्त्रोद्योगे **70** कर्मकराः सन्ति । तेषु अधिकतराः महिलाः सन्ति । एतासु अधिकतराः श्रमिकाः अस्थायिरूपेण नियुक्ताः सन्ति। एतस्य अभिप्रायः अयम् अस्ति यत् यदा उद्योगस्य स्वामी अनुभूयेत यत् अधुना श्रमिकाणाम् आवश्यकता नास्ति तस्मिन् समये सः ताः वृत्तितः मुक्तिं दातुं शक्नोति । शिल्पकाराणां पारिश्रमिकः तेषां कौशलस्य आधारेण निर्धार्यते । कर्मकरेषु अधिकतमं वेतनं सौचिकः प्राप्नोति यत् प्रायः **3000** रूप्यकाणि प्रतिमासं भवति। स्त्रियः सहायिकायाः रूपेण कार्ये नियोज्यन्ते तासां कार्यं भवति यथा सूत्रकर्तनं कुड्मलयोजनं समीकरणम् अपि च पुटकनिर्माणम् । एतेषां कार्याणां कृते न्यूनतमः पारिश्रमिकः दीयते ।

मन्त्रिमहोदयं सम्बोधयन् एकं पत्रं लिखन्तु, तस्मिन् पत्रे भवतां विचारेण श्रमिकाणां कृते यः उचितः राशिः देयः अस्ति तस्य याचनां कुर्वन्तु।

अधः प्रदत्ते युतकस्य चित्रे दर्शितम् अस्ति यत् व्यापारिणः कृते कियान् लाभांशः अभवत् तथा च तेन कियान् व्ययः कृतः। यदि युतकस्य निर्माणस्य मूल्यं 600 रूप्यकाणि सन्ति तर्हि एतेन चित्रेण जानन्तु यत् एतस्य युतकस्य मूल्ये किं किं सम्मिलितं भवति?

श्रमिकाणां कृते तेषां पारिश्रमिकस्य दानम्	
सौचिकः	**3000** रूप्यकाणि
प्रतिसप्ताहम् समीकरणम्(प्रेस इति)	**1.50** प्रतिवस्त्रम्
निरीक्षणम्	**2000**रूप्यकाणि प्रतिमासम्
सूत्रकर्तनम् कुड्मलयोजनं च	**1500** रूप्यकाणि प्रतिमासम्

संयुक्तराज्य-अमेरिकायां तद् युतकम्

संयुक्तराज्य-अमेरिकायाः वस्त्राणां कस्मिंश्चित् वृहति आपणे बहूनि युतकानि प्रदर्शितानि सन्ति । एतेषां मूल्यं 26 डालर इति निर्धारितम् अस्ति अर्थात् प्रत्येकं युतकं 20 डालर अर्थात् 1200 रूप्यकेषु विक्रेष्यते ।



प्रदत्तस्य चित्रस्य अनुसारं रिक्तस्थानानां पूर्तिं कुर्वन्तु-

युतकानां व्यापारिणा देहल्याः वस्त्र-निर्यातकात् युतकानि ..... रूप्यकाणि प्रतियुतकं इति मूल्येन क्रीतानि । पुनः तेन तानि युतकानि ..... रूप्यकाणि सञ्चारमाध्यमैः विज्ञापनस्य कृते व्ययीकृतानि तदनन्तरं प्रायः प्रतियुतकं .....रूप्यकाणि भाण्डारे रक्षयितुं तथा च प्रदर्शनार्थम् अन्यकार्यार्थं च व्ययीकृतानि । अनेन प्रकारेण एषः जनः **600** रूप्यकाणि इति एकस्य युतकस्य कृते व्ययीकृतवान् अपरञ्च सः तत् युतकं **1200** रूप्यकेषु विक्रीणाति । एकेन युतकेन सः ....लाभांशं प्राप्तवान् । सः यावत्यां सङ्ख्यायां युतकानि विक्रेष्यति सः तावन्तम् अधिकं लाभांशं प्राप्स्यति ।

वस्त्रनिर्यातकेन **200** रूप्यकाणि प्रतियुतकं मूल्येन युतकानि विक्रीतानि । वस्त्रार्थं युतके प्रयुक्तायाः अन्यसामग्र्याः कृते व्ययधनं **70** रूप्यकाणि प्रतियुतकम् इति अनेन प्रकारेण व्ययः अभवत् । कर्मकराणां पारिश्रमिकः **15** रूप्यकाणि प्रतियुतकं व्ययः अभवत् तथा च कार्यालय-सञ्चालनस्य कृते अपि **15** रूप्यकाणि प्रतियुतकं व्ययः अभवत् । किं भवन्तः वक्तुं शक्नुवन्ति यत् वस्त्रनिर्यातकः प्रतियुतकं कियन्तं लाभांशं प्राप्तवान्?

विपण्यां लाभस्य अर्जयितारः के सन्ति ?

विपण्याः एका शृङ्खला कार्पासस्य उत्पादकं सुपरमार्किट-इत्यस्य ग्राहकेण योजयति । एतस्याः शृङ्खलायाः प्रत्येकं घट्टे क्रयणं विक्रयणं च भवति । आगच्छन्तु पुनः स्मरामः यत् ते के के जनाः आसन् ये क्रयणस्य विक्रयणस्य च एतस्यां प्रक्रियायां सम्मिलिताः आसन् । किं ते सर्वे समानरूपेण लाभं प्राप्तवन्तः अथवा लाभस्य मात्रा विभिन्नेभ्यः जनेभ्यः विभिन्ना आसीत् ? कैश्चित् जनैः विपण्यां लाभः अर्जितः अपरञ्च केचन क्रयणेन विक्रयेण च विशिष्टं लाभं न प्राप्तुं शक्तवन्तः । बहुपरिश्रमं कृत्वा अपि ते अत्यल्पम् अर्जितवन्तः । किं भवन्तः एतस्यां तालिकायां तान् दर्शयितुं शक्नुवन्ति ?

विपणिः समानता च

वैदेशिकेन व्यापारिणा विपण्याम् अधिकः लाभांशः अर्जितः । तस्य तुलनायां वस्त्रनिर्यातकस्य लाभांशः मध्यमश्रेण्याः आसीत् । अपरस्मिन् पक्षे वस्त्रनिर्यातक-उद्योगस्य कर्मकराः काठिन्येन केवलं स्व-दैनन्दिनीः आवश्यकताः पूरयितुम् एव अर्जितवन्तः । अनेन प्रकारेण अस्माभिः दृष्टं यत् कार्पास-उत्पादिका लघुकृषिका तथा च इरोडस्य तन्तुवायाः कठिनं श्रमं कृतवन्तः परन्तु विपण्यां, ते तेषाम् उत्पादानाम् उचितं मूल्यं न प्राप्तवन्तः। व्यवसायिनां व्यापारिणां च स्थितिः मध्यमभूता अस्ति । तन्तुवायैः सह तुलनायां तेषाम् अर्जनम् अधिकम् अस्ति परन्तु निर्यातकस्य लाभतः अत्यल्पम् अस्ति । अनेन प्रकारेण विपण्यां सर्वे समानरूपेण न अर्जयन्ति । प्रजातन्त्रस्य अन्तर्गतं सर्वैः विपण्याम् उचितः परिश्रमिकः प्राप्तव्यः अस्ति पुनः सा कान्ता वा स्यात् अथवा स्वप्ना वा स्यात् । यदि परिवाराः पर्याप्तरूपेण न अर्जयिष्यन्ति तर्हि ते आत्मानं अन्येषां समं कथम् अनुभविष्यन्ति ?

गार्मेंट-उद्योगस्य श्रमिकाः गार्मेंट इत्यस्य निर्यातकाः विदेशिविपण्याः व्यवसायी च प्रत्येकं युतकेन कियन्तं लाभांशं प्राप्तवन्तः? परस्परम् एतेषां तुलनां कृत्वा जानन्तु।

व्यवसायी विपण्याम् उच्चतरं लाभांशम् अर्जयति। एतस्य किं कारणम् अस्ति?

भवद्भिः विज्ञापनेन सम्बन्धितः अध्यायः पठितः। चर्चां कुर्वन्तु यत् व्यवसायी प्रत्येकं युतके विज्ञापनस्य कृते ३०० रूप्यकाणि किमर्थं व्ययीकरोति?

विपण्याम् अधिकलाभस्य अर्जकाः जनाः

1. _____
2. _____
3. _____

विपण्यां न्यूनलाभस्य अर्जकाः जनाः

1. _____
2. _____
3. _____

किं भवन्तः एतद् जानन्ति स्म यत् भवन्तः यद् पूर्वनिर्मितवस्त्राणि क्रीणन्ति तस्य तत् स्वरूपं प्रापयितुम् प्रत्यक्ष-अप्रत्यक्षरूपेण कियतां जनानां प्रयासः भवति ?

एकस्मिन् पक्षे विपणिः जनानां कृते कार्यं कर्तुं वस्तूनि निर्मातुं विक्रेतुं च अवसरं प्रददाति अत्र केचन जनाः उत्पादयन्ति केचन जनाः च निर्मान्ति । कृषकः अत्र कार्पासं विक्रेतुं शक्नोति तथा च तन्तुवायः स्वनिर्मितवस्त्रं विक्रेतुं शक्नोति । अपरस्मिन् पक्षे विपणितः धनाढ्याः शक्तिशालिनः च जनाः एव प्रायः सर्वाधिकम् अर्जनं कर्तुं शक्नुवन्ति । एते ते जनाः भवन्ति येषां पार्श्वे धनम् अस्ति स्व-उद्योगस्थानकानि सन्ति महान्तः आपणाः सन्ति तथा च बहुभूखण्डाः सन्ति । निर्धनाः तेषां धनिकानां शक्तिशालिनां च जनानाम् आश्रिताः भवन्ति । निर्धनाः अनेकेषां वस्तूनां कृते ऋणार्थम्, असिद्धां सामग्रीं च प्राप्तुं, स्ववस्तूनि विक्रेतुं, वृत्तिं प्राप्तुं च आश्रिताः भवितुं बाध्याः भवन्ति । अस्य आश्रयस्य कारणतः विपण्यां निर्धनानां शोषणं भवति । एतासां समस्यानां समाधानार्थम् अपि मार्गाः उपायाः वा सन्ति यथा उत्पादकाः मिलित्वा सहकारिसंस्थानां निर्माणं कुर्युः तथा च अधिनियमानां दृढतया पालनं भवेत् । अन्तिमे अध्याये वयं पठिष्यामः यत् तवा-नद्याः समीपे धीवरैः कथं कस्याश्चित् सहकारिसंस्थायाः प्रारम्भः कृतः।

अभ्यासः

1. स्वप्ना स्वस्य कार्पासं कुर्नूलस्य कार्पास-विपण्यां न विक्रीय, व्यापारिणे किमर्थं विक्रीतवती?
2. वस्त्र-निर्यातकानाम् उद्योगस्य श्रमिकाणां कार्यस्य च स्थितेः विषये तथा च तेषां कृते दीयमानस्य पारिश्रमिकस्य च वर्णनं कुर्वन्तु । किं भवन्तः चिन्तयन्ति यत् श्रमिकैः सह न्यायः भवति?
3. एतादृशस्य कस्यचित् वस्तुनः विषये चिन्तयन्तु यस्य वयं सर्वे प्रयोगं कुर्मः। तद् वस्तु शर्करा चायं दुग्धं लेखनी कर्गदम् अङ्कनी इत्यादिकं किमपि स्यात्। चर्चां कुर्वन्तु यत् इदं वस्तु विपणेः कया शृङ्खलया सम्बद्धतां स्थापयत् भवत्पर्यन्तं प्राप्नोति । किं भवन्तः तेषां सर्वेषां जनानां विषये चिन्तयितुं शक्नुवन्ति यैः एतस्य वस्तुनः उत्पादने व्यापारे च साहाय्यं कृतं स्यात्?
4. अत्र प्रदत्तानि नव कथनानि उचितेन क्रमेण कुर्वन्तु तथा च पुनः अधः निर्मितानां कार्पासस्य बीजानां चित्रेषु सम्यक् कथनस्य अङ्कान् पूरयन्तु । प्रथमयोः द्वयोः चित्रयोः भवतां कृते अङ्काः पूर्वम् एव पूरिताः सन्ति।

1. स्वप्ना व्यापारिणे कार्पासं विक्रीणाति।
2. ग्राहकाः विशिष्टविपण्यां एतानि युतकानि क्रीणन्ति।
3. व्यापारिणः जिनिंगवस्त्र-उद्योगान् कार्पासं विक्रीणन्ति।
4. गार्मेंट-निर्यातकाः युतकनिर्माणार्थं व्यापारिभ्यः वस्त्रं क्रीणन्ति।
5. कार्पासस्य व्यापारिणः तन्तुवायेभ्यः कार्पासं यच्छन्ति।
6. वस्त्रनिर्यातकः संयुक्तराज्य-अमेरिकायाः व्यापारिणे युतकानि विक्रीणाति।
7. सूतनिर्माणस्य उद्योगाः कार्पासं क्रीणन्ति तथा च सूतस्य व्यापारिणे सूतं विक्रीणन्ति।
8. तन्तुवायाः वस्त्रं सज्जीकृत्य आनयन्ति।
9. जिनिंग-उद्योगाः कार्पासं स्वच्छीकुर्वन्ति तथा च तेषां चयं निर्मान्ति ।



शब्द-सङ्कलनम्
जिनिंग-उद्योगः – इति सः उद्योगः भवति यत्र कार्पासस्य बीजानि तस्य गोलकतः पृथक्क्रियन्ते। अत्र कार्पासं नोदयित्वा चयाः अपि क्रियन्ते ये सूत्रनिर्माणार्थं प्रेष्यन्ते।
निर्यातकः - एषः सः जनः भवति यः विदेशान् प्रति वस्तूनि प्रेषयति।
लाभांशः – अर्थात् यः आयः जातः अस्ति ततः सम्पूर्णं व्ययं पृथक् कृत्वा ऋणं कृत्वा वा अवशिष्टः राशिः। यदि व्ययः आयतः अधिकाः भवेत् तर्हि हानिः भवति।

अध्यायः - 10

समानतायै सङ्घर्षः

अस्मिन् पुस्तके भवन्तः अधुना पर्यन्तं कान्तायाः अंसारीदम्पत्योः मेलान्यायाः स्वप्नायाः च विषये पठितवन्तः। अधुना एतेषां सर्वेषां कथासु यत् तथ्यं समानम् अस्ति तद् अस्ति यत् तैः सह असमानतायाः व्यवहारः कृतः इति । एतादृशीषु स्थितिषु जनाः किं कर्तुं शक्नुवन्ति? इतिहासे एतस्य विषयस्य अनेकानि उदाहरणानि सन्ति यत्र जनाः असमानतानां विरोधे न्यायस्य च कृते सङ्घर्षं कर्तुं एकत्रीभूताः जाताः। किं प्रथमे अध्याये वर्णिता रोजापार्क्स-महोदयायाः कथां भवन्तः स्मरन्ति? किं पञ्चमाध्याये स्त्री-आन्दोलनेषु पठितान् लेखान् चित्रलेखान् च भवन्तः स्मरन्ति? अस्मिन् अध्याये भवन्तः केषाञ्चित् एतादृशानां प्रयासानां विषये पठिष्यन्ति येषां माध्यमेन जनाः असमानतायाः विरोधे सङ्घर्षं कृतवन्तः।



भारतस्य संविधानं प्रत्येकं भारतीयनागरिकं समानदृष्ट्या पश्यति । भवन्तः पुस्तकस्य प्रथमे भागे पठितवन्तः एव सन्ति यत् राज्यस्य तथा च तस्य अधिनियमस्य दृष्टौ केनापि जनेन सह तस्य जातेः लिङ्गस्य धर्मस्य तथा च तस्य निर्धनस्य धनाढ्यस्य च आधारेण कश्चित् भेदभावः न कर्तुं शक्यते। देशस्य प्रत्येकं वयस्कस्य नागरिकस्य पार्श्वे निर्वाचनकाले समानरूपेण मतदानस्य अधिकारः अस्ति। मताधिकारस्य बलेन एव जनता स्वप्रतिनिधीः चिनोति तथा च परिवर्तयति ।

मताधिकारेण अस्माकम् अन्तः समानतायाः भावः विकसति यतोहि अस्माकं मतस्य अपि मूल्यं तावद् एव अस्ति यावत् कस्यापि जनस्य मतस्य वर्तते । परन्तु अयं भावः अधिकतराणां जनानां जीवनं न स्पृशति । भवद्भिः पूर्वतनेषु अध्यायेषु पठितं यत् कथं स्वास्थ्यसेवासु निजीकरणं वर्धते तथा च सर्वकारीयाणां चिकित्सालयानां या शिथिलता दायित्वहीनता च अस्ति तया कान्ता-हाकिमशेख-अमन-सदृशानाम् अत्यन्तं निर्धनानां जनानां कृते स्वास्थ्यसेवाः अत्यन्तं काठिन्येन लभ्यमानाः सन्ति इति कृतम् अस्ति । एते ते जनाः सन्ति ये बहुमूल्य-निज-स्वास्थ्य-सेवायाः व्ययं न सोढुं शक्नुवन्ति ।

अनेन एव प्रकारेण पश्यन्तु काचित् वृद्धा महिला या गृहे शोभनम् उपसेचनम् अवलेहं वा निर्माति महाव्यापारि-समूहानां यानि दीर्घाणि विज्ञापनानि वस्तूनि विक्रेतुं सन्ति तथा च तेषां पार्श्वे यानि अनेकानि संसाधनानि सन्ति तेषां पुरतः दुर्बलतरा जायते तथा च स्पर्धितुं न अर्हति । स्वप्नायाः पार्श्वे अपि पर्याप्त-संसाधनानां न्यूनता अस्ति अपि च अतः स्वकार्पासस्य सस्यं प्ररोहितुं धनाढ्यतः ऋणं स्वीकरणीयं भवति। एतद् एव कारणम् अस्ति यत् तया स्वीयम् उत्तमं सस्यं न्यूनमूल्ये विक्रेतव्यं भवति । सम्पूर्णे देशे मिलान्याः सदृशाः अनेका गृह्यकर्मकर्यः लक्षाधिकाः महिलाः सन्ति याः नैरन्तर्येण परिश्रमपूर्वकम् अन्येषां गृहेषु कार्यं कुर्वन्ति । तदनन्तरम् अपि ताः अपमानिताः भवितुं बाध्याः सन्ति यतोहि ताः संसाधनानाम् अभावात् स्वस्य किमपि कार्यं न कर्तुं पारयन्ति । निर्धनता तथा च संसाधनानाम् अभावः अद्यापि भारतीये समाजे विषमतायाः असमानतायाः च बृहत्तमेषु कारणेषु एकं कारणम् अस्ति ।

अपरस्मिन् पक्षे अंसारी-दम्पतिना संसाधनानाम् अभावात् अथवा न्यूनतायाः कारणात् असमानता न सोढव्या अभवत् । वास्तविकतायां यद्यपि तेषां पार्श्वे भाटकं दातुं पर्याप्तं धनम् आसीत् पुनरपि ते एकं भाटकगृहं प्राप्तुं आमासम् अटितवन्तः । जनाः तेषां धर्मस्य कारणतः तेभ्यः गृहं दातुं निषेधं कृतवन्तः।

मताधिकारस्य बलम् इत्यतः भवान् किम् अवगच्छति ? विषयेऽस्मि परस्परं चर्चां कुर्वन्तु ।

भारते इयं काचित् वास्तविकता अस्ति यत् ये निर्धनाः सन्ति सामान्यतः दलिताः आदिवासिनः तथा च मुस्लिम-समुदायस्य ये जनाः सन्ति अपि च तेषु अपि विशेषतः महिलाः सन्ति।

2001 इति वर्षस्य जनगणनायाः अङ्काः ज्ञापयन्ति यत् अस्माकं जनसङ्ख्यायां 48 प्रतिशतं महिलाः सन्ति,13 प्रतिशतं मुस्लिमजनाः सन्ति 16 प्रतिशतं दलिताः सन्ति तथा च 8 प्रतिशतम् आदिवासिनः सन्ति।

किं भवन्तः स्वस्य परिवारे समुदाये ग्रामे अथवा नगरे कस्यचित् एतादृशस्य जनस्य विषये चिन्तयितुं शक्नुवन्ति यस्य भवन्तः एतदर्थं सम्मानं कुर्वन्ति यतोहि सः न्यायार्थं समानतायै च सङ्घर्षं कृतवान् ?

अनेन एव प्रकारेण विद्यालयस्य अध्यापकाः ओमप्रकाश-वाल्मीकिना एतस्मात् कारणात् विद्यालयस्य क्रीडाक्षेत्रस्य स्वच्छतां कारितवन्तः यतोहि सः दलितः आसीत्। भवद्भिः अस्मिन् एव पुस्तके पठितम् अस्ति यत्

महिलाभिः करणीयानि कार्याणि प्रायः पुरुषाणां कार्याणां तुलनायाम् अकार्याणि एव गण्यन्ते। एतैः सर्वैः सह क्रियमाणस्य भेदभावस्य प्राथमिकं कारणम् एतद् आसीत् यत् ते कस्यचित् सामाजिक-सांस्कृतिक-पृष्ठभूमितः आसन् अथवा ताः महिलाः आसन्। धर्म-जाति-लिङ्गादयः कानिचन महत्त्वपूर्णानि कारकानि सन्ति येषाम् आधारेण अद्यापि भारते जनैः सह असमानतायाः व्यवहारः क्रियते।

निर्धनता मानवीयगरिम्णः अभावः अपि च काञ्चन विशिष्टान् समुदायान् प्रति अपमानसदृशानि कारकाणि प्रायः एतादृशेन मिश्रितरूपेण पुरतः आयान्ति यत् एतस्य तथ्यस्य निर्धारणं कठिनं भवति यत् कुत्र एकप्रकारका असमानता समाप्ता भवति तथा च कुत्र अपरा असमानता प्रारभते । भवद्भिः पठितम् अस्ति यत् दलितासु मुस्लिमबालिकासु अध्ययनस्य मध्ये एव त्यक्तॄणां सङ्ख्या अत्यधिका अस्ति । एषा स्थितिः निर्धनतायाः सामाजिक्यः असमानतायाः च कारणात् तथा च एतेषां समुदायानां कृते सम्यक्-विद्यालयीयानां सुविधानां च अभावसदृशानां कारणैः उत्पन्ना अस्ति ।

समानतायाः कृते सङ्घर्षः

सम्पूर्णे विश्वे समग्रेषु समुदायेषु ग्रामेषु नगरेषु भवन्तः द्रष्टवन्तः स्युः यत् केचन जनाः समानतायै कृतसङ्घर्षाणां कारणात् सम्मानरूपेण परिचीयन्ते। एते ते जनाः सन्ति ये आत्मना सह अथवा स्वस्य पुरतः कृतस्य भेदभावस्य विरोधे आन्दोलनं कृतवन्तः। वयम् एतेषां सम्मानम् एतस्मात् कारणाद् अपि कुर्मः यतोहि एते प्रत्येकं जनं तस्य मानवीय-गरिम्णा सह स्वीकृतवन्तः तथा च सदैव एतं धर्मस्य समुदायस्य च आधारेण न दृष्टवन्तः । एतादृशान् जनान् जनाः महता विश्वासेन स्वसमस्यानां समाधानार्थम् आह्वयन्ति।

प्रायः समानतायाः कमपि विशिष्टं विषयम् अधिकृत्य सङ्घर्षशीलाः जनाः समाजे काञ्चित् विशिष्टां प्रसिद्धिं प्राप्नुवन्ति यतोहि समतायाः सङ्घर्षे बहवः जनाः तेषां समर्थनं कुर्वन्ति । भारते एतादृशानाम् अनेकेषां सङ्घर्षाणां स्मरणं कर्तुं शक्यते यत्र जनाः एतादृशीनां समस्यानां समाधानार्थं सङ्घर्षमार्गं चितवन्तः यान् विषयान् ते महत्त्वपूर्णाः इति चिन्तितवन्तः। पञ्चमाध्याये भवन्तः पठितवन्तः यत्कथं कैः च उपायैः समानतायाः कृते महिलानाम् आन्दोलनं स्वरूपं प्राप्तवान् । मध्यप्रदेशस्य तवा-मत्स्यसङ्घः एतादृशम् एव अपरम् उदाहरणम् अस्ति यत्र जनाः स्वस्य अधिकारार्थम् आन्दोलनं कृतवन्तः। एतादृश्यः समस्ताः सङ्घर्षगाथाः अस्माकं पार्श्वे सन्ति यासु धूमदण्डिकायाः श्रमिकाः धीवराः कृषकाः पर्णकुटीर-निवासि-समूहाः च नैकप्रकारेण न्यायार्थं सङ्घर्षं कृतवन्तः । एतादृशाः समस्ताः प्रयासाः अपि अस्माकं पुरतः सन्ति यत्र जनैः सङ्घीभूय संसाधनानाम् उपरि नियन्त्रणं कर्तुं सहकारि-सङ्घटनानि रचितानि ।

तवा-मत्स्यसङ्घः

यदा वनस्य महान्ति क्षेत्राणि पशूनां कृते अभ्यारण्यरूपेण घोषितानि भवन्ति तथा च विशालानां जलबन्धानां निर्माणं क्रियते तदा सहस्रं जनाः विस्थापिताः भवन्ति । समस्तग्राम-वासिभिः स्वग्रामाः गृहाणि च परित्यज्य कुत्रचित् अन्यत्र नूतनानि गृहाणि निर्मापितव्यानि भवन्ति तथा च नूतनप्रकारेण स्वजीवनस्य आरम्भः करणीयः भवति ते तथा कर्तुं बाध्याः क्रियन्ते । एतेषु विस्थापितेषु अधिकतराः जनाः निर्धनाः भवन्ति । नगरीयक्षेत्रेषु अपि ते निवासाः यत्र निर्धनाः निवसन्ति ते ततः अपसार्यन्ते । एतेषु केचन नगरस्य बाह्यक्षेत्रेषु पुनः स्थाप्यन्ते। एतस्यां सम्पूर्णायां प्रक्रियायां न केवलं विस्थापितानां जनानाम् आजीविकायाः साधनानि प्रभावितानि भवन्ति अपरञ्च नगरेषु स्थितेभ्यः विद्यालयेभ्यः दूरतायाः कारणात् एतेषां निर्धनानां बालकानाम् अध्ययनम् अपि प्रायेण गभीररूपेण प्रभावितं भवति।

तवा-नद्याः जलाशयः

जनानां समुदायानां च विस्थापनम् अस्माकं देशे एकस्याः महत्याः समस्यायाः रूपं धृतवान् अस्ति । एतास्याम् अवस्थायां कदाचित् जनाः सङ्घीभूय एतद्विरुद्ध्य सङ्घर्षार्थं पुरतः आयान्ति । देशे एतादृशानि बहूनि सङ्घटनानि सन्ति यानि विस्थापितानां हितार्थं सङ्घर्षं कुर्वन्ति ।

एतस्मिन् अध्याये वयं तवा-मत्स्यसङ्घस्य विषये पठिष्यामः यः धीवराणां सहकारिसमितीनां कश्चन सङ्घः अस्ति तथा च सतपुडायाः वनेभ्यः विस्थापितजनानाम् अधिकारार्थं युद्ध्यते।

छिन्दवाडा-जनपदस्य महादेव-पर्वत-उपत्यकाभ्यः प्रवहन्ती तवानदी होशङ्गावादे नर्मदया सह मेलितुं बैतूल इति स्थानतः भूत्वा आयाति । तवा-नद्याः उपरि कस्यचित् जलबन्धस्य निर्माणं 1958 तमे वर्षे आरब्धं तथा च 1978 तमे वर्षे पूर्तिं गतम्। वनस्य महता भागेन सह एव अत्यधिकमात्रया कृषिभूमिः अपि जलबन्धे निमग्ना जाता यतः वनवासिनः स्वस्य सर्वस्वं नष्टीकृतवन्तः। एतेषु केचन विस्थापिताः बन्धस्य पार्श्वस्थेषु क्षेत्रेषु स्थित्वा न्यूनमात्रया कृषिकार्यं तथा च मत्स्यग्रहणस्य व्यवसायः आरब्धः। एतत्सर्वं कृत्वा अपि ते अत्यल्पमेव अर्जयितुं पारयन्ति स्म ।



नद्याः उपरि जलबन्धः एतादृशे स्थाने निर्मीयते यत्र अधिकमात्रया जलस्य एकत्रीकरणं भवितुं शक्नुयात्। अनेन प्रकारेण एकः जलाशयः जायते तथा च यथा यथा तस्मिन् जलं पूर्णं भवति भूमेः किञ्चित् महत्क्षेत्रं जले निमग्नं भवति। इत्थम् एतस्मात् कारणात् भवति यतोहि नद्याः उपरि निर्मितस्य बन्धस्य भित्तिः उच्चतरा भवति तथा च तस्याः सङ्गृहीतं जलं दीर्घाणि क्षेत्राणि यावत् प्रथितं भवति। एतत् चित्रम् उत्तराखण्डस्थस्य टिहरीबन्धे निर्मिते सति जलनिमग्नस्य क्षेत्रस्य अस्ति। एतस्य जलबन्धस्य कारणतः पुरातनं टिहरीनगरं तथा च शतं ग्रामाः, येषु केचन पूर्णतः केचन च आंशिकरूपेण जले निमग्नाः जाताः। प्रायः लक्षं जनाः विस्थापिताः जाताः ।

तवा-मत्स्यसङ्घस्य विषयः कः आसीत्?

ग्रामवासिनः एतस्य सङ्घस्य निर्माणस्य आवश्यकतां कथम् अनुभूतवन्तः?

किं भवन्तः चिन्तयन्ति यत् तवा-मत्स्यसङ्घस्य साफल्यस्य कारणम् आसीत् ग्रामीणानां व्यापक-सङ्ख्यायां सहभागिता? एतस्मिन् सन्दर्भे पङ्क्तिद्वयं लिखन्तु?

1994 तमे वर्षे सर्वकारः तवा-बन्धस्य क्षेत्रे मत्स्य-ग्रहणस्य कार्यं निज-संवित्कर्मिणः अर्पितवान् । एतैः संविदा-कर्मिभिः स्थानीयाः जनाः कार्यतः पृथक्कृताः तथा च बाह्यक्षेत्रतः अल्पधनग्रहीतारः श्रमिकाः आनीताः । एते संविदा-कर्मिणः स्वस्य मल्लान् आहूय ग्रामवासिनः भायितवन्तः तथा च तेभ्यः ग्रामवासिभ्यः आह्वानानि अपि दत्तानि यतोहि जनाः ततः अपगन्तुं सज्जाः न आसन्। ग्राम्यजनाः सङ्घीभूय निश्चितवन्तः यत् स्वाधिकाराणां रक्षार्थं ते सङ्घर्षं करिष्यन्ति तथा च इतः विचलिताः न भविष्यन्ति। अनेन प्रकारेण तवा-मत्स्यसङ्घस्य रचना जाता ।

नवसङ्घटितेन तवा-मत्स्यसङ्घेन (टी.एम.एस.) सर्वकारतः याचना कृता यत् जनानां जीवन-निर्वाहार्थं बन्धे मत्स्यग्रहणस्य यत् कार्यम् अस्ति तत् कार्यं कर्तुं तेषां कृते अनुमतिः भवेत् । एताम् अभियाचनां कुर्वन्तः ते जनाः राजमार्गे

अत्र चित्रे टी.एम.एस. इति समितेः सदस्याः कस्मिंश्चित् प्रदर्शने विरोधं कुर्वन्तः सन्ति

अस्मिन् चित्रे सहकारि-समितेः काचित् सदस्या मत्स्यानां तोलनं कुर्वती अस्ति।

अवरोधं जनितवन्तः । तेषां विरोधं प्रतिरोधं च दृष्ट्वा सर्वकारेण सम्पूर्णायाः समस्यायाः समीक्षार्थं काचित् समितिः रचिता । समितिः ग्रामवासिनां जीवननिर्वाहार्थं तेषां कृते मत्स्यग्रहणस्य अधिकारस्य अनुशंसां कृतवती । 1996 तमे वर्षे मध्यप्रदेशसर्वकारः निर्धारितवान् यत् तवा-जलबन्धस्य जलाशयेभ्यः मत्स्यग्रहणस्य अधिकारः अत्रत्यानां विस्थापितानां कृते एव दास्यते । द्वयोः मासयोः अनन्तरं सर्वकारः तवामत्स्यसङ्घार्थं जलबन्धे मत्स्यग्रहणार्थं पञ्चवर्षाणाम् अनुबन्धं दास्यति इति स्वीकृतवान्। अनेन प्रकारेण जनवरीमासस्य द्वितीये दिनाङ्के 1997 तमे वर्षे तवाक्षेत्रस्य 33 ग्रामाणां जनानां कृते नूतनवर्षे सम्यग्-अर्थेषु प्रारब्धम् ।

तवा-मत्स्यसङ्घेन सह सम्बद्धतां कृत्वा धीवराः नैरन्तर्येण स्वस्य धनस्य आये वृद्धिं कृतवन्तः । एतद् एतस्माद् कारणाद् अभूत् यतोहि ते एकां सहकारिसमितिं रचितवन्तः या गृहीतमत्स्यानां प्रत्येकं राशेः उचितमूल्यं साक्षात् तेभ्यः यच्छति । एषा सहकारिसमितिः अनन्तर-प्रक्रियायाम् अपि सम्मिलिता भवति । सम्पूर्णा सामग्री विपणिं प्राप्नुयात् तथा च तत्रापि उचितं मूल्यं प्राप्नुयात् एतत् समितेः एव कार्यम् अस्ति । एते धीवराः अधुना पूर्वापेक्षया त्रिगुणितम् अर्जयन्ति । तवा-मत्स्यसङ्घेन जालं क्रेतुं तथा च तस्य सुरक्षार्थं धीवराणां कृते ऋणदानस्य अपि व्यवस्था कृता अस्ति । मत्स्यानां कृते सम्यक् आयस्य प्राप्त्या सह तवा-मत्स्यसङ्घेन एतस्य विषयस्य अपि व्यवस्था कृता अस्ति यत् जलाशये मत्स्याः

किं भवन्तः स्वजीवने किञ्चित् एतादृशम् उदाहरणं स्मर्तुं शक्नुवन्ति यस्मिन् केनचित् जनेन अथवा कैश्चित् जनैः मिलित्वा असमानतायाः काचित् स्थितिः परिवर्तिता स्यात्?

सम्यक्प्रकारेण वर्धेरन् । टी.एम.एस इति संस्था सर्वेषां पुरतः इदं तथ्यम् उपस्थापितवती यत् जनाः यदा आजीविकायाः अधिकारं प्राप्नुवन्ति तदा ते उचित-प्रबन्धनस्य गुणैः अपि समन्विताः भवन्ति ।

अत्र प्रस्तुतम् इदं गीतं विनयमहाजनेन सूचनायाः अधिकारस्य अभियाने लिखितम् अस्ति ।

मम ज्ञातुम् अधिकारः

अरे! मम स्वप्नाः ज्ञातुम् अधिकृताः सन्ति...

किमर्थम् एते दशकेभ्यः त्रुटन्ति एते किमर्थं चरितार्थाः न भवन्ति

अरे!मम हस्तौ ज्ञातुम् अधिकृतौ स्तः...

किमर्थम् एतौ वर्षेभ्यः रिक्तौ स्तः, एतौ अद्यापि कार्यविरहितौ स्तः

मम पादौ एतद् ज्ञातुम् अधिकृतौ स्तः

किमर्थं ग्रामे ग्रामे पदातिः गमनीयं भवति, किमर्थं बसयानं नास्ति।

भो! मम बुभुक्षा एतद् ज्ञातुम् अधिकृता वर्तते

किमर्थम् अन्नभण्डारेषु अन्नानि नष्टीभवन्ति, मत्कृते मुष्टिमात्रम् अपि अन्नं नास्ति ।

मम वृद्धा माता एतद् ज्ञातुम् अधिकृता अस्ति...

किमर्थं तस्यै औषधगुलिकायाः सूच्यौषधस्य पट्टिकायाः व्रणिते सति सीवनस्य च व्यवस्था नास्ति ।

भो! मम बालाः एतद् ज्ञातुम् अधिकृताः सन्ति..

किमर्थम् अहोरात्रं ते श्रमं कुर्वन्ति किमर्थं तेषाम् अध्ययनार्थं शालायाः व्यवस्था नास्ति।

उपर्युक्ते गीते भवते का पङ्क्तिः अरोचत्?

भो!मम बभुक्षा एतद् ज्ञातुम् अधिकृता अस्ति" इति पङ्क्तेः कवेः आशयः कः भवितुं शक्नोति?

किं भवन्तः स्वभाषया स्वक्षेत्रे प्रचलितं किमपि गीतम् अथवा कामपि कवितां कक्षायां श्रावयितुं शक्नुवन्ति यस्मिन् यस्यां वा मनुष्यस्य समतायाः गरिम्णः वा वर्णनं लभेत।

असमानतायाः विरोधे रचनात्मक-अभिव्यक्तिः

केचन जनाः असमानतायाः विरोधे यानि आन्दोलनानि भवन्ति तेषु भागं गृह्णन्ति अपरे च

केचन जनाः असमानतायाः विरोधे स्व-लेखन्याः,स्व-ध्वनेः, नृत्यस्य, सङ्गीतस्य, अन्यकलानां च प्रयोगं सर्वकारस्य ध्यानस्य आकर्षणाय, कुर्वन्ति । लेखकाः गायकाः नर्तकाः अन्ये च कलाकाराः अपि असमानतायाः विरोधे अस्माकं विरोधे यः सङ्घर्षः जायते तस्मिन् सक्रियरूपेण स्व-दायित्वं निर्वहन्ति। प्रायः कविताः गीतानि कथाः च न केवलम् अस्मान् प्रेरयन्ति अपितु तानि सर्वाणि अपि समानतायाः विषये अस्माकं विश्वासं दृढीकुर्वन्ति । तानि न अस्मान् प्रेरयन्ति अपितु सम्यग्दिशि चलितुम् अपि अस्मान् शिक्षयन्ति ।

भारतस्य संविधानं- कश्चित् जीवन् अभिलेखः

न्यायस्य कृते कस्यचित् आन्दोलनस्य समानतायाः च कृते गीत-माध्यमेन कविता-माध्यमेन च याः समग्राः प्रेरणाः भवन्ति तासु यः कश्चित् भावः अन्तर्निहितः भवति सः मनुष्यस्य समतायाः एव भवति । भवन्तः जानन्ति एव यत् भारतस्य संविधानं सर्वान् अस्मान् समानरूपेण मन्यते । देशे समतायाः कृते जातान्दोलनानि सङ्घर्षाः च प्रायः संविधानस्य आधारेण एव समतायाः न्यायस्य च चर्चां कुर्वन्ति । तवा-मत्स्यसङ्घस्य धीवराणाम् आशायाः आधारः अपि संविधानस्य यानि प्रावधानानि सन्ति तानि एव सन्ति । स्ववार्तायां नैरन्तर्येण ते संविधानस्य एव चर्चां कुर्वन्ति एतस्मात् ते संविधानम् एतादृशस्य जीवद्-अभिलेखस्य रूपेण प्रयोगं कुर्वन्ति यः वास्तविकतायाम् अस्माकं जीवने किञ्चित् अर्थं धारयति अर्थात् सार्थकम् इति वर्तते । लोकतन्त्रे बहवः जनाः समुदायाः च नैरन्तर्येण एतस्यां दिशि



समतायाः मूल्यं लोकतन्त्रस्य केन्द्रे अस्ति। अस्मिन् पुस्तके वयं काञ्चन् विषयान् द्रष्टुं प्रयासं कृतवन्तः ये लोकतन्त्रस्य मूलभावस्य कृते आह्वानम्

उत्पादयन्ति । यथा भवद्भिः पठितं देशस्य स्वास्थ्यसेवानां निजकरणं, सञ्चार-माध्यमेषु व्यावसायिक-समूहानां वर्धमानः प्रभावः नियन्त्रणं च, महिलाभिः यः श्रमः क्रियते तस्य न्यूनमूल्यङ्कनं, कार्पासस्य कृषकाणाम् आये वृद्धेः ह्रासः, - एतानि सर्वाणि लोकतन्त्रस्य कृते आह्वानानि सन्ति । एते ते विषयाः सन्ति प्रत्यक्षतः निर्धनान् प्रभावयन्ति तथा च समाजे उपेक्षितसमुदायैः युक्ताः सन्ति। एते देशे समाजिक-आर्थिक-समानताभिः सम्बद्धाः सन्ति।

लोकतन्त्रस्य कृते समता तथा च तस्याः कृते सङ्घर्षः किञ्चित् महत्त्वपूर्णं तत्त्वम् अस्ति। व्यक्तिसमुदाययोः स्वाभिमानः तथा च गरिमा अपि तदैव स्थातुं शक्नोति यदा तेषां पार्श्वे स्वस्य परिवारस्य च सर्वाः आवश्यकताः पूरयितुं पर्याप्तसंसाधनानि स्युः तथा च तैः सह कश्चिद् भेदभावः न स्यात्।

प्रयासं कुर्वन्ति यत् लोकतन्त्रस्य क्षेत्रं वर्धेत अपि च अधिकाद् अधिकेषु विषयेषु समानतायाः आनयनस्य या आवश्यकता वर्तते ताम् आवश्यकतां स्वीकुर्यात्।

2001 तमे वर्षे लखनवुनगरे **1500** तः अधिकाः जनाः, महिलाः अधिकृत्य याः हिंसा भवति तस्याः विरोधं कर्तुं न्यायगोष्ठ्याम् एकत्रिताः जाताः। तस्यां न्यायगोष्ठ्यां प्रतिष्ठित-महिलानां काचित् निर्णायकमण्डली रचिता तथा च ताभिः न्याधीशानां भूमिकायाः निर्वहणं कुर्वतीभिः, महिला-सम्बन्धि-हिंसायाः पञ्चदशभ्यः अपि अधिक-प्रकरणानां श्रवणं कृतम्। जनाः एतां वास्तविकतां प्रकाशपथम् आनेतुं साहाय्यं कृतवन्तः यत् अधिनियम-प्रक्रियायां गृह्यहिंसायाः विरोधे न्यायस्य याचनाः कुर्वत्यः महिलाः कियन्तम् अल्पम् एव सहयोगं प्राप्नुवन्ति।

समानतायाः कृते जनानां सङ्घर्षे अस्माकं संविधानस्य कीदृशं दायित्वं भवितुं शक्नोति?

किं भवन्तः कस्मिंश्चित् लघुसमूहे समानतायाः कृते किञ्चित् सामाजिकविज्ञापनं सज्जीकर्तुं शक्नुवन्ति।

सन्दर्भः

- *द्रीजः ज्यां अपराजितगोयलः च **2003.** फ्यूचर-आफ-मिड-डे-मील्स,इकानामिक-एण्ड-पोलिटिकल-वीकली।*
- *हुसैन-रुकैया-सखावतः,**1905**(पुनर्मुद्रणम्)**1988.** सुल्तानाज-ड्रीम. फेमिनिस्ट-प्रेस,न्यूयार्कः।*
- *कुमारः,कृष्णः, **1986.** ग्रोइंग-अप-मेल,सेमिनार **318**।*
- **मजुमदारः,इन्द्राणी.2007,वीमेन-एण्ड-ग्लोबलाईजेशन-द-इंपैक्ट-आन-वीमेन-वर्कर्स-इन-द-फार्मल-एण्ड-इनफार्मल-सेक्टर्स-इन-इण्डिया.स्त्री,कोलकाता।**
- *मीड,मार्गरेट.**1928,1973**(संस्करणम्). ग्रोइंग-अप-इन-समोआ,अमेरिकन-म्यूजियम-आफ-नैचुरल-हिस्ट्री,वाशिंगटन-डी.सी।*
- *भारतीयायुर्विज्ञान-परिषद्,**http://www.mciindia.org/Rules-and-Regutation/Ethis%20Regulation-2002.pdf***
- *पार्क्स,**रोजा.२०००.क्वाइट-स्ट्रेन्थ-ग्रैण्ड-रैपिड्स,जान्डरवन,मिशिगन।***
- **रास-सुन्दरी-देवी**,1999,**वर्डस-टू-विन,तनिकासर्वकारस्य अनुवादः तथा च तेषां भूमिकया सार्धं, जुबान,नयी-दिल्ली।**
- **रायतीर्थंकर**:,1999,**ग्रोथ-एंड-रीसेशन-इन-स्मालस्केल-इण्डस्ट्री-अ-स्टडी-आफ-तमिल-नाडु-पावरमूम्स,इकानामिक-एण्ड-पोलिटिकल-वीकली।**
- *उच्चतमन्यायालयः**(Supreme-court of India), Paschim Banga Khet MaZdoor Samity oF Ors.Vs.State Of West Bangal & Anr.**(हाकिम-शेख-केस, निर्णयस्य दिनाङ्कः **6 may 1996,http:// judis.nic.in/ Supremecourt/imgs 1.aspx? filename = 15597)***
- *वाल्मीकि,ओमप्रकाश.**1997.**जूठन,राधाकृष्णप्रकाशनम्, नवदेहली।*
- *विश्वस्थास्थ्यसङ्घटनम् **(world Health organization),Essential medicines and health product.org/ rthc/ policybrieffinal.pdf***
- ***www.cehet.org/ rthc/ policybrieffnal.pdf***
- ***www.infochangeindia.org***
- *जुबान,**1996,**पोस्टर-वीमेन-अ-विज्युअल-हिस्ट्री-आफ-द-वीमेन्स-मूवमेन्ट-इन-इण्डिया.जुबान,नव -देहली।*



1. *भारतसर्वकारस्य प्रतिलिप्यधिकारः,2007*
2. *आन्तरिक-विवरणानां सम्यग्दर्शनस्य दायित्वं प्रकाशकस्य अस्ति ।*
3. *समुद्रे भारतस्य जलप्रदेशः उपर्युक्त-आधार-रेखया मापितबाह्यसमुद्रमील इत्यस्य दूरतां यावद् अस्ति।*
4. *चण्डीगढ-पञ्जाब-हरियाणानां च प्रशासिमुख्यालयः चण्डीगढे अस्ति।*
5. *अस्मिन् मानचित्रे अरुणाचलप्रदेश-असम-मेघालयानां मध्ये दर्शितान्तर्राज्यीयाः सीमाः उत्तरीपूर्वीक्षेत्राधिनियमः 1971 इत्यस्य निर्वाचनस्य अनुसारं दर्शिताः सन्ति,परन्तु अधुना सत्यापिताः न सन्ति सत्यापनम् अवशिष्टम् अस्ति।*
6. *भारतस्य बाह्यसीमाः तथा च समुद्रतटीय-रेखाः भारतीय-सर्वेक्षण-विभागद्वारा सत्यापितस्य अभिलेखस्य या प्रधानप्रतिः अस्ति तया तुल्यतां भजन्ते।*
7. *अस्मिन् मानचित्रे उत्तराखण्डस्य झारखण्डस्य बिहारस्य छत्तीसगढस्य मध्यप्रदेशस्य च मध्यभूताः राज्यसीमाः सम्बन्धितसर्वकारैः सत्यापिताः न कृताः सन्ति।*
8. *अस्मिन् मानचित्रे दर्शितनाम्नाम् अक्षरविन्यासः विभिन्नेभ्यः सूत्रेभ्यः प्राप्यते।*
   **आन्ध्रप्रदेशराज्यस्य पुनस्सङ्घटनानन्तरं जूनमासस्य द्वितीयदिनाङ्कस्य 2014 तमे वर्षे तेलङ्गाना भारतस्य एकोनत्रिंशत्तमं राज्यं जातम्।*

सूचनायाः अधिकारः Right to information (R T I)

सूचनायाः अधिकारः

सूचनायाः अधिकार-अधिनियमस्य मूलम् उद्देश्यं नागराणां सशक्तिकरणम् अस्ति , सर्वकारस्य क्रिया-कलापेषु पारदर्शितायाः उत्तरदायित्वस्य च वर्धनं, भ्रष्टाचारस्य वारणं, लोकतन्त्रं जनसेवायै कृतसङ्कल्पं कर्तुं सज्जीकरणम् । भवन्तः सूचनायाः अधिकारस्य उपयोगं कृत्वा सर्वकारस्य विविधानां क्रिया-कलापानां विषये आवश्यकीं सूचनां प्राप्तुं शक्नुवन्ति ।

सूचनाधिकार-अधिनियमस्य प्रयोग-विधिः

आवेदनं सामान्य-पृष्ठे कर्तुं शक्यते । भवन्तः एतत् आवेदनं शुल्क-सहितं सम्बन्धितस्य विभागस्य सूचनाधिकारिणे (PIO) प्रेषयन्तु । एतत् आवेदनं भवन्तः पत्रालयस्य माध्यमेन अपि प्रेषयितुं शक्नुवन्ति ।

आवेदन-शुल्कम्

केन्द्र-सर्वकारस्य विभागैः सम्बन्धित-विषयेषु भवद्भिः १० रूप्यकाणि आवेदन-शुल्क-रूपेण देयानि भविष्यन्ति । तत् शुल्कं प्रस्तुतधन-माध्यमेन धनादेश-माध्यमेन पत्रादेश-माध्यमेन (पोस्टल-ऑर्डर) अथवा वित्तकोशीय-देयादेश-माध्यमेन अपि दातुं शक्यते । राज्यसर्वकारस्य विभागानां कृते एतत् शुल्कं पृथक् अस्ति ।

आर.टी.आई.सम्बन्धिने अधिकाय ज्ञानाय प्रवेशं कुर्वन्तु www.cic.gov.in,www.rti.gov.in

765

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 81-7450-733-7